
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः


कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह
दाखल क्र M 261 विषय धर्मशास्त्र
नाव. सत्याषाढ-हिरण्यकेशीय स्मार्त प्रयोग (Mss).
लेखक/लिपीकार महेशभट्ट कृत,
पृष्ठ काळ पूर्ण/अपूर्ण

जलपानमित्यवमादीनिनकुर्यात्॥रजोदर्शनात्षोडशादिनादिऋतुः॥तम
ध्येआद्यरात्रिचयं [illegible] संक्रांत्यमावास्याव्यतीपातैकादशीक्षयाहमघाम्
लादिकंचवि [illegible] हायदंपत्योश्चंद्रताराद्यानुकूल्येचचतुर्थेऽविहितत्वाच्चतुर्थादिषु
युग्मदिवसेगर्भाधानंकार्यं॥कर्तासुस्नातःकृतमांगलिकःस्वलंकृतःवस्त्राच्छादि
तेपीठेप्राङ्मुखउपविश्यस्नातांस्वच्छवस्त्रकृतपरिधानांभूषणमाल्यानुलेपनै
रलंकृतांप्रथमशिष्टब्राह्मणकृतसंभाषांस्वदक्षिपातःपत्नीचोपवेश्याचम्यप्रा
णानायम्य॥ॐ॥सुमुखश्चैकदंतश्चकपिलोगजकर्णकः॥लंबोदरश्चविकटो
विघ्ननाशोगणाधिपः॥द्वादशैतानिनामानियःपठेच्छृणुयादपि॥धूम्रकेतु
र्गणाध्यक्षोभालचंद्रोगजाननः॥विद्यारंभेविवाहेचप्रवेशेनिर्गमेतथा॥
संग्रामेसंकटेचैवविघ्नस्तस्यनजायते॥शुक्लांबरधरंदेवं॥शशिवर्णंचतुर्भुजं॥प्र
सन्नवदनंध्यायेत्सर्वविघ्नोपशांतये॥इत्यामंगलश्लोकान्पठित्वा॥ॐ॥लक्ष्मी

म०टी

नारायणाभ्यांनमः।।उमामहेश्वराभ्यां०।।शचीपुरंदराभ्यां।।मातापितृभ्यां।।इष्ट
देवताभ्यो।।कुलदेवताभ्यो०।।ग्रामदेवताभ्यो०।।वास्तुदेवताभ्यो०।।सर्वेभ्यो
ब्राह्मणेभ्योनमोनमः।।विष्णोर्विष्णुःश्रीमद्भगवतोमहापुरुषस्य श्रीविष्णोरचिं

।।२।।

त्यामितवीर्यस्यशक्त्याध्रियमाणयाब्रह्मांडखंडयोर्मध्येभूमंडलेजंबूद्वीपेभारत
वर्षेआर्यावर्तेअविमुक्तवाराणसीक्षेत्रेआनंदवनेगौरीमुखेत्रिकंटकविराजि
तेकुमारिकाक्षेत्रेभास्थ्याःपश्चिमेदेशेअद्यब्रह्मणोद्वितीयेपरा[illegible]र्धेश्वेतवा
राहकल्पेवैवस्वतमन्वंतरेअष्टाविंशतितमेयुगेचतुष्कांतिकेमेकलियुगेप्र
थमचरणेबौद्धावतारेविक्रमशकेअमुकनाम्नीसंवत्सरेअयनेऋतौमासि
पक्षेतिथौनक्षत्रेयोगेकरणेसूर्येचंद्रेदेवगुरौशेषग्रहेषुयथा[illegible]स्था

२

नंस्थितेषुसत्सुएवंगुणविशेषणविशिष्टायांशुभपुण्यतिथौशुभति
थौचेतिविविक्तौसंकीर्त्यममास्यांभार्यायांप्रतिगर्भसंस्कारा[illegible]ति

शयद्वाराअस्यांजनिष्यमाणगर्भाणांबीजगर्भसमुद्भवैनोनिबर्हणद्वारा
श्रीपरमेश्वरप्रीत्यर्थंगर्भाधानाख्यंकर्मकरिष्ये तदंगं गणपतिपूजनं
पुण्याहवाचनंमातृकापूजनंनांदीश्राद्धंचकरिष्ये इतिसंकल्प्यगणपति
पूजयेत् प्रणवंमध्यादौसर्वत्रजपेत् औंगणानांत्वागणपतिंहवामहे
कविंकवीनामुपमश्रवस्तमं ज्येष्ठराजंब्रह्मणांब्रह्मणस्पतआनःशृण्वंनू

५९

तिभिःसीदसादनं इतिमंत्रेणगणपतयेनमइतिनाममंत्रेणवा आवाह
नासनपाद्यार्घ्याचमनंस्नानवस्त्रगंधपुष्पधूपदीपनैवेद्यफलतांबूलदक्षि
णानमस्कारइतिषोडशोपचारैः गंधपुष्पधूपदीपनैवेद्यादीनिपंचोपचा
रैर्वागणपतिंसंपूज्यपुष्पांजलिंदत्वा वक्रतुंडमहाकायसूर्यकोटिसमप्र
भ निर्विघ्नंकुरुमेदेवसर्वकार्येषुसर्वदा इतिप्रार्थनाकार्या इतिगणपतिपू

म॰हे॰भ॰ जनं अथपुं[illegible]ण्याहवाचनं तत्रगर्भाधा नादिसर्वकर्मसु आदावंतेच
केषुचित्पुण्याहवाचनंविहितं ब्राह्मणानंन्नेनपरिविष्यपुण्याहं स्वस्त्य
यनमृद्धिमितिवाचयित्वा इत्यादिनासूत्रकृतातत्रदेवताकांक्षा
३ यांशास्त्रांतरोक्तादेवताउच्यंते गर्भाधानस्या[illegible]दावंतेचब्रह्मा पुंस
स्या सनोभयत्रप्रजापतिः सीमंतस्योभयत्रधाता जातकर्मण्युभयत्रमृत्यु
युः नामकरणस्यादौसविता अंतेप्रजापतिः आयुवर्धापनस्योभ
यत्रा[illegible]ग्निरायुष्मान् अन्नप्राशनस्योभयत्रसविता चौ
लस्यादौकेशिनः अंतेप्रजापतिः उपनयनस्यादाविंद्रः अंतेश्रद्धा
मेधे उपनयनस्यचतुर्थदिवसस्यपुंण्याहवा[illegible]चानेसुश्रवाः पुनरु
पनयनस्योभयत्राग्निः ब्रह्मचारिवेदव्रतोपाकरणविसर्गयो

रुभयत्रसविता ब्रह्मचारिव्रतलोपप्रायश्चित्तस्योभयत्रसविता॥
वेदोपाकरणयोत्सर्जनयोरुभयत्रसविता समावर्तनस्योभयत्रश्रीरिं
द्रोवा विवाहस्योभयत्रा[illegible]ग्निः॥ औपासनोपक्रमेतेवाग्निस्सूर्य
प्रजापतयः दर्शपूर्णमासस्थालीपाकयोरुभयत्राग्निः वास्तुहो
मस्यादौवास्तोष्पतिः अंतेप्रजापतिः शूलगवस्योभयत्रेशानः
प्रदोष व्रतस्योभयत्रेशानः नक्षत्रहोमेशोभयत्रनक्षत्रदेवताः
ण आग्नयणस्योभयत्राग्नयणदेवताः प्रत्येकनवग्रह[illegible]मखेउभयत्र
क्रमेणादित्याद्यानवग्रहदेवताः तंत्रेणग्रहमखेब्रह्मादयश्चोभ
यत्र कूश्मांडहोमेचांद्रायणेचोभयत्राग्न्या[illegible]दयः सर्पबलेरु
भयत्रसर्पाः नक्षत्रेष्टौउभयत्र[illegible]नक्षत्रदेवताः तडागाद्युत्सर्गेउभ

म०ठी

यत्रवरुणः एकोद्दिष्टस्योभयत्रप्रजापतिः सूतकांतेप्रधामा अग्न्याधे
येउभयत्राग्न्यादायः॥अग्निष्टोमे उभयत्रेंद्रः॥अनादिष्टकर्मसुसर्वत्रप्र

॥४॥

जापतिः॥इतिबौधायनोक्ताः पुण्याहदेवताः कर्ताब्राह्मणानन्नादिना
संतर्प्यगंधादिनासंपूज्यतान्पुण्याहंवाचयेत् ॐ महीद्यौः पृथिवीचनइ
मंयज्ञमिमिक्षतां पिपृतान्नोभरीमभिः मंत्रावृत्त्यादक्षिणोत्तरतोभूमिं
स्पृष्ट्वा ओषधयः संवदंतेसोमेनसहराज्ञा यस्मैकरोतिब्राह्मणस्तंराजन्

न६

राजन्पारयामसि तंडुलपुंजोकृत्वा आजिघ्रकलशंमह्युरुधारापयस्वत्या
त्वाविशंत्विंदवः समुद्रमिवसिंधवः सामासहस्रआभजप्रजयापशु
भिःसहपुनर्माविशताद्रयिः मंत्रावृत्त्याकलशौनिधाय इमंमेगंगे ॥५॥
यमुनेसरस्वतिशुतुद्रिस्तोमंसचतापरुष्णिया असिक्न्यामरुद्वृ

कं

धेवितस्तयार्जीकीयेशृणुह्यासुषोमया॥तीर्थेजलेनपूरयित्वा गं
धद्वारांदुराधर्षांनित्यपुष्टांकरीषिणीं ईश्वरींसर्वभूतानांतामिहोपह्व
येश्रियं गंधंप्रक्षिप्य चंदनपुष्पादिनाभूषितौकृत्वा कांडात्कांडात्प्र
रोहंतीपरुषःपरुषःपरि एवानोदूर्वेप्रतनुसहस्रेणशतेनच दूर्वानि
धाय अश्वत्थेवोनिषदनंपर्णेवोवसतिष्कृता गोभाजइत्किलास
थयत्सनवथपूरुषं पर्णानि अग्नेरेतश्चंद्रंहिरण्यं अद्भ्यःसंभूतम
मृतंप्रजासु तत्संभरन्नुत्तरतोनिधाय अतिप्रयच्छंदुरितिंतरेयं हि
रण्यंनिधाय बृहस्पतेजुषस्वनोहव्यानिविश्वदेव्य। रास्वर त्नानि
दाशुषे रत्नानियाःफलिनीर्याअफलाअपुष्पायाश्चपुष्पिणीः॥
बृहस्पतिप्रसूतास्तानोमुंचंत्वंहसः फलं सुवासुवासाःपरिवी

म० दी

तआगात्सैश्रेया।भवतिजायमानः तंधीरासःकवउन्नयंतिस्वाधि
योमनसादेवयंतः वस्त्रं पूर्णादर्विपरापतसुपूर्णापुनरापत वस्ने
ववि‍क्रीणावहाइषमूर्जंशतक्रतो। तंडुलफलसहितपात्राभ्या
मा[illegible]ननेपिधाय सर्वत्रप्रतिकलशमंत्रावृत्याउत्तरसंस्थाव
तत्वायामिब्रह्मणावंदमानस्तदाशास्तेयजमानोहविर्भिः अहे
डमानोवरुणेहबो[illegible]ध्युरुशंसमा आयुःप्रमोषीः[illegible]
उत्तरकलशे[illegible]वरुणमावाह्यवरुणायनमइतिगंध
पुष्पधूपदीपनैवेद्यतांबूलादिभिःसंपूज्यदक्षिणांदत्वा ततोदेवता
आवाहयेत कलशस्यमुखेविष्णुःकंठेरुद्रःसमाश्रितः मूलेतत्र

५

स्थितोब्रह्मामध्येमातृगणाःस्मृताः कुक्षौतुसागराःसर्वेसप्तद्वीपाव
संधरा ऋग्वेदोथयजुर्वेदःसामवेदोह्यथर्वणः अंगैश्चसहिताःसर्वे
कलशंतुसमाश्रिताः अत्रगायत्रीसावित्रीशांतिःपुष्टीकरीतथा आ
यांतुदेवमंत्रार्थंदुरितक्षयकारकाः उत्तरकलशे अक्षतान्क्षिपेत् मा
तृदेवोभव पितृदेवोभव [illegible] आचार्यदेवोभव अतिथिदेवोभव अ
वनिकृतजानुमंडलःकमलमुकुलसदृशमंजलींशिरस्याधायदक्षिणेन
पाणिनासुवर्णपूर्णक लशंधारयित्वाशिषःप्रार्थयंते प्रार्थमानोह॥
एताःसत्याआशिषःसंतु दीर्घानागानद्योगिरयस्त्रीणिविष्णुपदानि
चतेनायुःप्रमाणेनपुण्यंपुण्याहंदीर्घमायुरस्तु शिवाआपःसंतु संतु
शिवाआपः सौमनस्यमस्तु अस्तुसौमनीयं अक्षतंचारिष्टंचास्तु॥

म० ह्री

॥ ६ ॥

अस्त्वक्षतमरिष्टंच गंधाःपांतु। सौमंगल्यंचास्तु अक्षताःपांतु आ
युष्यमस्तु पुष्पाणिपांतु सौश्रियमस्तु तांबूलानिपांतु ऐश्वर्यम
स्तु-दक्षिणाःपांतु बहुधेयंचास्तु दीर्घमायुःश्रीशांतिःपुष्टिस्तु
ष्टिश्चास्तु सर्वत्रब्राह्मणो रक्षिति [illegible] प्रत्युत्तरंदेयं यंकृत्वास
र्ववेदयज्ञक्रियाकरणकर्मारंभाःशुभाःशोभनाःप्रवर्तंते तमहमोंका
रमादिंकृत्वा ऋग्यजुःसामाशीर्वचनंबहुऋषिसंमतंसाविज्ञातंभ
वद्भिरनुज्ञातःपुण्यंपुण्याहंवाचयिष्ये वाच्यतामितिवदेयुः उत्तरत्र ॥राम॥
यथायोग्यंयजमानः भद्रंकर्णेभिःश्रणुयामदेवाः भद्रंपश्येमाक्षभि ह्री
र्यजत्राः स्थिरैरंगैस्तुष्टुवांसस्तनूभिः व्यशेमदेवहितंयदायुः द्र
विणोदाद्रविणसःस्तुरस्यद्रविणोदाः [illegible] सनरस्यप्रयंसत् द्र
विणोदावीरवतीमिषन्नोद्रविणोदारासतेदीर्घमायुः सवितापश्चात्ता
त्सवितापुरस्तात्सवितोत्तरात्तात्सविताधरात्तात् सवितानःसुवतुस
र्वतातिंसवितानोरासतांदीर्घमायुः नवोनवोभवतिजायमानोन्हांके
तुरुषसामेत्यग्रे भागंदेवेभ्योविदधात्यायन्प्रचंद्रमास्तिरतिदीर्घ
मायुः उच्चादिविदक्षिणावंतो अस्थुर्येअश्वदाःसहतेसूर्येण हि
रण्यदा अमृतत्वंभजंतेवासोदाःसोमप्रतिरंतआयुः आपउंदं

य

तुजीवसेदीर्घायुत्वायवर्चसे यस्त्वाहृदाकीरिणामन्यमानोमर्त्यंमर्त्यो
जोहवीमि जातवेदोयशो अस्मासुधेहिप्र जाभिरग्नेअमृतत्वमश्यां॥
यस्मैत्वंसुकृतेजातवेदउलोकमग्नेकृणवस्योनं अश्विनंसपु
त्रिणंवीरवंतंगोमंतंरयिंनशतेस्वस्ति संत्वासिंचामियजुषाप्रजामा

महेशाभ युर्धनंच व्रतनियमतपःस्वाध्यायक्रतुदमदानविशिष्टानांब्राम्हणा
नांमनस्समाधीयतां समाहितमनसस्सः यजमानःप्रसीदंतुभवंतः
प्रसन्नास्सः शांतिरस्तु पुष्टिरस्तु तुष्टिरस्तु रुध्दिरस्तु अविघ्न
मस्तु आयुष्यमस्तु आरोग्यमस्तु शिवंकर्मास्तु कर्मसमृध्दिर
स्तु धर्मसमृध्दिरस्तु वेदसमृध्दिरस्तु शास्त्रसमृध्दिरस्तु पुत्र
समृध्दिरस्तु धनधान्यसमृध्दिरस्तु इष्टसंपदस्तु बहिर्दिशेअरि
ष्टनिरसनमस्तु यत्पापंतत्प्रतिहतमस्तु यच्छ्रेयस्तदस्तु उत्तरेक
र्मण्यविघ्नमस्तु उत्तरोत्तरमहरहरभिवृध्दिरस्तु उत्तरोत्तराःक्रियाः
शुभाःशोभनाःसंपद्यंतां तिथिकरणमुहूर्तनक्षत्रसंपदस्तु तिथि
करणमुहूर्तनक्षत्रग्रहलग्नाधिदेवताःप्रीयंतां तिथिकरणेमुहूर्तेन

॥ ७ ॥ ॥ राम ॥ ॥ ७ ॥

क्षेत्रेसग्रहेसदैवतेप्रीयेतां अग्निपुरोगाविश्वेदेवाःप्रीयंतां इंद्रपुरोगामरुद्गणाः
प्रीयंतां ब्रम्हपुरोगासर्वेवेदाःप्रीयंतां माहेश्वरीपुरोगउमामातरःप्रीयंतां व
सिष्ठपुरोगाऋषिगणाःप्रीयंतां अरुंधतीपुरोगाएकपत्न्यःप्रीयंतां ऋषय
श्छंदांस्याचार्यावेदायज्ञाश्चप्रीयंतां ब्रम्हचब्राम्हणाश्चप्रीयंतां श्रीसरस्व
त्यौप्रीयेतां श्रध्दामेप्रीयेतां भगवतीकात्यायनीप्रीयेतां भगवतीमाहेश्व
रीप्रीयतां भगवतीपुष्टिकरीप्रीयतां भगवतीतुष्टिकरीप्रीयतां भगवती
ऋध्दिकरीप्रीयतां भगवतीवृध्दिकरीप्रीयतां भगवंतौविघ्नविनायकौप्री
येतां भगवान्पर्जन्यःप्रीयतां भगवान्स्वामीमहासेनःसपत्निकःससुतः
सपार्षदः सर्वस्थानगतःप्रीयतां हरिहरहिरण्यगर्भाःप्रीयंतां सर्वाग्राम
देवताःप्रीयंतां सर्वाकुलदेवताःप्रीयंतां सर्वावास्तुदेवताःप्रीयंतां

महेशभ

बहिरपः हताब्रह्मद्विषः हतापरिपंथिनः हतास्यकर्मणोविघ्नकर्तारः शत्रवः
पराभवंयांतु शाम्यंतुघोराणि शाम्यंतुपापानि शाम्यंत्वीतयः सुनिवर्धं
तां शिवाआपःसंतु शिवावनस्पतयःसंतु शिवाओषधयःसंतु शिवा
ऋतवःसंतु शिवाअग्नयःसंतुशिवाआहुतयःसंतु शिवाअतिथयः
संतु अहोरात्रेशिवेस्यातां निकामेनिकामेनःपर्जन्योवर्षतुफलिन्यो
नओषधयःपच्यंतांयोगक्षेमोनःकल्पतां शुक्रांगारकबुधबृहस्पतिश
नैश्चरराहुकेतुसोमसहितआदित्यपुरोगासर्वेग्रहाःप्रीयंतां भगवान्ना
रायणःप्रीयतां भगवान्पर्जन्यःप्रीयतां भगवान्स्वामीमहासेनःपुण्यया
हकालोवाचयिष्ये वाच्यतां उद्गातेवशकुनेसामगायसिब्रह्मपुत्रइव
सवनेषु शंससि वृषेववाजीशिशुमतीरपीत्यासर्वतोनःशकुनेभद्रमा

॥८॥ ॥राम॥ ॥८॥

वदविश्वतोनःशकुनेपुण्यमावद याज्ययायतिप्रातिर्देवयाज्याःपुण्येवलक्ष्मीः
पुण्यामेवतल्लक्ष्मींसंभावयतिपुण्यांलक्ष्मींसंस्कुरुते यत्पुण्यंनक्षत्रं तद्बट्कु
र्वीतोपव्युषंयदावैसूर्यउदेति अथनक्षत्रंनैति यावतितत्रसूर्योगच्छेत्॥
यत्रजघन्यंपश्येत् तावतिकुर्वीतयत्कारीस्यात् पुंण्याहएवकुरुते तानि
वाएतानियमनक्षत्राणि यान्येवदेवनक्षत्राणि तेषुकुर्वीतयत्कारीस्यात्
पुण्याहएवकुरुते मघ्वंसहकुटुं बिनेमहान्नान्नमस्कुर्वाणाय आशीर्वचन
मुपेक्षमाणायामुककर्मकारिणेपुंण्याहंभवंतोब्रुवंतु इतित्रिर्यजमानः ॐ
पुण्याहमितित्रिर्विप्राः अत्रसूत्रकृतापुण्याहं स्वस्तिमितिवाचयित्वेत्युक्त
त्वात्स्वपरनिर्देशाद्ब्रूतितिवचनेनप्रथमैकवचनांतःप्रयोगतव्यः स्वस्तयेवा
युमुपब्रवामहेसोमंस्वस्तिभुवनस्ययस्पतिः बृहस्पतिंसर्वगणंस्वस्तयेस्व

महेशभ ॥१॥

स्वस्तय आदित्यासोभवंतुनः आदित्सउदयनीयः पथ्यैवेतः स्वस्त्याप्रयंतिपथ्यां
स्वस्तिमभ्युद्यंतिस्वस्त्येवतःप्रयंतिस्वस्त्युद्यंतिस्वस्त्युद्यंति स्वस्तिनइंद्रोवृद्धश्र
वाः स्वस्तिनः पूषाविश्ववेदाः स्वस्तिनस्ताक्ष्र्योअरिष्टनेमिः स्वस्तिनोबृहस्प
तिर्दधातु अष्टौदेवावसवःसोम्यासः चतस्रोदेवीरजराश्रविष्ठाः तेय
ज्ञंपांतुरजसःपुरस्तात् संवत्सरीणममृतंस्वस्ति मह्यंसहकुटुंबिनेम
हाजनान्नमस्कुर्वाणायआशीर्वचनमपेक्षमाणायअमुककर्मकारि
णेस्वस्तिंभवंतोब्रुवंतु इतित्रियजमानः ॐ स्वस्तिमितिप्रतिवचनंत्रिः ॥राम॥
ऋध्यामस्तोमंसनुयामवाजमानोमंत्रंसरथेहोपयातं यशोनपक्कंमधु
गोष्वंतराभूतांशोअश्विनोःकाममप्राः सर्वाम्रध्धिमृध्नुयामितितंवैते ॥१॥
जसैवपुरस्तात्पर्यभवच्छंदोभिर्मध्यतोक्षरैरुपरिष्टाद्गायत्र्यासर्वतोद्वाद

शाहंपरिभूयसर्वामृध्धिमार्ध्नोत्सर्वामृध्धिमृध्नोतियएवंवेद ऋध्यास्म
हव्यैर्नमसोपसद्य मित्रंदेवंमित्रधेयन्नोअस्तु अनुराधान्हविषावं
र्धयंतः शतंजीवेमशरदःसवीराः चित्रंनक्षत्रमुदगात्पुरस्तात् अनूरा
धासइतियद्वदंति तन्मित्रएतिपथिभिर्देवयानैः हिरण्ययैर्विततेअं
तरिक्षे त्रीणित्रीणिवैदेवानामृध्धानि त्रीणि छंदांसि त्रीणिसवनानि त्र
यइमेलोकाः ऋध्यामेवतद्वय्येतेषुलोकेषुप्रतितिष्ठति मह्यंमित्यादि
अमुककर्मकारिणे ऋध्धिंभवंतोब्रुवंतुइतित्रिः ओंऋध्यतामितिप्रतिवचनंत्रिः रि
श्रीयेजातःश्रीय आनिर्यायश्रीयंवयोजरितृभ्योदधाति श्रियंवसानाअ
मृतत्वमायन्भवंतिसत्यासमिथामितद्रौ श्रियएवैनंतच्छ्रियामादधाति
संततमृचावषट्कृत्यसंततस्यैसंधीयतेप्रजयापशुभिर्यएवंवेद यस्मिन्ब्र

महेशभ ह्याभ्यजनयत्सर्वमेतत् अमुंचलोकमिदमूचसर्वं तन्नो [जि]क्षत्रमभिहृिजित्य।
श्रियं दधात्वहृणीयमानं अहेर्बुध्नियमन्त्रंमेगोपाय यमृषयस्त्रयिविदोवि
दुः ऋचसामानियजूंषि साहिश्रीरमृतासतां [illegible]
~~पेशाघृतमतीकावयुनानिवस्ते सारतीर्यमाणमहृतेसोभि[illegible]सान्नेवु~~
१०॥ नं एतैर्मंत्रैः सुवासिनिभिः नीराजनंकारयंति मद्यामिस्यादि अमुककर्म
कारिणेश्रीरस्त्विति भवंतोब्रुवंतु इतितिः॥ अस्तुश्रीरितिप्रतिवचनंत्रिः॥
वर्षशतंपूर्णमस्तु गोत्राभिवृध्दिरस्तु [illegible] ब्रह्माश्रीयं ॥राम्॥
तां कर्मांतरे पुण्याहवाचनेपूर्वोक्तादेवताग्न्याद्याः शुक्रेभिरंगैरजआ
ततन्वा क्रतुंपुनानः कविभिः पवित्रैः शोचिर्वसानः पर्यायुरपां श्रीयोमिमी १०॥
तेबृहतीरनूनाः दैतप्येषश्लोकोभिगीतोमरुतः परिवेष्टारोमरुत्तस्याव

सन्गृहे आविक्षितस्य कामप्रेर्विश्वेदेवाः सभासदइति ततउत्तरकलशं
दक्षिणहस्तेगृहीत्वादक्षिणकलशंवामहस्तेगृहीत्वादक्षिणकलशंवामह म
स्तेगृहीत्वा ताभ्यांधाराद्वयंसंततपात्रेनिषीचेद भिमंत्रैः वास्तोष्पते
प्रतिजानीह्यस्मान्स्वावेशो अनमीवोभवानः यत्वेमहेप्रतिन्नोजुषस्वशंन्नए
धिद्विपदेशंचतुष्पदे वास्तो[illegible]ष्पतेप्रतरणोनएधि गयस्फानोगोभिरश्वेभि
स रिंदो अजरासस्तेसख्येस्यामपितेवपुत्रान्प्रतिजुषस्व वास्तोष्पतेशग्मयासंदो स
तेसक्षीमहिरण्वयागातुमत्या आवःक्षेमउतयोवरंन्नोयूयंपातस्वस्तिभिः
सदानः अमीवहावास्तोष्पतेविश्वारूपाण्याविशन् सखासुशेव
एधिनः शिवंशिवंशिवं ततः कर्तावामतः पत्नीमुपवेश्य पात्रेपा
तितजलेपल्लवदूर्वाभिरुदङ्मुखाविप्राअभिषिंचयुस्तिष्ठंतः स

म०म

ना

समुद्रज्येष्ठाः सरिरस्यमध्यात्पुनानायंत्यनिविशमानाः इन्द्रोयावज्ञीव
षभोरराद्ता आपोदेवीरिहमामवंतु यासांराजावरुणोयातिम
ध्येसत्यानृते अवपश्यंजनानांमधुश्चुतः शुचयोयाः पावकास्तान
आपःशंस्योनाभवंतु यासुराजावरुणोयासुसोमोविश्वेदेवा

११

यासूर्जंमदंति वैश्वानरोयास्वग्निःप्रविष्टस्ता आपोदेवीरिहमा
मवंतु त्रायंतामिहदेवास्त्रायतांमरुतांगणः त्रायंतांविश्वाभूता
नियथायमरपाअसत् आपइद्वाउभेषजीरापो अमीवचातनीः॥
आपः सर्वस्यभेषजीस्तास्तेकृण्वंतुभेषजं हस्ताभ्यांदशशाखा

११

भ्यांजीह्वा वाचःपुरोगवी अनामयित्नुभ्यांत्वोपस्पृशामसि॥
इमाआपः शिवतमाइमाः सर्वस्यभेषजीः इमाराष्ट्रस्यवर्धनी

त्वाताभ्यां

रिमाराष्ट्रभृतोमृताः याभिरिंद्रमभ्यषिंचत्प्रजापतिः सोमंराजानंव
रुणंयमंमनुं ताभिरद्भिरभिषिंचामित्वामहंराज्ञांत्वमधिराजोभ
वेह महांतंत्वामहीनांसम्राजंचर्षणीनां देवीजनित्र्यजीजनद्भद्रा
जनित्र्यजीजनत् देवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोह

संद्रुत्वेंद्र

स्ताभ्यामग्नेस्तेजसासूर्यस्यवर्चसेंद्रियेणाभिषिंचामि बलाय।
श्रियैयशसेनाद्यायभूर्भुवःस्वः देवस्यत्वासवितुःप्रसवे अश्वि
नोबाहुभ्यां पूष्णोहस्ताभ्यां अश्विनोर्भैषज्येन तेजसेब्रह्मव
र्चसायाभिषिंचामि देवस्यत्वासवितुःप्रसवे अश्विनोर्बाहुभ्यां
पूष्णोहस्ताभ्यां सरस्वत्यैभैषज्येन वीर्यायान्नाद्यायाभिषिंचा
मि देवस्यत्वासवितुःप्रसवे अश्विनोर्बाहुभ्यां पूष्णोह

म० ह्रीम स्ताभ्यां इंद्रस्येंद्रियेण श्रियेयशसेबलायाभिषिंचामि सुरास्त्वामभि
षिंचंतुब्रह्मविष्णुमहेश्वरः वासुदेवोजगन्नाथस्तथासंकर्षणोविभुः प्र
द्युम्नश्चानिरुद्धश्चभवंतुविजयायते आखंडलोग्निर्भगवान्यमोवैनिर्ऋ
तिस्तथा वरुणःपवनश्चैव धनाध्यक्षस्तथाशिवः ब्रह्मणासहितासर्वे
१२ दिक्पालाःपांतुतेसदा कीर्तिर्लक्ष्मी धृतिर्मेधापुष्टिश्रद्धाक्रियामतिः
बुद्धिर्लज्जावपुःशांतिःकांतिःपुष्टिश्चमातरः एतास्त्वामभिषिंचंतुदेवपत्न्यः ॥राम॥
समागताः आदित्यश्चंद्रमाभौमोबुधजीवःसितार्कजाः ग्रहास्त्वाम १२
भिषिंचंतुराहुकेतुश्चपूजिताः देवदानवगंधर्वायक्षराक्षसपन्नगाः ऋ
षयोमुनयोगावोदेवमातरएवच देवपत्न्योद्रुमानागादैत्याश्चाप्स
रसांगणाः अस्त्राणिसर्वशस्त्राणिराजानोवाहनानिच औषधा

निचरत्नानिकालस्यावयवाश्चये सरितःसागराःशैलास्तीर्थानिजल
दानदाः एतेत्वामभिषिंचंतुसर्वकामार्थसिद्धये ॐभूर्भुवःस्वः अ
मृताभिषेकोस्तु ततःआचारप्राप्तंवस्त्रादिदानंतत्परिधानं युवासु
वासाःपरिवीतआगात्सउश्रेयान्भवतिजायमानः तंधीरासःकवयउन्न
यंतिस्वाधियोमनसादेवयंतः इतिपुण्याहवाचनप्रयोगः अथमातृ
कापूजा गौरीपद्माशचीमेधासावित्रीविजयाजया देवसेनास्वधा
स्वाहामातरोलोकमातरः धृतिःपुष्टिस्तथातुष्टिरात्मनःकुलदेवता ब्राह्मीमाहे
श्वरीचैवकौमारीवैष्णवीतथा वाराहीचतथेंद्राणीचामुंडाःसप्तमातरः एताःग
णपतिसहिताः चतुर्विंशत्यक्षतपुंजेष्वावाहयामि नवंभजंमेगोपाय ॥अमृत
त्वायजीवसे॥जातांजनिष्यमाणांच।अमृतेसत्येप्रतिष्ठितां॥इतिप्रतिष्ठाप्य ना
माममंत्रैःषोडशोपचारैःपंचोपचारैर्वासंपूज्य गौरीर्मिमायसलिलानितक्षत्येक
पदीद्विपदीसाचतुष्पदी॥अष्टापदीनवपदी बभूवुषीसहस्राक्षरापरमेव्योमन्॥इ

म० हेम

१३

पुष्पांजलिं दत्वा यांतुदेवगणाः सर्वेपूजामादायपार्थिवीं इष्टकामप्र
सिध्यर्थंपुनरागमनायचेतिविसर्जयेत् इतिमातृकापूजा नांदी
श्राधं सदूर्वाकुशानक्षतानानीयजलंच प्रदा प्र सत्यवससंज्ञकाविश्वेदे
वाः नांदीमुखाः भूर्भुवःसुवः इदंवःपाद्यंस्वाहाहानमम्यंचवृधिः मातृपि
तामहिप्रपितामह्यः नांदीमुख्यः भूर्भुवःसुवः इदंपाद्यमियंचवृ
धिः पितृपितामहप्रपितामहाः नांदीमुखाः भूर्भुवःसुवः इदंपाद्यमि
यंचवृधिः मातामहमातुःपितामहमातुःप्रपितामहाः पत्नीस
हिताः भूर्भुवःसुवः इदंवःपाद्यमियंचवृधिः सत्यवससंज्ञकाविश्वे
देवाः नांदीमुखाः भूर्भुवःसुवः इदंवः आसनगंधाद्युपचारकल्प
नंस्वाहाहानमइयंचवृधिः मातृपितामहिप्रपितामह्यः नांदीमुख्यः

नांदीमुखाः २

॥राम॥

१३

भूर्भुवःसुवः इदंवः आसनगंधाद्युपचारकल्पनंस्वाहाहानम इयंचवृधिः
पितृपितामहप्रपितामहाः नांदीमुखाः भूर्भुवःसुवः इदंवः आसनगं
धाद्युपचारकल्पनंस्वाहाहानमइयंचवृधिः मातामहमातुःपितामहमा
तुःप्रपितामहाः पत्नीसहिताः नांदीमुखाः भूर्भुवःसुवः इदं० स्वाहाहान
मइयंचवृधिः गौर्यादि षोडशमातरः ब्राह्म्यादीसप्तमातरश्चगणपति
सहिताः भूर्भुवःसुवः इदंवः दास्यमानंयुग्मब्राह्मणभोजनपर्याप्तमन्नंहि
रण्यंवायथाशक्तिस्वाहाहानमइयंचवृधिः सत्यवससंज्ञकाविश्वेदेवाः नांदी
मुखाः भूर्भुवःसुवः इदंवः दास्यमानंयुग्मब्राह्मणभोजनपर्याप्तमन्नंहिरण्यंवा
यथाशक्तिस्वाहाहानमइयंचवृधिः मातृपितामहिप्रपितामह्यः नांदीमुख्यः भू
र्भुवःसुवः इदंवः दास्यमानयुग्मब्राह्मणभोजनपर्याप्तमन्नंहिरण्यंवायथा
शक्तिस्वाहाहानमइयंचवृधिः पितृपितामहप्रपितामहाः नांदीमुखाः भूर्भु

महेश्वरग

वः सुवः इदं वः दास्यमानं युग्मब्राह्मणभोजनपर्याप्तमन्नं हिरण्यं यथाशक्ति स्वाहा
नमः इदं यं च वृद्धिः मातामहमातुःपितामहमातुःप्रपितामह्यः पत्नीसहिताः नां
दीमुखाः भूर्भुवःस्वः इदं वः दास्यमानं युग्मब्राह्मणभोजनपर्याप्तमन्नं हिरण्यं

१४

वा यथाशक्ति स्वाहा नमः इदं यं च वृद्धिः ततः उपास्मै गायता नरः पवमानायें
दवे अभिदेवां इयक्षते अभितेमधुना पयोथर्वाणो अशिश्रयुः देवं
देवाय देवयु सनःपवस्वशंगवेशंजनाय शमर्वते शं राजन्नोषधीभ्यः बभ्रवेनुः
स्वतवसे रुणाय दिविस्पृशे सोमाय गाथमर्चत हस्तच्युतेभिरद्रिभिःसुतंसो ॥राम्॥
मं पुनीतन मधावा धावता मधु कृतस्य नांदीश्राद्धस्य प्रतिष्ठाफलसंसि
ध्यर्थं द्राक्षामलककनिष्क्रयीभूतं यथाशक्ति हिरण्यं वा दक्षिणात्वेन मस्वा

१५

हा न मम इदं यं च वृद्धिः प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परिता बभूव य
त्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणां कृतेन नांदीश्राद्धे

ग

न नांदीमुखदेवताः प्रीयंतां वृद्धिः माता पितामही चैव तथैव प्रपितामही पिता
पितामहश्चैव तथैव प्रपितामहः मातामहस्तत्पिता च प्रमातामहतादयः
एते भवंतु सुप्रीताः प्रयच्छंतु च मे शं इति संप्रार्थ्य इडामग्ने ...न्मस्ति... ...न्कु
...न्नोस्य मग्ने पुरुदंससं सनिं गोः शश्वत्तमं हवमानाय साध स्यांनः सूनु
स्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥ नाणकमादाय पात्रे वादं
येत् ततो निषिध्वादौ रजोदर्शने सति शांतिप्रकरणोक्तरीत्या शांतिकं का
र्यं न ताततोगर्भाधा कर्मणः सांगतासिध्यर्थं ब्राह्मणपूजनं तेभ्यो भूयसीं
दक्षिणादानं दशाधिकान्ब्राह्मणान्यथाशक्ति त्वं यथोपपन्नेन भोज
यिष्य इति संकल्प्य यथाकालं ततः कृतस्य कर्मणः सांगतासिध्यर्थं ब्राह्म
णेभ्यः यथाशक्ति भूयसीं दक्षिणां च दद्यात् प्रमादात्कुर्वतां कर्म प्रच्यवे

नाध्वरेषुयत् स्मरणादेवतद्विस्रोः संपूर्णस्यादितिश्रुतिरिति कर्मसाद्गुण्याय
विष्णुंस्मृत्वाशिष्टैरशिष्टैश्चसहभोजनंकुर्यात् ततोरात्रौकृतावश्यकक्रिय
आचम्यस्वलंकृतांस्वच्छवस्त्रपरिधानांभार्यासम्यगास्तृतपर्यंकेशनार्थमुप

कुर्यात् नवभिर्मंत्रैः विष्णुर्योनिकल्पयतुत्वष्टारूपाणिपिंशतु आसिंचतु
प्रजापतिर्धातागर्भंदधातुते गर्भंधेहिसिनिवालीगर्भंधेहिसरस्वति गर्भं

मेअश्विनावुभाबाधत्तांपुष्करस्रजौ हिरण्ययीअरणियंनिर्मंथतोअश्विना
तंतेगर्भंहवामहेदशमास्यायसूतवे यथाग्निर्गर्भापृथिवीद्यौर्यथेंद्रगर्भि

णी वायुर्यथादिशागर्भएवंगर्भंदधामिते यस्ययोनिंप्रतिरेतोगृहाणपुमान्पु
त्रोजायतांगर्भोअंतः तंमातादशमासोबिभर्तुसजायतांवीरतमस्स्वानां॥
आतेगर्भोयोनिमेतुपुमान्बाणइवेषुधिं अवीरोअत्रजायतांपुत्रस्तेदशमा

स्यः करोमितेप्राजापत्यमागर्भोयोनिमेतुते अन्यूनःपूर्णोजायतामनंधोश्लो
णोपिशाचिधीरः यानिप्रभूणिवीर्याण्यृषभाजनयंतुनः तैस्त्वंगर्भिणीभव
सजायतांवीरतमस्स्वानां योवशायांगर्भोयश्चवेहतीइस्तंनिदधेवनस्पतौ ते
नत्वंगर्भिणीभवसाप्रसूर्धेनुगाभव इतिततःउपयच्छतेसन्नाम्नःसंहृद
योनिसन्नाभिःसंत्वचः संत्वा।कामस्ययोक्त्रेणयुंजान्यविमोचनायेति ततस्तां
पर्यालिंगयति मामनुव्रताभवसहचर्यामयाभव यातेपतिघ्नीतनूर्जारघ्नीं
त्वेताकरोमिशिवात्वंमह्यमेधिक्षुरपविसर्जारिभ्यइति ततोमंत्रत्रयेणरेतोवस्कं
दनंकार्यंभूःप्रजापतिनात्वऋषभेणस्कंदयामिवीरंधत्स्वासौभुवःप्रजापतिना
त्वऋषभेणस्कंदयावीरंधत्स्वासौ सुवःप्रजापतिनात्वऋषभेणस्कंदयामिवी
रंधत्स्वासौ अधिकंचेतितूष्णीमेवावस्कंदयेत् अत्रसर्वत्रमंत्रेआसा
वितिपदंपरित्यज्यसंबुध्यासंस्कार्यायानामग्रह्यंक्षेत्रसंस्कारत्वा त स

कदयंसंस्कारः कार्यः इतिसत्याषाढहिरण्यकेशीस्मार्तप्रयोगरत्नेप्रथमसंस्का
रप्रकरणेवैशंपायनमहेशभट्टकृतौगर्भाधानप्रयोगः अथपुंसवनप्रयोगः त
तीयेमासिशुक्लपक्षेपुनर्वसूपुष्याभिजिद्धस्तप्रोष्ठपदानुराधाश्विनीमूल
श्रवणरेवतीरोहिणीमृगसंज्ञकान्यमतेपुन्नक्षत्रेचंद्रताराद्यनुकूल्येपुंसवनका
र्यं कर्ताकृतनित्यक्रियः प्राङ्मुखउपविश्यस्वदक्षिणतोभार्यांचोपवेश्याचम्यप्राणा
नायम्यदेशकालौसंकीर्त्यममास्यांभार्यायांविद्यमानगर्भस्यपुंस्त्वप्रतिपादन
द्वाराबीजगर्भसमुद्भवैनोनिबर्हणद्वाराक्षेत्रसंस्कारद्वाराश्रीपरमेश्वरप्रीत्यर्थं
पुंसवनाख्यंकर्मकरिष्ये तदंगंगणेशपूजनंपुण्याहवाचनंमातृकापूजनं
नांदीश्राद्धंचकरिष्ये इतिसंकल्प्य गर्भाधानोक्तरीत्या ४ ५ कुर्यात् त
तःपुंसवनांगत्वेनो [illegible] धेन नादिसर्वकर्मकरिष्ये इतिसंकल्प्यशर्करास्थ्या

राम॥
१६

द्दिहितंसिकताप्रस्थपंचकनिर्मितंहस्तमात्रायतंचतुरंगुलोच्छ्रायसच्चतुरस्र
स्रप्रागुदक्प्रवणंसमंवासमंस्थंडिलंहस्तमात्रंबाहुमात्रंवाविरच्यात्रिमा धा
दायतूष्णीमु [illegible] ल्लसमं चंवाचारात् उद्धन्यमानमस्याअमेध्यं अपपाप्मा
नंयजमानस्यहंतु शिवानःसंतुप्रदीशश्चतस्रः शन्नोमातापृथिवीनोकसात॥
इतिप्रागादिक्रमेणोद्धस्ततःप्राचीस्तिस्रउदीच्यस्तिस्रोरेखाःकृत्वा शन्नो
देवीरभिष्टये आपोभवंतुपीतये शंयोरभिस्रवंतुनः इतिप्रु [illegible] क्षेनपाणि
नाचारादवोक्ष्य ततःप्रागारभ्येंद्राद्यष्टौलोकपालानावाहयति इंद्रा
यनमः अग्नयेनमः यमायनमः निर्ऋतयेनमः वरुणायनमः वायवेनमः
सोमायनमः ईशानायनमः मध्येवैश्वानरस्यरूपं पृथिव्यांपरिस्रसा॥
स्योनमाविशंतुनः भूर्भुवःसुवरोंपवमानमग्निंप्रतिष्ठापयामिप्रतिष्ठाप्य॥

२

महे० द्वी० प्रज्वाल्यसमित्त्रयमादाय आचारात् श्रध्वएहिससेन वाङ्मया मिर
तित्रिरुच्चार्य याः पुरस्ताप्रस्रवंत्सुपरिशाह्वर्वतश्चया: ताभीरग्निमयविद्या
भिश्रध्वायज्ञमारभे आकूतैत्वाकामायत्वासुम धेत्वापुरोदधे अमृतत्वा
यज्जीवसे आकूतिमस्यावसेकाममस्यसमध्ये इं इस्ययुंजतेधियः आ
७ स्य कूर्तिदेवींमनसःपुरोदधेयज्ञमातासुहवामि अस्तु यदिच्छामिनसासकामो म९
विदेयमेनहृदयेनिविष्टं इतिहृदयमालभ्यापस्स्पृष्ट्वाप्राणा नायम्यपुंस राम्॥
वनहोमकर्मणियक्ष्यमाणादेवतास्तासवाःपरिग्रहीष्यामि जातवेदसम ७
घा ग्निमिध्मेनयक्ष्ये आरहोमे प्रजातिमनुमिइंचाज्येनय आज्यभागहो
मे अग्निंसोमंचाज्येन सामान्यप्रधानाज्यहोमे अग्निंजातवेदसंसंराधनींसंराधनिंदेवींप्रसाधनींदेवींव्याहृतीनामग्निंवायुंसूर्यप्रजापतिंचाज्येन॥

जयहोमे चित्तंचित्तिं आकूतं आकूतिंविज्ञातंविज्ञानंमनःशक्करीःदर्शपूर्णमा
संबृहद्रथंतरंप्रजातिंचाज्येन अभ्यातानहोमे अग्निंभूतानामधिपतिंइंद्रं
ज्येष्ठा नामधिपतिं यमंपृथिव्याधिपतिं० वायुमंतरिक्षस्याधिपतिं० सूर्यंदि
वोधिपतिंचंद्रमसंनक्षत्राणामधिपतिं बृहस्पतिंब्रह्मणोधिपतिं० मित्रंस
त्यानामधिपतिं वरुणंअपामधिपतिं समुद्रंस्त्रोत्यानामधिपति अन्नंसा
म्राराज्यानामधिपति सोमओषधीनामधि॰ सवितारंप्रस वानामधि पतिं
पतिं रुद्रंपशूनामधिपतिं उदकस्पर्शः त्वष्टारंरूपाणामधिपतिंविष्णुंपर्वताना
मधिपतिं मरुतोगणा नामधिपतीन॰ पितृपितामहान्परान्वरानाज्ये प्राचीना०
यक्ष्ये॰ उदकस्पर्शः राष्ट्रभृद्धोमे अग्निंगंधर्वंओषधीरप्सरसः सूर्यंगंधर्वं
मरीचीरप्सरसः चंद्रमसं गंधर्वंनक्षत्राण्याप्सरसः यज्ञंगंध
र्वंदक्षिणा प्सरसः मनोगंधर्वंऋक्सामान्यप्सरसः वातंगंधर्वंअपोप्स
यज्ञोपवीति

रसः भुवनस्यपतिंमृत्सुगंधर्वंविश्वुतेप्सरसः अमृदयमृत्सुंगधर्वंप्रजाअ
प्सरसः कामगंधर्वआधीरप्स रसः प्रपर्जन्यंगधर्वंविधुतोप्सरसः अ
सनो॥ भुवनस्यपतिंचाज्येन स्विष्टकृध्दोमे अग्निं स्विष्टकृतमाज्येन प्रा
यश्चित्तहोमे अग्निंत्रिः अग्नीवरुणोद्विः इंद्रंद्विः त्र्यंबकं विष्णु अग्निं वा
युं सूर्यंबृहस्पतिं वरुणंइंद्रं विश्वान्देवान्‌चाज्येन सं स्रावहोमे॥

वसूरुद्रानादित्यान्सं स्त्रावेणाज्येनक्ष्ये इत्यक्त्वाभूर्भुवःसुवः स्वाहेत्य
क्त्वासमिधोग्नावादधाति प्रजापतयइदंनमम एषहिदेवःप्रदिशोनुसर्वाः ॥राम्॥
पुर्वोहिजातःसउगर्भे अंतः सविजायमानःसजनिष्यमाणः प्रत्यङ्मुखा
स्तिष्ठतिविश्वतोमुखः मुखइत्यग्निमाचारात्संमुखीकृत्य ततः य था
हतद्वसवोगौर्यंचित्पदिषितामर्मुंचतायजत्राः एवात्वमस्मत्प्रमुंचाव्यंहः

प्रातार्यग्नेप्रतरान्न आयुः इतिहस्तेनेशानीमारभ्यसर्वतःपरिषिंचतिपरिस्तर्वे
ध्यइत्याचारात्‌ ततःप्रागादिक्रमेणसर्वतःप्रागग्रैर्दर्भैरग्निंपरिस्तीर्य अथवा
प्राक्पश्चात्‌उदगग्रान्दक्षिणतः उत्तरश्च प्रागग्रान्दक्षिणानुत्तरानुत्तरान
धरांश्चकृत्वाग्निंपरिस्तीर्यदक्षिणतोब्रह्मायतनेकुशानास्तीर्य मयिगृ
ह्णाम्यग्रे अग्निं रायस्पोषायसुप्रजास्त्वायसुवीर्याय मयिप्रजांमयिवर्चोवे
दधाम्यरिष्टास्यामतन्वासुवीराः योनो अग्निःपितरोहृत्स्वंतरमर्त्योमर्त्यां
आविवेश तमात्मन्परिगृह्णीमहेवयंमासो अस्मां अवहायपरागात्॥
इतिसकुशंदक्षिणहस्तंहृदिकृत्वात्मायमग्निमात्मनिध्यायेत्‌ ततउत्तरेणा
ग्निंदर्भानास्तीर्यपात्रासादनंकार्यं अत्रस्थालीपाकसमावर्तनादिदेव
मानुषपित्र्यसर्वस्मार्तकर्मसुसकृद्देवपात्राण्यासादयेत्‌ द्वंद्वसहएकैकमी
लितदैवमानुषपित्र्यदेवभेदेनविदधीरे तत्तुःश्रौतविषयमेसर्वस्मार्तेचस

महेशभट्टीप्र कृदेवसवाणीति एवकारसर्वशब्दयोर्विधानात्सवाणीतियथासंभवंवाउद
कुसंस्थान्यासादयति दर्वीकूर्चमास्थालींप्रणीतापात्रंप्रोक्षणीपात्रंआ
ज्यंबर्हिःइध्मउपवेषंसंमार्गदर्भाइत्तिसाधारणानि यवसर्षपगोदधिवटा
कुररसादीनिप्रकृतोपयोगीनीचासाद्य ईशान्यांप्रवरगोत्रनामोपेतं

१९

यजुर्वेदस्यतैत्तिरियशाखांतर्गतहिरण्यकेशीशाखाध्यायिनं अमुकशर्माणं

अमुकर्मणिब्रह्माणंत्वामहंवृणेइतिवृणुयात् वृतोसीत्युक्तावम्यउत्तरे

।।राम

णपात्राणि अपरेणाग्निंदक्षिणातिक्रम्यब्रह्मसदनात्तृणं निरस्याअप
उपस्पृश्याग्निमभिमुखउपविशति ब्रह्मालाभेकूर्चंयज्ञोपवीतंदंडंकमं

१९

डलुंचास्थापयेत् द्वौदर्भौसमौसाग्रौअंतर्गर्भरहितौप्रादेशपरिमितौ
पवित्रेकृत्वानखानस्पृशन्छित्वाप्रणीतापात्रंत्रिःप्रक्षाल्यप्रागग्रपवि

त्रांतर्हितमद्भिःपूरयित्वापवित्रमुदगग्रंकरयोरंगुष्ठोपकनिष्ठिकाभ्यांध
त्वात्रिरुत्पुयदक्षिणोत्तराभ्यांपा णिभ्यांसमंप्राणेधृत्वाभिषिंचन् अग्नेर्द
क्षिणतोहृत्वोत्तरेणाग्निदर्भेषुनिधायदर्भैरपिधाय पवित्रेप्रोक्षणीपात्रे
उदगग्रेन्यस्याद्भिरापूर्य पूर्ववत्त्रिरुत्पूयपात्राण्युत्ता।नानिकृत्वाइध्मंवि
स्रस्यप्रोक्षत्स्वंत्रिःसर्वाभिःप्रोक्षति ततोदर्वीमाग्नेनानिष्टप्यसंमार्गदर्भा
नादायदर्वींप्राचीमग्रैरंतरतोभ्याकारंप्रतीचीमध्येर्बाह्यतोमूलैर्दंडंसं
मृज्यपुनर्निष्टप्यबर्हिषिनिधायसमार्गानिक्ष्युक्ष्या अग्नावाद्धा याज्य
विलाप्यपवित्रांतर्हितायामाज्यस्थाल्यामाज्यंनिरूप्योपवेषेणाग्न्यायतने
उत्तरतोंगारान्कृत्वातेष्वधिश्रित्यदर्भैर्ज्वलितैरदर्भाग्रद्वयंसज्वलंन्यस्य
प्रज्वालितैर्दर्भैस्त्रिःपर्यग्निकृत्वा उत्तरतउद्वास्यांगारानपोह्यापरेणाग्निं
बर्हिरास्तीर्यातत्राज्यंनिधायाज्यंत्रिरुत्पूयपश्चिमा दारभ्यप्राङ्नीत्वो

सूर्यनिमंत्र्यपश्चादानीयेवंत्रिःपर्यग्निकृत्वापवित्रेप्रोक्ष्याग्नावाधाय
परिधिमपरेणाग्निंचतुस्त्रिंशदंगुलमुदगग्रं दक्षिणानाग्निमष्टात्रिंश
दंगुलंप्रागग्रं उत्तरेणाग्निंषट्त्रिंशदंगुलंप्रागग्रं परिस्तरणोपरि॥
परिस्तरणवत्परिदधातिइतिपरिधिपरिधानांतंकृत्वा यजमानोभार्यावा

रक्षःसत्परिषिंचति अदितेनुमन्यस्व अनुमतेनुमन्यस्व दक्षिणतःप्रा
क्संस्थं पश्चादुदक्संस्थं सरस्वतेनुमन्यस्व उत्तरतःप्राक्संस्थं देवसवि
तुःप्रसुवेतिईशान्यांदीशान्यंतंसर्वतश्चपरिषिंचति ततोदर्व्यान्यमादायेध्म
मभिघार्य अयंतइध्म आत्माजातवेदस्तेनेध्यस्ववर्धस्वचेंधिवर्धय राम्॥
चास्मान्प्रजयापशुभिर्ब्रह्मवर्चसेनान्नाद्येनसमधयस्वाहा जातवेद

सेग्नयइदनमम इस्तेनेध्मंजुहोति उत्तरंपरि धिसंधिमभिलक्ष्यप्रा

क्दक्षिणापवर्गसंततमग्न्यायतनेदर्व्याजुहोति प्रजापतयेमनवेस्वाहेति
मनसामंत्रमुच्चारयन् प्रजापतयेमनवइदं दक्षिणंपरिधिसंधिमनुलक्ष्य
इंद्रा प्रागुदगपवर्गसंततमग्न्यायतनेइंद्रायस्वाहेतिपठन्जुहोति इंद्रायेदं इत्याघा
रौहुत्वा ततः अग्नेरुत्तरपूर्वार्धेअग्नयेस्वाहा अग्नयइदं दक्षिणा
र्धपूर्वार्धेसोमायस्वाहा सोमायेदं इत्याज्यभागौहुत्वा ततःआज्यभा
गयोर्मध्येवक्ष्यमाणाआहुतीर्जुहोति अथसामान्यप्रधानहोमः युक्तो
वहजातवेदःपुरस्तादग्नेविधिकर्मक्रियमाणंयथेदं त्वंभिषक्भेषजस्या
सिकर्तात्वयागाश्वान्पुरुषान्सनेमस्वाहा जातवेदसेग्नयइदनम याति
रश्चीनिपद्यसेहंविधरणीइति तांत्वाघृतस्यधारयाग्नौसंराधनीय
यजेस्वाहा संराधन्याइदं संराधन्यैदेव्यैस्वाहा संराधन्यैदेव्याइदं०

म० प्रयो
२९

प्रसाधन्यैदेव्यैस्वाहा प्रसाधन्यैदेव्याइदं भूःस्वाहा [illegible] अग्नय
यइदं भुवःस्वाहा वायवइदं सुवस्वाहा सूर्यायेदं भूर्भुवःसुवःस्वाहा
प्रजापतयइदं इतिआघारवतीदर्वीहोमेसामान्यप्रधानहोमः अथ
प्रधानहोमः धातादददातुनोरयिमीशानोजगतस्पतिः सनःपूर्णेनवाव
नत्स्वाहा धात्रइदं धाताप्रजायाउतरायईशे धातेदंविश्वंभुवनंज
जान धातापुत्रयजमानायदाता तस्माउहव्यंघृतवद्विधेमस्वाहा धा
त्रइदं धातादददातुनोरयिंप्राचींजीवातुमक्षितां वयंदेवस्यधीमहि
सुमतिꣳसत्यराधसःस्वाहा धात्रइदं धाताददातुदाशुषेवसुनिप्रजा
कामायमीढुषेदुरोणे तस्मैदेवाअमृताःसंव्ययंताविश्वेदेवासोअदि
तिःसजोषास्वाहा धात्रइदं अथांगहोमः इमंमेवरुणश्रुधीहवमद्या
चमृडय त्वामवस्युराचकेस्वाहा वरुणायेदं तत्त्वायामिब्रह्मणा

॥राम
२१

वंदमानस्तदाशास्तेयजमानोहविर्भिः अहेडमानोवरुणइहबोध्युरुशꣳस
मानआयुःप्रमोषीःस्वाहा वरुणायेदं त्वन्नोअग्नेवरुणस्यविद्वान्देवस्य
हेडोवयासिसीष्ठाः यजिष्ठोवह्नितमःशोशुचानोविश्वाद्वेषांसिप्रमुमुग्ध्यस्म
त्स्वाहा अग्नीवरुणाभ्यामिदं सत्वन्नोअग्नेवमोभवोतीनेदिष्ठोअस्या
उषसोव्युष्टौ अवयक्ष्वनोवरुणꣳरराणोवीहिमृडीकꣳसुहवोनएधिःस्वाहा
अग्नीवरुणाभ्यामिदं त्वमग्नेअयास्ययासन्मनसाहितः अयासन्हव्य
मूहिषेयानोधेहिभेषजꣳस्वाहा अयसअग्नयइदं प्रजापतेनत्वदेतान्यन्यो
वि[illegible]श्वाजातानिपरितानिपरिताबभूव यत्कामास्तेजुहुमस्त
न्नोअस्तुवयꣳस्यामपतयोरयीणांꣳस्वाहा प्रजापतयइदं अथजया
द्युपहोमः चित्तंचःस्वाहा चित्तायेदं चित्तिःचस्वाहा चित्तयइदं आ
कूतंचःस्वाहा आकूतायेदं आकूतिःचस्वास्वाहा आकूत्याइदं०

म० हे० प्रयो विज्ञातंचस्वाहा विज्ञातायेदं विज्ञानंचस्वाहा विज्ञानायेदं मनश्चस्वा
हा मनसइदं शक्करीश्चस्वाहा शक्करीभ्यइदं दशाश्चस्वाहा दशाये
दं० पूर्णमासश्चस्वाहा पूर्णमासायेदं बृहच्चस्वाहा बृहतइदं रथंतरं
२२
चस्वाहा रथंतरायेदं प्रजापतिर्जयानिंद्रायवृष्णेप्रायच्छदुग्रः पृतना
ज्येषुतस्मैविशः समनमंतसर्वासउग्रः सहिहव्यो बभूवस्वाहा प्रजापतयइदं०
इतिजयहोमः अभ्यातानहोमः अग्निर्भूतानामधिपतिःसमावत्वस्मिन्ब्रह्म
न्नस्मिन्क्षत्रेस्यामाशिष्यस्यांपुरोधायामस्मिन्कर्मन्नस्यांदेवहूत्याँ स्वाहा अ ॥म॥
ना० ग्नयेभूतानामधिपतयइदं इंद्रोज्येष्ठानामधिपतिःसमावत्वस्मिन्० इंद्रायज्येष्ठा
नामधिपतयइदं× वायुरंतरिक्षस्याधिपतिःसमावत्वस्मिन्० वायवेंतरिक्षस्या २२
धिपतयइदं× यमःपृथिव्याधिपतिःसमावत्वस्मिन्० यमायपृथिव्याधिपत
इदं० वायुरंतरिक्षस्याधिपतिःसमावत्वस्मिन्० वायवेंतरिक्षस्याधिपतयइदं०

सूर्योदिवोधिपतिःसमावत्वस्मिन्० सूर्यायदिवोधिपतयइदं चंद्रमानक्षत्राणाम
धिपतिःसमावत्वस्मिन्० चंद्रमसेनक्षत्राणामधिपतयइदं बृहस्पतिर्ब्रह्मणोधि
पतिःसमावत्वस्मिन्० बृहस्पतयेब्रह्मणोधिप तयइदं मित्रःसत्यानामधिपतिः
समावत्वस्मिन्० मित्रायसत्यानामधिपतयइदं वरुणोपामधिपतिसमावत्वस्मि प
न्० वरुणायअपामधिपतयइदं समुद्रःस्रोत्यानामधिपतिःसमावत्वस्मिन्०
समुद्रायस्रोत्यानामधिपतयइदं अन्नंसाम्राज्यानामधिपतिःसमावत्वस्मि
न्० अन्नायसाम्राज्यानामधिपतिनइदं सोमओषधीनामधिपतिःसमावत्व म
स्मिन्० सोमायओषधीनामधिपतयइदं सविताप्रसवानामधिपतिः
समावत्वस्मिन्० सवित्रेप्रसवानामधिपतयइदं रुद्रःपशूनामधिपतिःस
मावत्वस्मिन्० रुद्रायपशूनामधिपतयइदं उदकस्पर्शः त्वष्टारूपाणामधि
पतिःसमावत्वस्मिन्० त्वष्ट्रेरूपाणामधिपतयइदं विष्णुःपर्वतानामधिपतिःस

म० प्र
२३

मावत्वस्मिन्० विष्णवेपर्वतानामधिपतयइदं मरुतोगणानामधिपतयस्तेमावन्त्व
स्मिन्० मरुद्भ्योगणानामधिपतिभ्यइदं प्राचीनावीतीपितॄनुपतिष्ठते॥ जुहो
तिवा पितरःपितामहाःपरेवरेततास्ततामहाइहमावत अस्मिन्ब्रह्मन्नस्मि
न्क्षत्रेस्यामाशिष्यस्यांपुरोधायामस्मिंकर्मन्नस्यांदेवहूत्यां स्वाहा पितृभ्यः
पितामहेभ्यःपरेभ्योवरेभ्यइदं उदकस्पर्शः अथराष्ट्रभृतां त्रिविधोराष्ट्र
भृतांमंत्राणांविभागः ऋताषाडितियथापाठमारभ्यतस्मैस्वाहेत्यंताष्ट
वाहुतिः ताभ्यःस्वाहेत्यंतावापराहुतिरित्येकःपक्षः ऋताषाड्ऋतधामा॥राम्॥
ग्निर्गंधर्वःसइदंब्रह्मक्षत्रंपातुतस्मैस्वाहा तस्यौषधयोप्सरसऊर्जोनाम।
ताइदंब्रह्मक्षत्रंपातुताभ्यःस्वाहेत्येवं अपरः ऋताषाडितियथापाठंपठि
त्वाताभ्यःस्वाहेत्यंतकापूर्वाहुतिः पुनर्यथापाठंपठित्वातस्मैस्वाहेत्यंतकाउत्त

त२

स

राहुतिः॥एवंतृतीय॥अत्रपक्षत्रयेपिदशभिःपर्यायैर्विंशतिमंत्राः॥स
मोत्तमौएकैकाहुतिकोइतिद्वाविंशतिमंत्राः॥ऋताषाड्ऋतधामाग्निर्गं
धर्वस्तस्यौषधयोप्सरसऊर्जोनामइदंब्रह्मक्षत्रंपातुताइदंब्रह्मक्षत्रंपातुतं
तस्मैस्वाहा॥अग्नयेगंधर्वायेदं० ऋताषाड्ऋतधामाग्निः० ताभ्यःस्वाहा०
ओषधीभ्योप्सरोभ्यइदं० संहितोविश्वसामासूर्योगंधर्वस्तस्यमरी
चयोप्सरसआयुवोनामसइदंब्रह्मक्षत्रंपातुताइदंब्रह्मक्षत्रंपांतु
तस्मैस्वाहा० सूर्यायगंधर्वायदं० संहितोविश्वसामा० ताभ्यस्वाहा०
मरीचीभ्योप्सरोभ्यइदं० सुषुम्नःसूर्यरश्मिश्चंद्रमागंधर्वस्तस्यनक्षत्रा
ण्यप्सरसोबेकुरयोनामसइदंब्रह्मक्षत्रंपातुताइदंब्रह्मक्षत्रंपातुतस्मै

हा॰ चंद्रमसेगंधर्वायेदंनम॰ सुषुम्नः सूर्यरश्मिः॰ ताभ्यस्वाहा॰ नक्षत्रेभ्यो
प्सरोभ्यइदं॰ भुज्युः सुपर्णोयज्ञोगंधर्वस्तस्यदक्षिणा अप्सरसस्तवानाम
सइदंब्रह्मक्षत्रंपातुताइदंब्रह्मक्षत्रंपातुतस्मैस्वाहा॰॥ यज्ञायगंधर्वाये
दं॰ भुज्युः सुपर्णोयज्ञोगंधर्वः॰॥ ताभ्यस्वाहा॰॥ दक्षिणाभ्योप्सरोभ्यइ
दं॰ प्रजापतिर्विश्वकर्मामनोगंधर्वस्यऋक्सामान्यप्सरोवह्नयो [illegible]
[illegible] नामसइदंब्रह्मक्षत्रंपातुताइदंब्रह्मक्षत्रंपातुतस्मैस्वा
हा॰॥ मनसेगंधर्वायेदं॰ प्रजापतिर्विश्वकर्मा॰ ताभ्यःस्वाहा॥ ऋक्सा
मेभ्योप्सरोभ्यइदं॰॥ इषिरोविश्वव्यचावातोगंधर्वस्तस्यापोप्सरसो
मुदानामसइदंब्रह्मक्षत्रंपातुताइदंब्रह्मक्षत्रंपातुतस्मैस्वाहा॰॥

वातागंधर्वायेदं॰ इषिरोविश्वव्यचावातो॰॥ ताभ्यःस्वाहा॰॥ अद्भ्योप्सरो
भ्यइदं॰॥ भुवनस्यपतेयस्यतउपरिगृहाइह च॥ स नोरास्वाज्यानिं रायस्पोषं सुवीर्यं संवत्सरीणां स्वस्तिं स्वाहा॥ भुवनस्यपतयइदं॰॥
परमेष्ठ्यधिपतिर्मृत्युर्गंधर्वस्तस्यविश्वमप्सरसोभुवोनामसइदंब्रह्मक्ष
त्रंपातुताइदंब्रह्मक्षत्रंपातुतस्मैस्वाहा॰॥ मृत्यवगंधर्वायेदं॰ परमेष्ठ्य
धिपतिर्मृ॰ ताभ्यस्वाहा॰॥ विश्वस्मा अप्सरोभ्यइदं॰॥ सुक्षितिःसुभूति
र्भद्रकृत्स्वर्वान्पर्जन्योगंधर्वस्तस्यविद्युतोप्सरसोरुचोनामसइदंब्रह्मक्षत्रं
पातुताइदंब्रह्मक्षत्रंपातुतस्मैस्वाहा॰॥ पर्जन्यायगंधर्वायेदं॰ सुक्षितिःसुभूतिः॰
ताभ्यःस्वाहा॰॥ विद्युभ्योप्सरोभ्यइदं॰ दूरेहेतिरमृडयोमृत्युर्गंधर्वस्तस्यप्रजा

महे० प्र

अप्सरसोभिरुवोनामसइदं ब्रह्मक्षत्रंपातुताइदंब्रह्मक्षत्रंपांतुतस्मैस्वाहा॥
अप्सरस्तोयायमतस्रवेगं धर्वायेदं ०॥ दूरेहेतिरमृयो ० ताभ्यः स्वाहा ॥ प्रजा
भ्योप्सरोभ्योइदं ० चारुः कृपणकाशिकामोगधर्वस्तस्या[illegible] धयो
प्सरसःशोचयंतीनांमसइदंब्रह्मक्षत्रंपातुताइदंब्रह्मक्षत्रंपांतुतस्मैस्वा

२७

हा॥ कामयगं धर्वायेदं ० चारुः कृपणकाशी ० ताभ्यःस्वाहा ० आधीभ्योप्स
रोभ्यइदं ० सनोभुवनस्यपतेयस्यतउपरिगृहाइहच॥ उरुब्रह्मणेस्मैक्षत्रा

२७

यमहिशर्मयछस्वाहा॥ सनोभुवनस्यपतइदं ०॥ इत्युपहोमाः॥ यदस्यक
र्मणोत्यरीरिचंयद्वान्यूनमीहाकरं॥ अग्निष्टत्स्विष्टकृद्विद्वान्सर्वं स्विष्टं
सुहुतंकरोतुते॥ अग्नयेस्विष्टकृतेसुहुतहुतेसर्व हुत आहु आहुती

६

अग्नयइदं ० यसाकृत्वामनसादीनदक्षा नयज्ञस्यमन्वतेमर्तासः॥ अग्निष्ट्
धोताक्रतुविद्विजानन्यजिष्ठोदेवा ऋतुशोयजातिस्वाहा० अग्नयइदं० त्व
न्नो अग्नेवरुणस्यविद्वान्देवस्यहेडोवयासिसीष्ठाः यजिष्ठोवह्नितमःशो
शुचानोविश्वाद्वेषां सिप्रमुमुग्ध्यस्मत्स्वाहा० अग्नीवरुणाभ्यामिदं०
सत्वन्नो अग्नेवमोभवोतिनेदिष्ठो अस्याउषसोव्युष्टौ अवयक्ष्वनोवरु
णं रराणोवीहिमृडीकं सुहवोन एधिस्वाहा॥ अग्नीवरुणाभ्यामि
दं० यतइंद्रभयामहेततोनोअभयंकृधि मघवन्छग्धितवतन्नऊ
तयेविद्विषोविमृधोजहिस्वाहा० इंद्रायेदं स्वस्तिदाविशस्पतिर्वि
त्रहाविमृधोवशी० वृषेंद्रः पुरएतुनःस्वस्तिदा अभयंकरःस्वाहा०
अभयंकरायेदं० त्र्यंबकंयजामहेसुगंधिंपुष्टिवर्धनं उर्वारुकमि

म२हे० ० २६० प्रयो० बृबंधनान्मृत्योर्मुक्षीयमामृतात्स्वाहा० त्र्यंबकायेदं० इदंविष्णुर्विचक्र
मेत्रेधानिदधेपदं० समूढमस्यपा॑ंसुरेस्वाहा० विष्णवइदं० भूःस्वाहा
अग्नयइदं० भुवःस्वाहा० वायवइदं० सुवःस्वाहा० सूर्यायेदं० महःस्वा
हा० बृहस्पतयइदं० जनःस्वाहा० वरुणायेदं० तपस्वाहा० इंद्रायेदं०
सत्यं॑स्वाहा० विश्वेभ्योदेवेभ्यइदं० वसुभ्योरुद्रेभ्यआदित्येभ्यस्वाहा०
वसुभ्योरुद्रेभ्यआदित्येभ्यःस॑ंस्त्रावभागेभ्यइदं० ततःउत्तरपरिषेकः०
अदितेन्वम॑ंस्थाः० अनुमतेन्वम॑ंस्थाः० सरस्वतेन्वम॑ंस्थाः० देवस
वितःप्रासावीः॥ इतिपूर्ववत्परिषेकेणविसर्गंकृत्वा० यथेतंप्रणीताप्र
त्याहृत्यापरेणाग्निंनिधाय० प्रारभ्यदिक्चतुष्टयेऊर्ध्वमधश्चजला
मासिच्यभूमौनिनीयात्मानं मार्जयित्वामुखंसंमृज्य० यथाश्रद्धंब्र

राम २६

ह्मणेदक्षिणांदद्यात्० इदंपूर्णपात्रंतत्प्रतिनिधिभूतंयथाशक्तिहिरण्यं
ब्राह्मणेसंप्रददइत्युक्त्वा० नममेतिवरदेवब्रह्मास्वस्तीत्युक्त्वायथोक्तंप्र
नि तिक्रामति० ततःसंस्थाजपेनोपतिष्ठते यज्ञनमस्तेयज्ञ नमोनमश्च
तेयज्ञ शिवेनमेसंतिष्ठस्व स्योनेनमेसंतिष्ठस्व सुभूतेनमेसंतिष्ठ
स्व ब्रह्मवर्चसेनमेसंतिष्ठस्व यज्ञस्यर्धिमनुसंतिष्ठस्व उपतेयज्ञन
मः उपतेनमः उपतेनमः इदमिध्मसन्नहनप्रहरणादिकं आघा
रवतीदर्विहोमेगृह्यांतरदृष्टत्वनवृत्तिकृदुक्तेः शिष्टपरिगृहीताच्चद्र
ष्टव्यं यदुक्तमेवस्वगृह्योक्तंकर्तव्यमितिवादंकेचिन्नेच्छंति अथत्रि
वृदन्नहोमः यत्रहोमेब्राह्मणभोजनंचोक्तंत्रिवृदन्नहोमःकार्यः एतेन
उत्सर्जनेत्रिवृदन्नहोमोनास्तिइतिभ्रांतप्रलपितंनिरस्तं वक्ष्यतेचोत्स

तत्रैव २

र्मनग्रंथयोगेनात्रावदान धर्मः आहुतिपरिमाणश्चैवधोभवति याव
दुक्तैवक्रियभवति त्रिवदन्न होमस्यापूर्वीकृत्वा ब्रह्मणभोजनार्थंनि
ष्पन्नाद्धोमः होमशेषादिनासंतुष्टान्पुण्याहं वाचयेत्॥ ओदनापूप
सक्तूनामेकीकृतानां दर्व्यासकृदेवदायहोमः अत्र ओदनादिपृथक्
निर्देशः स्वरूप ज्ञानार्थः मध्येत्रिवच्छेब्देननिर्देशो लाघवार्थः अंते
उत्सर्जनसूत्रे अपूपैःसक्तुभिरोदनेन्व क्रमेणनिर्दे[illegible]शास्त्वन्यदेय क्रमबा
धार्थः॥ तेनकथमपिद्रव्यत्रयमेकीकृत्यहोतव्यं अन्यथा ओदनादि
क्रमेणादायाहोतव्यंइतिस्यात न न्येषु प्रयोगः कर्तामुककर्मांगंत्रि
वदन्नहोमंकरिष्ये इतिसंकल्प्य परिसमूह्य परिस्तीर्य उत्तरेणाग्निं
कुशानास्तीर्यतत्रपात्राणिसादयति प्रोक्षणीं पवित्रेदर्वीं घृ

तंत्रिवदन्नंउद्धरणपात्रमष्टसमित्कं इध्मंमेक्षणंकुशाश्चासाद्यप्रोक्ष
णीःसंस्कृत्यपात्राणिप्रोक्ष्यदर्वीं निष्टप्यापरेणाग्निंनिधाय ओदना
पूपसक्तवइतित्रिवदन्नं बर्हिर्निष्पन्नत्वादग्नावधिश्रित्योदगुद्वास्या
वोक्ष्याभिघार्येति देवसवित्रसंस्कारसंस्कृतंकृत्वा अग्नेःपश्चान्निधा
यपरिषीच्यतूष्णीमष्टौसमिधोग्नावाधायत्रिवदन्न[illegible]मेकीकृतंद
दर्व्यासकृत्सकृदेवदायजुहोति अग्नयेस्वाहा अग्नयइदं० सो
मायस्वाहा० सोमायइदं० अग्नयेन्नादायस्वाहा० अग्नयेन्नपत
यइदं० प्रजापतयेस्वाहा० प्रजापतयइदं० विश्वेभ्योदेवेभ्यस्वाहा० वि
श्वेभ्योदेवेभ्यइदं० सर्वाभ्योदेवताभ्यःस्वाहा० सर्वाभ्योदेवताभ्य
इदं० अग्नयेस्विष्टकृतेभ्यस्वाहा० अग्नयेस्विष्टकृतइदं० ततोग्ने
अग्नयेन्नपयेस्वाहा॥४

अग्नयेन्नादा
यइदं४

रुत्तरतः कुशानास्तीर्यमतूष्णीमुदकमासिच्यहुतः शेषमन्नंकिंचिद्धुते
नादाय बलिंकरोति वास्तुपतयेस्वाहा वास्तुपतयइदं० संके
दंतंपरिषिच्य ततोन्यूनातिरिक्तदोषपरिहारार्थो व्याहृतिहो
मंकरिष्यइतिसंकल्प्य० भूर्भुवःस्वःस्वाहा प्रजापतयइदं ततो अ
दितेन्वमंस्थाइत्याद्युत्तरपरिषेकेन विसर्गकरणं त्रिवदन्त
शेषादिनाब्राह्मणान्संतोष्यतान्पुण्याहंवाचयेत मद्यममुककर्मका
रिणेपुण्याहंभवंतोब्रुवंतु० एवंस्वस्तिऋधिमित्यादि ॐपुण्याहंइत्या
दियथायोगंब्राह्मणान्वदेयुरित्यादि इतित्रिवदन्नहोमः ततोयज
मानः अपरेणाग्निंबध्भुभ्रवर्तुळविनानस्याधोदेशेभार्यांप्राङ्मु
खीमुपविश्यतस्यादक्षिणेहस्तेयवंनिदधाति वृषासीतिआंडौ

स्थइतिसकृदुक्तेनमंत्रेणाभितोद्वौसर्षपौसंस्थाप्यव्यावृत्तदितितदुपरिगा
वद्धिनिधायतूष्णीमाशयित्वाकृतशुद्धाचमनायास्तस्याउदरं हस्ताभ्या
मभिमृशति अभिष्टुहंद्रगभिरभिमृशामिदशमास्यायसूतवेइति॥
अत्रन्यूनांगुलेस्त्कर्तुर्दशमीरितिपदंलुप्यते स्मार्तग्न्युपस्थानेगार्हप
सपदलोपवत् ततोवटांकुरमपीडयरसंनिःक्षारियसंमिश्रकलाकं
तस्वारुमूलोपधानायास्तस्या दक्षिणेनासपुटेतूष्णीसेचयेत॥ ततो
विभूतिधृत्वाततः कृतस्यकर्मणः सांगतासिध्यर्थंगंधतांबूलादिभिः
ब्राह्मणभोजनेन नानामगोत्रेभ्यो ब्राह्मणेभ्योभूयसीं दक्षिणादानंच
करिष्येइतिसंकल्प्यब्राह्मणानांगंधादिनासंपूज्य दक्षिणांदत्वाप्रमा
दात्कुर्वतांकर्मेतिकर्मसाद्गुण्यायविष्णूंस्मरेत ततोब्राह्मणेभ्योमंत्रो

कृताशिषो ब्राह्मणाः आशिषमेवैतामाशास्त इत्यादयः ततो ब्राह्मणा
न्नमस्कृत्य शिष्टैरिष्टैः सह भोजनं कुर्यात् इति सत्याषाढहिरण्यकेशीसूत्रा
र्तप्रयोगरत्ने प्रथमसंस्कारप्रकरणे वैशंपायनमहेशभट्टकृतौ पुंसवनप्रयोगः
॥ अथ गर्भस्यावेस्तंभनविधिः आर्द्रेण पाणिना नाभेरूर्ध्वं मंत्रावृत्त्या त्रिरु
न्मार्ष्टि पराचं वानार्वाचं त्वष्टा बध्नातु बंधने सत्ऋतूनुपविश्य दशमासो अवी
रहेति अथ प्रसवबंधः तदाय थैव वायुः पवते यथा समुद्र एजति एवं ते गर्भ
एजतु सह जरायुणावसर्पतात् इतिमं त्रावृत्त्या आर्द्रेण पाणिना त्रिर्वाङ्न्वमार्ष्टि अ
थ सीमंतोन्नयनप्रयोगः अथ चतुर्थे मासि षष्ठे अष्टमे नवमे वा शुक्लपक्षे
रविशुक्रगुरुवारेषु पुनर्वस्वादि पूर्वोक्तपुन्नक्षत्रेषु मध्यमपदद्वये षुषष्ठ्यष्टमी

द्वादशी चतुर्दशी अमावास्या व्यतीपातादिव्यतिरिक्तायां शुभलग्ने दोक्ता
ये यजमानः कृतावश्यकक्रियः वस्त्राच्छादिते पीठे प्राङ्मुख उपविश्य स्वदक्षि
णः पत्नीं [illegible] मुपवेश्याचम्य देशकालौ संकीर्त्य ममास्यां भार्यायां विद्यमान
गर्भबैजिकगार्भिकदोषपरिहारद्वारा क्षेत्रसंस्कारद्वारा च श्रीपरमेश्वरप्री
त्यर्थं सीमंतोन्नयनाख्यं कर्म क[illegible]रिष्ये इति संकल्प्य उ करिष्याकुर्यात् ततः
ततः सीमंतोन्नयनांगत्वेनोद्धननादि कर्म करिष्ये इति संकल्प्य उद्धननादिभिः
संस्कारं विधाय तत्र मंगलनामानमौपासनमग्निं प्रतिष्ठाप्य आयातनेनुप
रिसमूहनादि कृत्वा समित्त्रयमादाय भूर्भुवः स्वः इत्यादि व्याहृत्यंतं मुक्त्वा प्रधा
नहोमः धातारं चतुः आज्येन यक्ष्ये अंगहोमे वरुणं द्विः इत्यादि सामान्यप्रधा
नांतं हुत्वा धाता ददातु र यि मित्यादि प्रधानाहुति चतुष्टयं हुत्वा संस्रावजपांतं

म॰हे॰प्र॰। सर्वंसमाप्यत्रिवदन्नहोमंबलीकरणांतंसमाप्यपुण्याहंवाचयेत् ततस्ताम
परेणाग्निंपूर्ववन्मंडलागारेप्राङ्मुखीउपवेश्यत्रेण्याशलल्याउदुंबरस्तव
मुपसंगृह्यतस्याः पुरस्तात्प्रत्यङ्मुखस्तिष्ठन्सीमंतमुन्नयेत् भूर्भुवःसुवः रा
३० कामहꣳस्सुहवाꣳस्सुष्टुतीहुवेशृणोतुनःसुभगाबोधतुत्मना सीव्यत्वपःसू
च्याच्छिद्यमानयाददातुवीरꣳशतदायमुक्थ्यं यास्तेराकेसुमतयःसुपेशसो
याभिर्ददासिदाशुषेवसूनि ताभिर्नोअद्यसुमनाउपागहिसहस्रपोषꣳसु
भगेरराणाइतिद्वाभ्यां ततःसीमंतमभिमंत्रयति सोमएवनोराजेमामानुषीःप्रजाःअविमुक्तचक्रआसीरंस्तीरेतुभ्यंगंगे। विश्वाउतत्वयाव
यंधाराउदन्याइव अतिगाहेमहिद्विषइतिद्वितीयंमंत्रस्यगंगा यदंसत्कायस्यां
नद्याःसमीपेवासस्तन्नामसंबुध्याग्राह्यं ततोब्राह्मणभोजनंगंधतांबू
रा॰म॰
३०

लादिभिःब्राह्मणपूजनंभूयसींदक्षिणांचसंकल्प्यदद्यात् ततःआशिषोवाच
यित्वाप्रमादात्कुर्वतांकर्मेतिकर्मसादुण्यायविष्णुंस्मरेत् यदिपुंसवनसी
मंतोन्नयनयोस्तंत्रेणानुष्ठानंतदादेशकालौसंकीर्त्यममास्यांभार्यायां
विद्यमानगर्भसमुद्भवैनोनिबर्हणद्वाराश्रीपरमेश्वरप्रीत्यर्थंपुंसवनसीमं
तोन्नयनयोस्तंत्रेणकरिष्ये इतिसंकल्प्य पुंसवनहोमकर्मणियायक्ष्य
माणादेवतास्तासर्वाःपरिग्रहीष्यामित्यन्वाधाने विशेषः गणेशपू
जनादिबलीकरणपुण्याहवाचनांतंसर्वंसकृदेवकुर्यात् वैशेषिकधा
त्रीचतुष्टयस्यनावृत्तिःसंप्रतिपन्नदेवता कृत्वात् भार्यांमंडलागारे
मुपविश्यदधिद्रप्सादिप्राशनंसीमंतोन्नयनादिकंचसर्वंकुर्यात् इतिस
त्साषाढसीमंतोन्नयनप्रयोगः अथजातकर्मप्रयोगः जनमात्रेपुत्रेपि

ततस्यमुखंनिरीक्ष्यनद्यादौस्नात्वासंभवेशीताभिरद्भिः सुवर्णयुताभिः गेहेवा
स्नात्वासितचंदनमाल्यादिभिरलंकृतः नालछेदनात्प्राक् अश्मानंपरशुंसर्ष
पंसुवर्णंसर्षपानकणांश्चउत्तरशीतआपश्च आन्यंउदकुंभंचसंभृत्यप्राङ्मु
उपविश्याचम्यप्राणानायम्यदेशकालौसंकीर्त्यममास्यकुमारस्यबीजग
र्भसमुद्भवैनोनिबर्हणद्वारायुर्वर्चोभिवृद्धिद्वाराचश्रीपरमेश्वरप्रीत्यर्थं
जातकर्मकरिष्ये तदंगंगणेशपूजनंपुण्याहवाचनंमातृकापूजनंनांदी
श्राद्धंचकरिष्ये इतिसंकल्प्यकुर्यात् ततोश्मनिपरशुंतदुपरिहिरण्यंनि ॥राम॥
धायतानिव्यस्तानिकृत्वातदुपरिकुमारंपूर्वसम्यक्प्रक्षालितंहस्ता
भ्यांधारयति अश्माभवपरशुर्भवहिरण्यमस्तृतंभव वेदोवैपुत्रनामा
सिजीवत्वंशरदःशतं॥अंगादंगात्संभवसिहृदयादधिजायसे॥आत्मावैपुत्रनामा

सिसजीवशरदःशतमितियद्यस्यांकश्चिज्जरायुगाभस्तिष्ठतितदाअंजलिनो
दकमादायास्यामूर्धानमभिषिंचति तिलदेवपद्यस्वनमाॐसमसीनोदल
मवपद्यस्व दिति नैमित्तिकमिदंततऔपासनाग्निंसूतिकागारात्बहिः
शुचौदेशेसंस्थाप्यतत्रएकंकपालंसनसंकृत्वातस्मिन्छुष्कंगोमयंप्रक्षिप्यप्र
ज्वाल्यएष उत्तपनीयोपचनाग्निर्वा तमुत्तपनीयमग्निंसूतिकागारेनीत्वा
तत्रसंस्थाप्यप्राङ्मुखउपविश्याचम्यदेशकालौसंकीर्त्य अस्यकुमारस्यशंडो
मर्कादिरक्षोगणेभ्यःसंरक्षणार्थंसर्षपमिश्रैःकणैःसायंप्रातरुत्पूपनंभूम्या
लंभनंचकरिष्यइतिसंकल्प्यपरि समूह्यतूष्णींपरिषिच्यहस्तेनजुहुयात्॥
तत्रत्यागन सायमेवोपाक्रम्यसायंप्रातर्वासायमुत्पूपनंभू [illegible]

म.हे० प्र० स्यात्लंभनंचबालरक्षणार्थंकर्तव्यं॥ सायंसायंवा यदाग्नुपचनाग्नावुधूपनं तदागतकालमेवोधूपनं भूम्यालंभाःनंसकृदेवकुर्यादितिवृत्तिकृत्॥ शंडो मर्कउपवीरःशांडिकेरउलूखलःच्यवनोनश्यतादितःस्वाहा० आ लिखन्निलिखन्ननिमिषन्किंवदंतउपश्रुतिःस्वाहा० अयम्याःकुंभीश त्रुःपात्रपाणिर्निपुणिःस्वाहा० आंत्रीमुखःसर्षपारुणोनश्यतादितः स्वाहा० केशीनीश्वलोमिनीबजावोजोपकाशिनी अपेतनश्यता दितःस्वाहा० कौबेरकाविश्ववासोरक्षोराजेनप्रेषिताः ग्रामान्सजात योयंतीप्सतेःपरिजायताःस्वाहा० एतान्हतैतान्वधीतेत्ययंब्रह्मणोद् तस्तानग्निःपर्यसरत् ० तानिंद्रस्तान्बृहस्पतिस्तानहंवेदब्राह्मणःप्रम

३२

राम

३२

रेकाभि

शतःकूटदंतान्विकेशान्लंबस्तनान्स्वाहा॥ नक्तंचारिणउरस्येशाशूल हस्तोन्कपालपान्स्वाहा॥ पूर्वएषांपितेत्युच्चैःश्राव्यकर्णकः॥ माताजे घन्यां मिछंतीस्वाहा॥ नक्तंचारिणीस्वसासंधिनाप्रेक्ष्यतेकुलं॥ या स्वपत्सुजागर्तियस्यैविजातांयांमनस्वाहा॥ तासांत्वंकृष्णवर्त्मनेकूमानः हृदयंयकृत्॥ अग्नेयक्षिणिनिर्दहस्वाहा॥ एतैर्दशभिर्मंत्रैर्निर्धूमेषुअंगारेषुआव भि पति॥ कुमारमुपधूपयेत्॥ ततःपाणीप्रक्ष्याल्या॥ यत्तेसुसीमेहृदयं॥ दि विचंद्रमासिश्रितं॥ तन्मामृतत्वस्यनोधेहिमाहंपौत्रमघंरुदं॥ वेदतेभू मिहृदयंदिविचंद्रमसिश्रितं॥ तथामृतत्वस्यनोधेहिमाहंपौत्रंमघंरुदमि तिभूमिमालभते॥ अथमेधाजननं॥ देशकालौसंकीर्त्य अस्यकुमारस्यधि योधारणाविध्यर्थंमेधाजननंकरिष्ये॥ इतिसंकल्प्य॥ दर्भेणाहिरण्यंप्रबध्य

भि स्या ४

ग। अंतरिक्षामाग्निरपुर

महेशय० तदंतर्धायप्राक्शिरसंकुमारंस्थाप्यगोघृतंचतुर्भिर्मंत्रैः॥ एकवारंप्राशयति॥
करमैंचा ऽणअनुरोधेनप्रधानावृत्तिः॥ नात्रसंगः॥ भूर्ऋ चस्त्वयिजुहोमि
स्वाहा॥ भुवोयजूंषित्वयिजुहोमिस्वाहा०॥ सुवःसामानित्वयिजुहोमि स्वाहा०
भूर्भुवःस्वरथर्वांगिरसस्त्वयिजुहोमिस्वाहा०॥ इतिमेधाजननं॥ ततःकुमारमु

३३

ष्णशीताभिरद्भिःस्नापयति॥ क्षेत्रियैत्वानिर्ऋत्यैत्वाद्रुहोमुंचामिवरुणस्यपाशा
त्॥ अनागसंब्रह्मणेत्वाकरोमिशिवेतेद्यावापृथिवीउभेइमे॥ शंतेअग्निः
सहाद्भिरस्तुशंद्यावापृथिवीसहौषधीभिः॥ शमंतरिक्षंसहवातेनतेशंतेचत
स्रःप्रदिशोभवंतु॥ सूर्यमृतंतमसोग्राह्यायद्देवा अमुंचंनस्सृजन्व्येनसः॥ इद
महमिमंक्षेत्रिया जामिशंसा द्रुहोमुंचामिवरुणस्यपाशा दिति॥

ततःकुमारंमातुरुत्संगेआदधाति॥ यादेवीश्चतस्रः प्रदिशोवातपत्नीरभिसू
र्योविचष्टे॥ तासांजरसआदधामिप्रयक्ष्मएतुनिर्ऋतिंपराचैरितिततःमार कु

त्वी

मभिमंत्रयति॥ मातेपुत्रंरक्षोहींसीर्माधेनुरभिसारिणी॥ प्रियाधन
स्यभूयाएधमानास्वेगृहे॥ इति॥ ततस्तूष्णींम क्षालितंदक्षिणस्तनं॥ स
व्यंचर्मेयाव स्यापाययति॥ ततोमं त्राव स्यास्तनौउभावभिमृशति॥ नामय
ति। नरुदति॥ यत्रवयंयदामोयत्रचाभिशायसीति॥ ततोस्य शिरःपेउ म

म

दकपूर्णकुंभंपिहितमुरवंनिदधाति॥ आपोगृहेषुजाग्रतयथादेवेषुजाग्र
त॥ एवमस्येसुप्रजायैजाग्रतेति॥ ततोजन्मकालेदुःशस्थानस्थितग्रहपीडा

ये

निवृत्तंदानजपादिकारयेत्॥ ततोब्राह्मणेभ्योगोभूहिरण्यादियथाशक्तिद भ्यो
क्षिणांदत्वागंधादिनासंपूज्यभूयसींदक्षिणांदत्वाशिवोवाचयेत्॥ अग्ने

समी ९

३४

तेजस्विन्तेजस्वीत्वंदेवेषुभूयास्तेजस्वतंमामायुष्मंतंवर्चःस्वंतंमनुष्येषुकुरुदीक्षायै
चत्वातपसश्चतेजसेजुहोमितेजोविदसितेजोमामाहासीन्माहंतेजोहासिषंमा
मांतेजोहासीदिद्रौजस्विन्नोजस्वीत्वंदेवेषुभूयाओजस्वतंमामायुष्मंतंवर्च
स्वतंमनुष्येषुकुरुब्रह्मणश्चत्वाक्षत्रस्यचौजसेजुहोम्योजोविदस्योजोमा
मामाहासीन्माहमोजोहासिषंमामामोजोहासीत्सूर्यभ्राजस्विभ्राजस्वी
त्वंदेवेषुभूयाभ्राजस्वंतंमामामायुष्मंतंवर्चःस्वंतंमनुष्येषुकुरुवायोश्चत्वा
पांचभ्राजसेजुहोमिसुवर्विदसिसुवर्मामाहासीन्माहंसुवर्हासिषंमामाः
सुवर्हासीन्मायिमेधांमयिप्रजांमय्यग्निःस्तेजोदधातुमयिमेधांमयिप्रजा
मयींद्रइंद्रियंदधातुमयिमेधांमयिप्रजांमयिसूर्योभ्राजोदधातु॥तता

नालछेदनादियथाचारंकार्यं॥इदंचरात्रौरक्षं ध्यायांग्रहणेजननमरण
शौचमध्येपि आशौचंनाते।वापितरिग्रामममतेपिपित्र्यादिजातकर्मकुर्यात्॥
इतिसत्याषा[illegible]ढहिरण्यकेशीस्मार्तप्रयोगरत्नेजातकर्मप्रयोगः॥ अथषष्ठी
पूजा॥ पंचमेषष्ठेपिवादिनेपूर्वरात्रेपिवादिरात्रम्यदेशकालौसंकीर्त्यसूति
का[illegible]योःशिशोश्चसकलाभीष्टद्वाराआयुरारोग्या[illegible]भिवृद्धि
द्वाराचश्रीपरमेश्वरप्रीत्यर्थंविघ्नेशजन्मदाषष्ठीदेवीजीवंतिकानांयथा
मीलितोपचारैःपूजनमहंकरिष्ये॥इतिसंकल्प्यपूजितस्थानेपीठादौ
यथाचारंविघ्नेशादीनामावाह्यषोडशोपचारैः[illegible]पंचोपचा

२३

म०प्र ३५

रैर्वासंपू[illegible]जयित्वाप्रार्थनाकार्या ॥ गौरीपु त्रोयथास्कंदः शिशुत्वेरक्षितः पुरा ॥ तथाममाप्ययंबालः षष्ठिकेरक्षितान्नमः ॥ कार्तिकेयमहाबाहो पार्वतिहृदिनंदन ॥ कुमारंरक्षभीतिभ्यःपाहिदेव नमोस्तुते ॥ इतिसंप्रा र्थ्यततःषष्ठीस्कंदभ[illegible]गवतीभ्यःमा५५भक्तबलिंसमर्प यामि ॥ इतिबलिं दत्वा ॥ ब्राह्मणगंधतांबूलदक्षिणादिभिःसंपूज्याशिषोवाचयित्वास्व यंबधुर्बांधवैःसहखाद्यादिभक्षणंकुर्यात् ॥ जन्माशौचमध्येप्रथमषष्ठ दशमदिनेषुनाशौचदोषः ॥ अ[illegible]न्नंभक्षणेदोषः ॥ पुरुषाः शस्त्रहताः स्त्रियोगीतकारिण्यः अस्यांरात्रौजागरणंकुर्युः ॥ सूतिकागृहंच धूपा ग्निदीपशस्त्रमुसलविभूतियुतंकार्यं ॥ इतिषष्ठीपूजा ॥ छ ॥ छ ॥ छ ॥ छ ॥

राम् ॥ ३५

शक्तिस्त्वंसर्वदेवानांलोकानांहितकारिणी मातर्बालमिमंरक्षमहाषष्ठीनमोस्तुते ३

श्र२

अथनामकरणप्रयोगः ॥ तत्रद्वादशदिवसेमातापुत्रयोःपितुश्च ॥ स्ना नस्यागारशुद्धिंनिधाय ॥ त्रयाणांद्वादश्यामेवाशौचनिवृत्तिः ॥ एकादश्यां शाखांतरेविहितमपिनामकरणादिकर्मस्माकंनभवति ॥ तन्मतेद्वादशे[illegible] दिवसे नामकर्तव्यं ॥ स्वकालेप्राप्तमपिविष्टिवैधृतिव्यतीपातग्रहणसं क्रांत्यमावास्यापितृश्राद्धदिनेषुनकार्यं ॥ गुरुशुक्रबा[illegible]त्यवार्धकवक्रा तिचारसंसर्गमासादिनिषेध[illegible]स्त्वनास्ति ॥ मातापुत्रयोःस्नानंखनन लेपनादिनागारशुद्धिंकारयित्वा ॥ सूतिकाग्निंबहिःपरिहृत्योपासन मानीयायतनेसंस्थाप्यप्रज्वाल्यप्राङ्मुखउपविश्यावदक्षिणतःकुमार सहितांभार्यामुपवेश्यान्वम्यदेशकालौसंकीर्त्य अस्यशिशोःबीजगर्भ

चे म

महेश्र
३६

समुद्भवेनोनिबर्हणद्वारायुर्वर्चोभिवृद्धिद्वाराचश्रीपरमेश्वरप्रीत्यर्थंनाम
करणाख्यंकर्मकरिष्ये॥ तदंगंगणपतिपूजनंपुण्याहवाचनंनांदीश्राद्धं
चकरिष्यइतिसंकल्प्यकृत्वा॥ पूर्वाह्णेज्योतिर्विदुक्तेकालेनामकरणंकार्यं
गृह्याग्निमुपसमाधायसमिच्चयमादायश्रद्धागृहीत्यादिप्राणायामांतंकृत्वा
॥मेनोदगनहोमकर्मणियायक्ष्यमाणादेवतास्ताःसर्वाःपरिग्रहीष्यामिइत्या
दिव्याहृत्यंतंमुक्त्वा॥ वैशेषिकहोमे॥ धातारंचतुरनुमतिंचतुःकाराद्भिःसि
नीवालींद्विःकुहूंचाज्येन॥ अंगहोमेवरुणंद्विरित्यादिसꣳस्रावेणांतंमु
क्त्वासमिधोग्नावाधायव्याहृत्यंतंमुक्त्वा॥ प्रधानहोमः॥ धाताददातुनो
रयिमीशानोजगतस्पतिरितिचतस्रोधात्रीर्हुत्वा॥ अन्वद्यनोनुमतिर्यज्ञंदेवे

मातृकापू
जनं२

।राम
३६।।

देवेषुमन्यतां॥ अग्निश्चहव्यवाहनोभवतांदाशुषेमयः स्वाहा॥ अनुम
त्याइदं० अन्विदनुमतेत्वंमन्यासैशंचनःकृधि॥ क्रत्वेदक्षायनोहिनु
प्रणआयूꣳषितारिषत्स्वाहा॥ अनुमत्याइदं०॥ अनुमन्यतामनु
मन्यमानाप्रजावंतꣳरयिमक्षीयमाणं॥ तस्यैवयꣳहेडसिमापिभ
मूसानोदेवीसुहवाशर्मयच्छतुस्वाहा॥ अनुमत्याइदं०॥ यस्यामि
दंप्रदिशियद्विरोचतेनुमतिंप्रतिभूषंत्यायवः॥ यस्याउपस्थउर्वंतरि
क्षꣳसानोदेवीसुहवाशर्मयच्छतुस्वाहा॥ अनुमत्याइदं०॥ राकाम
हꣳसुवाꣳसुष्टुतीहुवेश्रृणोतुनःसुभगाबोधतुत्मना॥ सीव्यत्वपः
सूच्याछिद्यमानयाददातुवीरꣳशतदायमु[illegible]क्थ्यꣳस्वाहा॥

म॰ प्र

३७

राकायाइदं०॥ यास्तेराकेसुमतयःसुपेसोशे याभिर्ददासिदाशुषेवसूनि॥
ताभिर्नो अद्यसुमनाउपागहिसहस्रपोषंसुभगेरराणास्वाहा॥ राका
याइदं०॥ सिनीवालिपृथुष्टुकेयादेवानामसिस्वसा॥ जुषस्वहव्यमाहुतं
प्रजांदेविदिदिड्ढिनःस्वाहा०॥ सिनीवाल्यइदं०॥ यासुःपाणिःस्वंगुरिः
सुषुमाबहुसूवरी॥ तस्यैविश्पत्नियैहवीःसिनीवाल्यैजुहोतनःस्वाहा॥
सिनीवाल्याइदं०॥ कुहूमहंसुभगांविद्मनापसमस्मिन्यज्ञेसुहवांजो
हवीमि॥ सानोददातुश्रवणंपितॄणांतस्यास्तेदेविहविषाविधेमस्वाहा॥ राम
कुह्वाइदं०॥ इतित्रयोदशाहुतिर्हुत्वा॥ इमंमेवरुणेत्यादिबलीकरणांतं ३७
कृत्वाततोनामदानं॥ अत्रमातापितृभ्यांपुण्याहवाचनात्पूर्वंशुभे

कालेगुप्तंनामकार्यं॥ यावज्जीवमेवगुप्तं॥ मौंजीबंधनेवापुत्रोजानीते॥
अत्रकृत्रिमंनामद्वयं॥ एकंगुप्तंअपरंव्यवहाराय॥ व्यावहारिकानक्षत्रं
नामद्वीतीयं॥ इतिद्वयं॥ यथाकुलाचारंकुलदेवतानामप्रथमं॥ मह
लक्ष्मीर्भक्तइति॥ ततोजन्मकालीनमासनामंकुर्वत्याचारात्॥ तच्च॥ कृ
ष्णोनंतोच्युतश्चक्रीवकुंठोथजनार्दनः॥ उपेंद्रोयज्ञपुरुषोवासुदेवस्त
थाहरिः॥ योगीशःपुंडरीकाक्षोमासनामान्यनुक्रमात्॥ अत्रयथाचा
रंचैत्रादिमार्गशीर्षादिवाक्रमः॥ ततोव्यावहारिकंनाम॥ तच्चत्रिपुरु
षवादेवतावाचिवा॥ ऋषिवाचिवेष्टद्व्यक्षरंप्रतिष्ठाकामश्चतुरक्षरंब्रह्म
वर्चसकामः॥ घोषवदादिअंतरस्थंवादीर्घान्यरंविसर्गांतंवासूपूसर्गंवा॥
त

न०हे

३८

अत्रैषष्ठयैकं व्यावहारिकं नामशर्मान्तं ॥ ततोनाक्षत्रं ॥ ज्योतिःशास्त्रोक्त
मवकहडचक्रानुसारेण जन्मनक्षत्रपादयुक्ताक्षरादिकं नाम ॥
अथबौधायनोक्तजाताधिकारविहितोणादिप्रत्ययान्तं नाक्षत्रं ॥ त
त्र आश्वयुक् ॥ आश्वयुजः ॥ अपभरणः ॥ आपभरणे ॥ बहुलः ॥
रोहिण ॥ रोहिणः ॥ मृगशीर्षः ॥ मार्गशीर्षः ॥ आर्द्रकः ॥ आर्द्रः ॥ पुनर्व
सुः ॥ तिष्यः ॥ आश्लेषः ॥ मघः ॥ माघः ॥ फाल्गुनः ॥ हस्तः ॥ चित्रः ॥ चैत्रः ॥
स्वातिः ॥ विशाखः ॥ अनूराधः ॥ ज्येष्ठः ॥ ज्यैष्ठः ॥ मूलकः ॥ मूलः ॥ अषा

३८

ढः ॥ आषाढः ॥ आषाढीयः ॥ अभिजित् ॥ अभिजितः ॥ श्रवणः ॥ श्राव
णः ॥ श्राविष्ठीयः ॥ शतभिषकः ॥ शातभिषः ॥ प्रौष्ठपदः ॥ रेवती ॥ रैवतइति ॥

एतच्चसर्वनामशर्मान्तं ब्राह्मणस्यकार्यं ॥ अत्र यशिष्टाचारः ॥ तंडु
लान्कांस्यादिपात्रेप्रसार्यतदुपरिसुवर्णशलाकयांलिखेत् ॥ प्रथ
मकुलदेवतानाम ॥ ततोनाक्षत्रंच ॥ चतुर्थ्यांलिखित्वा ॥ नामदेवता
भ्योनमइति ॥ दक्षिणांतोपचारैः ॥ संपूज्यततः कुलदेवतानाम्ना
महालक्ष्मीभक्तोसीतिस्वदक्षिणे विद्यमानस्यमातुरुत्संगस्थि
तशिशोर्दक्षिणेकर्णेकथयित्वा ॥ नर्यप्रजांमेगोपाय ॥ अश्मत्वा
यजीवसे ॥ जातांजनिष्यमाणांच ॥ अश्मतेसत्येप्रतिष्ठितां ॥ इतिप्रति
ष्ठाप्य ॥ विधेर्नामस्वप्रतिष्ठितमित्युक्ते महालक्ष्मी भक्तोयं भवतः ॥
सर्वान्ब्राह्मणान् अभिवादयेत् ॥ आयुष्मान्भवतु ॥ महालक्ष्मीभक्तइत्य

क्तै॥ अस्मै महालक्ष्मीभक्ताय पुण्याहं भवंतो ब्रुवंतु इति त्रिः॥ स्वस्तिरिप्रास्त्रिः॥
ऋद्धिं भवंतो ब्रुवंतु त्रिः॥ रिद्धिरिति त्रिः॥ एवमेव शिष्टनामत्रयेपि पुण्याह वाचनं का
र्यं॥ ततो नीराजनं कारयित्वा॥ श्रीरस्त्वित्याद्युक्ते प्रजापतिः॥ प्रीयतामिति क्त्वा
पुण्याहवाचनसमाप्याभिषेकः कार्यः॥ ततः कर्मांगत्वेन ब्राह्मणभोजनं संकल्प्य
ब्राह्मणानां धादिनासंपूज्य भूयसीं दक्षिणां दत्वाशिषो ग्राह्याः॥ ततः प्रमाद
कुर्वतां कर्मेतिक्रमसाद्गुण्याय विष्णुस्मृत्वा शिष्टैरिष्टैश्च सह भोजनं कुर्यात्॥ इ
ति सत्याषाढहिरण्य॰ केशी स्मार्तप्रयोगरत्ने प्र।थमसंस्कारप्रकरणे वैशं
पायनमहेशभट्टकृतो नामकरणप्रयोगः॥ थ अे प्रवासादागते पुत्रपित
रि वा पुत्रदर्शने सति पितुरेव नै... मित्तिकं कर्म चोच्यते पिता पुत्रमभिमृश
ति॥ सोमस्य त्वा द्युम्नेनाभिषिंचाम्यग्नेस्तेजसा सूर्यस्य वर्चसे... तिनत

मूर्ध्नी घ्राति॥ पशुनां त्वा हुंकारेणाभिजिघ्रामि अमुकशर्मन्नायुषे हुमिति॥ ततः
स्वदक्षिणेन हस्तेन पुत्रस्य दक्षिणं हस्तं उत्तानं सांगुष्ठं गृ... ह्णाति॥ अग्निरायु
ष्मान्स वनस्पतिभिरायुष्मान्तेन त्वायुषायुष्मंतं करोमि॥ सोम आयुष्मान्स
॰ ओषधीभिरायुष्मा॰न्तेन त्वायुषायुष्मंतं करोमि॥ यज्ञ आयुष्मान्स दक्षि
णाभिरायुष्मान्॰॥ ब्रह्मायुष्मत्... ब्राह्मणैरायुष्मान्॰॥ देवा आयुष्मंतः
स्तेमृतेना युष्मंतस्तेन॰॥ ततः आयुष्टे विश्वतो दधदयमग्निर्वरेण्यः॥ पुन
स्ते प्राण आयाति परा यक्ष्मं॰ सुवा मिते॥ अग्ने पृथिव्यां पातीति छवाय्या
वंतरिक्षे सूर्य दिविया॰ स्वस्ति मग्निर्वायुरादित्यश्चंद्रमा आपो नुसंचरं
ति ता॰ स्वस्ति मनुसंचरासो... इति मंत्रद्वयं पुत्रस्य दक्षिणकर्णे जपति॥
ततः आयुर्दा अग्ने हविषो जुषाणो घृतप्रतीको घृतयोनिरेधि॥ घृ

म.रु.०म

४०

तंपीत्वामधुचारुगव्यंपितेवपुत्रमभिरक्षतादिमं॥ अग्नौपृथिव्यांप्रति
तिष्ठेतिचोत्तरे॥ इदंयावज्जीवंयावदुपनयनेवापितुर्नैमित्तिकं॥ अथ अ
गृह्यानुक्ता अपिकेचनसंस्काराः॥ सकलशिष्टपरिगृहीतत्वेनावश्य
कर्त्वास्मार्तालिख्यंते॥ अथायुष्यवर्धनप्रयोगः॥ जन्मनक्षत्रेप्राकृसंव
त्सरावृत्तिमासेनक्षत्रहोमः॥ ततऊर्ध्वंसंवत्सरेवान्येपित्र्यादिःकुर्यात्॥
सौरमानेनयजमानंकृतावश्यककक्रियः सर्वौषधियुक्तजलपूरितकलशं
संपूजितउदकेस्नात्वाशुक्लांबरधरोलंकृतः कौतुकमाबध्यप्राङ्मुखउप
वेश्यदेशकालौसंकीर्त्यममाब्दपूर्तिजन्मदिवसेआयुरभिवृद्धिद्वारा
श्रीपरमेश्वरप्रीत्यर्थंअमुकजन्मनक्षत्रदेवताकंस्थालीकर्माकंकरिष्ये॥
तदंगंगणेशपूजनपुण्याहवाचनंनांदीश्राद्धंचकरिष्ये॥ इतिसंकल्प्यकृ

४०

मातृकापूजनं

त्वा॥ आघारवतातंत्रेण आपूर्विकेणवास्थालीपाकःकार्यः॥ यदिसिध्नस्करु
देवपवित्रसंस्कारसंस्कृतोग्राह्यः॥ उद्धननादिभूसंस्कारंविधायबलवर्ध
ननामानमौपासनाग्निंलौकिकाग्निंप्रतिष्ठाप्यअक्षुएहीत्यादिप्राणाया
मांतकृत्वा आयुर्वर्धापनहोमकर्मणियायक्ष्यमाणादेवताइत्यादिव्याहृत्यं
तमुक्त्वावैशेषिकहोमे॥ अमुकनक्षत्रंतद्देवतांचामुकसंख्ययाचवरुणाययक्ष्ये॥
अंगहोमेवरुणंद्विरित्यादिव्याहृत्यंतमुक्त्वास्वनक्षत्रंतद्देवतांश्चहूयोर्नाममं
त्रेणहोमः॥ अष्टोत्तरशतमष्टाविंशतिसंख्यायावाहुत्वा॥ होमशेषंसमाप्यस्व
जन्मनक्षत्रंतद्देवतांचद्वरुणंचयथोपचारैः संपूज्यकृताभिषेकः यथाश
क्तिस्वजनबंधुसुहृत्पूजांसवाहनपूजांकृत्वाब्राह्मणान्भोजयित्वासुमुहू
र्तेगंधवस्त्रादिभिः अलंकृतः पतिपुत्रवतीभिर्नीराजितोब्राह्मणाशिषोगृह्णी

प

म० २० प्र त्वा हविष्या शीजितेंद्रियो भवेत्॥ इत्यायुर्वर्धापनप्रयोगः॥ अथ शिशोः पर्यंका
रोपणं॥ जन्मदिनेद्वादशेषोडशे द्वाविंशे वान्यस्मिन्दिवसे वा ज्योतिःशास्त्र
४१ क्तमृदुक्षिप्रनक्षत्रादियुते शुभे काले यथाचारं कुलदेवतापूजां विधाय
लंकृतं शिशुं हरिद्राधूलकृते पर्यंके लेमाच्छाद्याः सौभाग्ययुताः स्त्रियो ज
१ लशायिने हरिस्मरत्स्वगीतवाद्यौ समकालं प्राक्शिरसं न्यसेयुः यथाचा
रं कुलदेवतापूजां कुर्यात्॥ अथ दुग्धपानं॥ एकविंशदिने द्वितीयजन्मनक्षत्र
दिने यथाचारमन्यस्मिन्वा प्राशननक्षत्रयुते शुभकाले कुलदेवतादिपूजांते त्र४
गोर्गोक्षीरं शंखेन माता न्यावापायसेदिति॥ अथ कर्णवेधः॥ जन्मदिनाद्वा
दशे वा षोडशे वा दिवसे षष्ठे [illegible] सप्तमाष्टममासान्यतममासे दंतजननाना ४१
त्पूर्वमेव ज्योतिर्विदादिष्टे शुभकाले पूर्वाह्णे मध्याह्ने वा विष्णुशिवब्रह्मसूर्यंचं

द्रदिग्गीशनासत्यसरस्वती कुलदेवता गो ब्राह्मणान्यथाविभवं संपूज्य मातुरुत्संगे रु
गस्थस्य शुभासनस्थस्य वा शिशोः प्राङ्मुखस्य वा कुशलया सुवर्णादिसूच्या
कर्णौ विध्येत्॥ अनावृते सूर्यरश्मिपातस्थले अंगणादौ कुमारस्य पूर्वं दक्षिणः
ती४ कुमार्यः वामः॥ वेधकर्तात्रयनक्ष[illegible]प्रक्षालनं कार्यं॥ आभरणधारणक्षमता भ
वति यथा वर्धनीयौ॥ अथ सूर्यावलोकनं निःक्रमणं च॥ तृतीमासी जन्मनक्ष
त्रे वा इष्टदेवतापूजनपूर्वकं शिशुना सोमस्य वंदर्शनं कारयित्वा॥ चतुर्थमासे
शुभे काले वा चंद्रं धेनुं दर्शयेत्॥ अथ वा निष्क्रमणेन सहैव कार्यं॥ चतुर्थे
षष्ठे वा मासे शुक्लपक्षे शुभतिथ्यादौ पिता सभार्यः सशिशुः अभ्यंगं
स्नातः प्राङ्मुखमुपवेश्य। देशकालौ संकीर्त्य मम शिशोर्वा आयुरभिवृद्धि
द्वारा बीजगर्भसमुद्भवैनोनिबर्हणद्वारा च श्रीपरमेश्वरप्रीत्यर्थं सूर्यावलोक

नानिः क्रमणंच करिष्ये॥ तदंगंगणेशपूजनंपुण्याहवाचनंचकरिष्ये॥ इ
संकल्प्यकुर्यात्॥ ततः इंद्र अग्नि यमनिर्ऋतिवरुणवायुकु
बेरईशगनानांप्राच्याद्यष्टदिक्पालानांचंद्रार्कोद्या दिदेवानांयथाक्रमंपू
जांकृत्वाब्राह्मणान्सभोन्यालंकृत्य अग्निचद्रध नूनांदर्नंनकुत्वामंत्रा
न्पठेत्॥ चंद्रार्कदीशानादिशाचवरुणस्यच॥ निक्षेपार्थमिदं दम्मितुत्वांर
क्षंतुसर्वदा॥ अप्रमदंप्रमत्तंवादिवारात्रियथापिवा॥ रक्षंतुसततंसर्वे
देवाःशक्रपुरोगमाः॥ एवंशिशुरक्षार्थं देवान्संप्राथ्र्यविष्णुशिवालयेऽरन्य
तबंधुगृहंवागत्वा॥ तत्रदेवंपुष्पोपहारादिभिः संपूज्यगोमयाद्यनुरक्तेच
तुरस्रेधान्यानिधायतत्रशिशुमासयित्वामंत्रैरक्षांकुर्यात्॥ ओंजुंसः॥ त्र्यंबकं
यजामहेसुगंधिंपुष्टिवर्धनं॥ उर्वारुकमिवबंधनान्मृत्योर्मुक्षीयमामृतात्स

हुंजुंसः सेवंरूपंमत्वा संजीवनमंत्रंपठेत्॥ विभूत्याक्षतैर्वामूर्ध्नि ललाटे चरक्षांकृत्वा॥ अपूपादिभिः भूतेशानंगणेशानंचसमभ्यर्च्य शिशुंभ
क्ष्यादिभिः तोषयित्वा॥ देवताभ्रेणामंप्र दक्षिणत्रयंचशिशुनाका
रयित्वामातुलाद्यासन्नबंधुगृहंपूर्ववन्नीत्वातत्रशिशुंतोषयित्वास्व
गृहंगत्वा ब्राह्मणेभ्योदक्षिणांदत्वा॥ शिषोवाचयेत्॥ इतिनिष्क्रमणं॥
अथोपवेशनं॥ पंचमासशुक्लपक्षे पूर्वाह्णेज्योतिर्विदुक्तेमुहूर्तेगणेशपूज
नंपुण्याहवाचनंकृत्वावराहपृथ्वीदेवगुरुद्विजान्पूजयित्वाभूमिमुपाल
भ्यतत्रमंडलंकृत्वाशंखतूर्यादिमांगलिकध्वनौक्रियमाणेशिशुमुपवेश
येदेतैर्मंत्रैः॥ रक्षैनंवसुधेदेविसर्वदासर्वगंशिशुं॥ आयुःप्रमाणानिरवि

महे०प्र लंनिक्षिप्यस्वहरिमूर्मिये॥ अचिरादायुषस्तस्य येकेचित्परिपंथिनः॥ जीव
तायुष्यवित्तेषु निर्दिहस्वाचिरेणतान्॥ धारिण्यशेषभूतानांमातस्त्वमधिका
४३ मतिकुमारंमात्वमादिस्तंब्र स्मातदनुमन्यतां॥ ततोब्राह्मणैःसंपूज्याशिषोवा
चयित्वातत्कर्मसाद्गुण्यंविष्णुंस्मरेत्॥ कुमार्या अप्येवमेवकुर्यात्॥ इतिस्मार्तानि
अथान्नप्राशन[illegible] प्रयोगः॥ जन्मतः षष्ठमास्यष्टमेवा ज्योतिर्विदादिष्टमुहूर्ते
पूर्वाह्णेशुक्लपक्षेपित्रादिः शिशोरन्नप्राशनंकुर्यात्॥ षष्ठमासिचात्क्रियते तदा
गुरुशुक्रवा[illegible]स्त्यबाल्यवार्धक्यादिविचारो[illegible]द्धाधिमासनिषेधश्चनास्ति॥ कर्ता
कृतमांगलिकः प्राङ्मुखउप[illegible]श्यसंस्कार्यमातां चोपवेश्यदेशकालौसंकीर्त्य ४३
ममास्यशिशोः मातृगर्भमलप्राशनेनोना बीजगर्भसमुद्भवैनोनिबर्हणद्वा
राश्रीपरमे[illegible]श्वरप्रीत्यर्थं अन्नप्राशनाख्यंकर्मकरिष्ये॥ [illegible]

लाघवर्चसतेजइंद्रियायुरभिवृद्धिद्वारा च १ य २
यु

तदंगंगणपतिपूजनंपुण्याहवाचनंमातृकापूजनंनांदीश्राद्धंचकरिष्ये॥ इतिसंकल्प्यकृत्वा॥ उ
द्धननादिभूसंस्कारंविधाय औपासनाग्निंप्रतिष्ठाप्यापित्रातिरिक्तेकर्तरिलौकिकंवाशुचिना
मानंप्रतिष्ठाप्यसमित्त्रयमादाय अग्नये एधीत्यादिप्राणायामांतंकृत्वा अन्नप्राश
नहोमकर्मणियायक्ष्यमाणादेवताः स्तासर्वाः परिग्रहीष्यामिजातवेदसम
ग्निमिध्मेनेत्यादि[illegible] सामान्यप्रधानांतंहुत्वा॥ नात्रवैशेषिकहो
मः॥ अंगहोमंवरुणंह्वरित्यादिसंस्थाजपांतंकृत्वा बलीकरणां[illegible] तंसर्वंसमा
प्यस्वदक्षिणमातुरुत्संगस्थंशिशुंदधिमधुघृतमिति त्रिवन्निमिश्रंकृत्वामंत्र
त्रयेणैकवारंप्राशयति॥ अपांत्वौषधीनांरसंप्राशयामि शिवा आप औषधयो यामिशि
भवंत्वनमी[illegible]वास्त आपओषधयोभवंत्विति॥ नात्रत्यागः॥ ततः स्तूष्णीं
यथेष्टंप्राशयित्वामुखंप्रक्षाल्यबालकंभूमावुपविश्यतदग्रेपुस्तकव
×भूस्त्वयिदधामि॥ भुवस्त्वयिदधामि॥ सुवस्त्वयिदधामिइतिएकवारमन्नंप्राशयति॥ ×४
४

म हे शम् स्त्रादिशिल्पानि विन्यस्य स्वेच्छया यं [illegible] शिशुः स्पर्शयेत् ॥ सास्य
जीविकेति परीक्षां कुर्यात् ॥ ततः कर्मांगत्वेन दशाधिकान् ब्राह्मणान् यथाका
लं यथोपपन्नेनान्नेन भोजयिष्य इति संकल्प्य भूयसीं दक्षिणां दत्वाशि
४४ षो वाचयित्वा ॥ कर्मसाद्गुण्याय विष्णुं स्मरेत् ॥ कन्याया अपि अमंत्रकं कुर्या
त् ॥ इति सत्याषाढहिरण्यकेशी० ॥ अन्नप्राशनप्रयोगः ॥ अथ चूडा
करणप्रयोगः ॥ गर्भतो जन्मतो वा तृतीये वर्षे पंचमे वा अगर्भिण्यां मातरि
म पंचवर्षादूर्ध्वं गर्भिण्यामपि गुरुशुक्रवार्धक्यादिमासे अक्षे अनधिके च ये ष
मासि उदगयने शुक्लपक्षे ज्योतिर्विदा युक्ते काले चूडा कार्या ॥ यदि गर्भा ४४
धानादयः संस्काराः स्वकालेन जाताः तदा चौलात्प्राक् गर्भाधानादि सी
मंतसंस्काराणामकरणजन्यप्रायश्चित्तं कृत्वा जातकर्माद्याः संस्कारास्तंत्रे

ण सर्वे स्वौपासनाग्नौ कर्तव्याः ॥ अन्यकर्तृत्वे लौकिकाग्नौ कर्तव्याः ॥ प्रायश्चि
त्तं प्रतिसंस्कारं प्राजापत्यः चूडायामर्धप्राजापत्यः ॥ आलस्यादिना लोपे द्विगु
णं प्रायश्चित्तं कृत्वा ॥ प्रधानहोमात्पूर्वं समस्तव्याहृतिभिरेकैकाज्याहुतिभिः
कार्या ॥ एवं कृते प्रायश्चित्ते तत्कर्म शक्तौ कर्तव्यं ॥ चौलं तु उपनयनात्प्राक् संस्का
रेभ्यः पृथक् ॥ उपनयनेन सह वा कार्यं ॥ चूडाकरणान्नप्राशनगोदाना
दिषु प्रधानहोमो नास्ति ॥ अनुक्तत्वात् ॥ नामकरणस्थः प्रधानहोमः
कैश्चिदनुक्रियत इति सुतरामस्तु धं ॥ प्रापकाभावात् ॥ जयादीनामु
पहोमसंज्ञा कुर्या तास्त्विकतादिषु नास्ति प्रधानहोमः ॥ इति सूचितं ॥
हो॰ २ उपप्रधानस्य समीपे क्रियंत इत्युपहोमाः ॥ यत्र नास्ति प्रधानहोमः तत्र व्या
हृत्यंतसामान्यप्रधानहोमः ॥ प्रधानहोमस्तैर्विवक्षित इति ॥ [illegible]

महे० ग्र

अतएवयुक्तोवहेत्यादिव्याहृत्संतेषुसामान्यप्रधानहोमः॥इतिशिष्टानांव्यवहार
श्चयजमानःकृतमांगलिकःप्राङ्मुखउपवेश्यस्वदक्षिणतःकुमारसहितांपत्नी
मुपवेश्याचम्यदेशकालौसंकीर्त्यममास्यकुमारस्यबीजगर्भसमुद्भवैनोनिबर्हण
द्वाराआयुर्वर्चोभिवृद्धिद्वाराचश्रीपरमेश्वरप्रीत्यर्थंचूडाकरणाख्यंकर्मकरिष्ये॥
दैतंगणेशपूजनंपुण्याहवाचनंमातृकापूजनंनांदीश्राद्धंचकरिष्ये॥इतिसंकल्प्य
कृत्वा॥उद्धननादिभूसंस्कारंविधायसभ्यनामानमोपासनमग्निंप्रतिष्ठाप्य आ
यतनेतुपरिसमूहनादिकृत्वासमित्त्रयमादायध्रुवएहीत्यादिप्राणायामांकृ
त्वाचौलहोमकर्मणियायक्ष्यमाणादेवताःस्तासर्वाःपरिग्रहीष्यामि॥जात
वेदसमग्निमिध्मेनेत्यादिव्याहृत्संतं [illegible] हुत्वा॥नात्रप्रधानहोमः॥अंग
होमंवरुणंत्वहिरित्यादिसंस्राजपांतंकृत्वाबलीकर [illegible] णांतंसर्वंसमाप्य अग्नेः

राम
४८

पश्चाद्दक्षिणतःकुमारमध्ये आचार्यउत्तरतोमाताब्रह्मचारीवाकश्चित्केश
संयमनार्थंआनडुहंगोमयंधारयन्नुपविविशति॥बहिर्मुखा आपःशीतासु
संमृज्यता आदायदक्षिणंगोदानमुंदति॥आपउदंतुजीवसेदीर्घायुत्वायव
र्चसइति॥गर्भविपृथिव्यांदीयतेस्वापार्थमंगंगोदानंतानिमनुष्येच्चत्वारितेषा
मुंदनंलैंगेनाङ्किकरणं॥तस्मिन्गोदानेऊर्ध्वाग्रान्कुशान्निदधाति॥ओषधेत्रा
यस्वेनमितितीक्ष्णंक्षुरंनिदधाति॥स्वधितेमैनंहिंसीरिति [illegible] देव
श्रूरेतानिप्रवपइतिप्रवपति॥एवमवशिष्टगोदानत्रयेपिउंदनादिवपनांतंसमा
नंकर्मवपनेएषथक्मंत्राः॥दक्षिणंवपनंकार्यं॥येनावपत्सवितक्षुरेणसोम
स्यराज्ञोवरुणस्यविद्वान्॥तेनब्रह्माणोवपतेदमस्यौर्जेमंरय्यावर्चसासं
सृजाथेतिपश्चाद्वपति॥यत्रपूषाबृहस्पतेरग्नेरिंद्रस्यचायुषेवपन्॥तेनते

महे॰ प्रयो

हुवपामि॥ अमुकशर्मन्निति संबुध्यानागृहीत्वाउत्तरतोवपति॥ यथा ज्योक्च सूर्यं दृशे॥ इतिपुरस्ताद्वपति॥ तेहूतिस्त्रः पंचवायथाप्रादेशंकुलधर्मानुसारेणचूडाकार्या॥ अथवाएकार्षेयस्यैका॥ द्व्यार्षेयस्यद्वे त्र्यार्षेयस्यतिस्रः॥ पंचार्षेयस्यपंच॥ एकान्विन्मध्येकार्या॥ द्वेचेन्मध्येपश्चात्॥ तिस्रश्चेमध्येपुरस्ताद्दक्षिणतः॥ पंचमेत्प्रतिदिशंमध्येचचूडाः कार्याकुमारस्यावश्यकः॥ कश्चितानोगोमयाच्छादितान्केशानादायगोष्ठउदुंबरेदर्भस्तंबेवा अवदंरवात्वानिदधातियन्मे पूषा बृहस्पतिः सविता सोमो अग्निः॥ तभ्योनिधानंबहुधाव्यछंन्नतराद्यावापृथिवी अपः सुवरिति॥ ततः कुनशुध्दस्नातः कुमार आचार्यादिप्रणमेत्॥ सर्पिष्मंतमोदानं नापितायदद्यात्॥

राम॥
४६

ब्राह्मणभोजनंसंकल्प्यभूयसींदक्षिणांदत्वाशिषोवाचयित्वाप्रमादात्कुर्वतांकर्मैतिकर्मसाद्गुण्यायविष्णुंस्मरेत्॥ इतिसत्याषाढहिरण्यकेशीं॰ चूडाकारणप्रयोगः॥ अथोपनयनप्रयोगः॥ छ॥ उध्द्धननादीयचतुर्थदिवसीयेसाविश्रीव्रतविसर्गांतंउपनयनं॥ उपनयनात्प्राक्॥ अंतरितान्संस्कारान्प्रारब्धेनसंस्कारेणसहतत्तत्कालनिमित्तंप्रायश्चित्तंकृत्वौलाष्टथक्सर्वान्तंत्रेणकुर्यात्॥ चौलंतुसंस्कारेभ्यःपृथक्॥ उपनयनात्प्राक्कृतेनसहैकार्यंतंत्रेणारब्धानांप्रधानातिक्रमेणभवंति॥ संप्रतिपन्नदेवताकानां तंत्रेणानुष्ठानेवैशेषिकस्यापिनावृत्तिः॥ सामन्यप्रधानादि सर्वमंग जातंसकृदेवभवति॥ गर्भाधानादिचौलांतसंस्काराणामकरणे अशक्तौप्रायश्चित्तंचौलवरिपितारितार्थत्वं॥ उपनयनादिसंस्काराणां कालातिक्रमेसति तत्कालप्रायश्चि

४७

महे० प्रयो० तं कृत्वापि संस्कारस्त्ववश्यकं कर्तव्याः॥ प्रायश्चित्तं तु जपहोमब्राह्मणभोजनगो
दानादि अन्यतमप्रत्याम्नायेन कार्यं॥ प्रणवव्याहृतिसहितया गायत्र्या सह
स्रं तिलहोमः॥ सप्रणवसमस्तव्याहृतिभिर्वा केवलेन प्रणवेन वा सहस्रं तिलहो
मः॥ अयुतं गायत्रीजपो वा॥ द्वादशब्राह्मणभोजनेन वा रुद्रैकादशिनी वा ए
कं गोदानं वा प्रत्याम्नायतीर्थयात्रा यद्वान्यदपि यथासंभवं प्रायश्चित्तं
कृत्वा [illegible] संस्कारः [illegible] कार्यः॥ ज्योतिर्विदा
र दिष्टे मुहूर्ते कुमारस्योपनयनं॥ ततः प्राग्दिने तद्दिने वा कृतमांगलिक आचा
र्यः वस्त्राच्छादिते पीठे प्राङ्मुख उपविश्य दक्षिणतः पत्नीं तद्दक्षिणतः संस्का
र्यं चापवेश्याचम्य प्राणानायम्य देशकालौ संकीर्त्य ममास्यामुकशर्मणः पुत्र
स्य द्विजत्वसिद्धिपूर्वकवेदाध्ययनाधिकारसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं

राम

४९

थि तु

प्रयेत्॥ ततः प्राश्नाति॥ आपः पुनंतु पृथिवीं पृथ्वी पूता पुनातु मां॥ पुनंतु ब्रह्मणस्पति
र्ब्रह्मपूता पुनातु मां॥ [illegible] यदुच्छिष्टमभोज्यं यद्वा दुश्चरितं मम॥ सर्वं पुनंतु मामापोस मा
तां च प्रतिग्रहं स्वाहा॥ ततः आचम्य मार्जयति॥ दधिक्राव्णो अकारिषं जिष्णोरश्व
स्य वाजिनः॥ सुरभि नो मुखा करत्प्रण आयूंषि तारिषत्॥ आपो हि ष्ठा मयोभुव
र स्तान ऊर्जे दधातन॥ महे रणाय चक्षसे॥ यो वः शिवतमो रसस्तस्य भाजयतेह नः॥ उ त
रि शतीरिव मातरः॥ तस्मा अरंगमाम वो यस्य क्षयाय जिन्वथ॥ आपो जनयथा च नः॥
हिरण्यवर्णाः शुचयः पावका यासु जातः कश्यपो यास्विंद्रः॥ अग्निं या गर्भं दधिरे वि
रूपास्ता न आपः शं स्योना भवंतु॥ यासां राजा वरुणो याति मध्ये सत्यानृते अवप
श्यं जनानां॥ मधुश्चुतः शुचयो याः पावकास्ता न आपः शं स्योना भवंतु॥ यासां
देवा दिवि कृण्वंति भक्षं या अंतरिक्षे बहुधा भवंति॥ याः पृथिवीं पयसोंदंति शुक्रा

 स्तान आश ऽऽस्योनाभवंतु ॥ शिवेनमाचक्षुषापश्यतापः शिवयातनुवोपस्पृशततचंमे

॥ सर्वा ऽऽअग्नी ऽऽरप्सुषदोहुवेवोमयिवर्चोबलमोजोनिधत्त तिचतस्रभिः पवमा
नः सुवर्जनइति ॥ चैतेनानुवाकेनमार्जयित्वा ॥ द्रुपदादिवन्मुमुचानः ॥ स्विन्नस्नातोमल
ऽऽदिव ॥ पूतंपवित्रेणेवाज्यं ॥ आपः शुंधंतुमैनसः ॥ इतिमार्जनावशिष्टआपोनुमं
त्रसजपति ॥ ततउत्थायांजलिनाजलमादायसव्यांहृतिकांगायत्रीपठित्वोर्ध्व
मुत्क्षिप्यश्रीसूर्यायेदमर्घ्यंइति वारत्रयंवारत्रयंसूर्याभिमुखंदत्वात्मानंप्रद
त्से क्षिणीकुर्वन्नसावादित्योब्रह्मेतिजपति ॥ ततआचम्यप्राणानायम्यऊर्ध्वबाहुरादि
त्यउपतिष्ठते ॥ उद्वयंतमसस्परिपश्यंतोज्योतिरुत्तरं ॥ देवंदेवत्रासूर्यमगन्मज्योति
रुत्तमं ॥ उदुत्यंजातवेदसंदेवंवहंतिकेतवः ॥ दृशेविश्वायसूर्यं ॥ चित्रंदेवानामुद
गादनीकंचक्षुर्मित्रस्यवरुणस्याग्नेः ॥ आप्राद्यावापृथिवीअंतरिक्षंसूर्यआ

त्माजगतस्तस्थुषश्च ॥ तच्चक्षुर्देवहितंपुरस्ताच्छुक्रमुच्चरत् पश्येमशरदः शतंजी
वेमशरदः शतंनंदामशरदः शतंमोदामशरदः शतंभवामशरदः शतंशृणवा
मशरदः शतंप्रब्रवामशरदः शतमजीतास्यामशरदः शतंज्योक्चसूर्यंदृशे ॥ यउ
गाम्महतोर्णवाद्विभ्राजमानः सरिरस्यमध्यात्समाव [illegible] षभोलोहिताक्षः सूर्योवि
पश्चिन्मनसापुनातु ॥ इति ॥ ततः उपविश्यप्राणानायम्य [illegible] अपउपसृ-
ष्टू ॥ अपक्रामंतुतेभूताः पिशाचाभूमिसंस्थिता ॥ येभूताविघ्नकर्तारस्तेन
श्यंतुशिवाज्ञया ॥ इतिभूशुद्धिंविधायपृथ्वित्वयाधृतालोकादेवित्वंविष्णु
नाधृता ॥ त्वंचधारयमांदेवीपवित्रंकुरुचासनं ॥ इतिप्रार्थन ॥ अंगुष्ठाग्रेतु
गोविंदंतर्जन्यांतुमहीधरं ॥ मध्यमायांहृषीकेशमनामिक्यांत्रिविक्रमं
॥ कनिष्ठिकायांन्यसेद्विष्णुंकरमध्येतुमाधवं ॥ एवंचकरविन्यासंसर्वपापप्रणा
शनं ॥ इतिकरयोः प्रत्येकंअंगुलीषुकरतलयोश्चगोविंदादिषण्नामानिन्य

म॰प्र॰ ५९

स्यपादादिभूरादिं न्यसेत् भूः पद्भ्यां नमः भुवः जानुभ्यां॰ सुवः कटिभ्यां॰ महः नाभ्ये॰
जनः हृदयाय॰ तपः कंठाय॰ सत्यं ललाटाय॰ परब्रह्म शिरसे स्वाहा तत्सवितुर्ब्रह्मा
त्मने हृदयाय॰ वरेण्यं विष्णुनात्मने शिरसे स्वाहा भर्गो देवस्य रुद्रात्मने शिखायै वौष
ट् धीमहि परमात्मने कवचाय हुं धियो यो ज्ञानात्मने नेत्रत्रयाय वौषट् प्रचोदयात्स
र्वात्मने अस्त्राय फट् तर्जन्यांगुष्ठस्फोटनेन प्रतिदिशं दिग्बंधं कृत्वा गायत्र्या गायत्री
छंदो विश्वामित्र ऋषिः सविता देवता अग्निर्मुखं ब्रह्मा शिरो विष्णुर्हृदयं रुद्रः शिखा पृथिवी
योनिः प्राणापानव्यानोदानसमाना सप्राणा श्वेतवर्णा सांख्यायनसगोत्रा गायत्री
चतुर्विंशत्यक्षरा त्रिपदा षट्कुक्षिः पंचशीर्षोपनयने विनियोगः इति पठेन गायत्र्या
छंदऋषिः सपूर्वादि ज्ञात्वा प्राणायामं कृत्वा उपात्तदुरितक्षयद्वारा श्रीपरमेश्वरप्री
त्यर्थं गायत्रीजपं करिष्ये इति संकल्प्य अष्टोत्तरशतं अष्टाविंशतिर्वा यथाशक्ति ५९

गायत्रीजपं सव्याहृतिक्रमेण कुर्यात् ॐ भूर्भुवः सुवः तत्सवितुर्वरेण्यं भर्गो दे
वस्य धीमहि धियो यो नः प्रचोदयात् इति जपेत् समाप्ते जपे तत्सवितुर्हृदया
य नम इति पुनः षडंगन्यासं कृत्वा नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च
जगद्धिताय कृष्णाय गोविंदाय नमो नमः गोविंदाय नमो नमः उत्तमे शिख
रे जाते भूम्यां पर्वतमूर्धनि ब्राह्मणेभ्यो ह्यनुज्ञाता गच्छ देवि यथासुखं स्तु
तो मया वरदा वेदमाता प्रचोदयंती पवने द्विजाता आयुः पृथिव्यां द्रविणं ब्र
ह्मवर्चसं मह्यं दत्वा प्रजातुं ब्रह्मलोकं घृणिः सूर्य आदित्यो न प्रभावात्यक्ष
रं मधु क्षरंति तद्रसं सत्यं वै तद्रसमापो ज्योती रसोऽमृतं ब्रह्म भूर्भुवः सुवरों
इति संध्यां विसृज्याचम्य प्राणानायम्य यमात्कुर्वतां कर्मेति कर्मसाद्गुण्या
य विष्णुं स्मरेत् इति मध्याह्नसंध्या अथ सायंसंध्या सायंसंध्यायां प्राक्

ष्णाकृष्णवर्णा कृष्णवस्त्रा गरुडवाहना विष्णुदेवत्या आहवनीयाग्न्युपस्था नासामवेदसं॰हिता तृतीया विष्णुसंध्या सत्यवती नाम्नी ध्याता उपात्तदुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं सायंसंध्योपास्तिं करिष्ये इति संकल्प्य ॥ उदकाभिमंत्रणांतं पूर्ववत् संध्यात्रयेपि समानं प्राशने पृथक् अग्निश्च मामन्युश्च मन्युपतयश्च मन्युकृतेभ्यः पापेभ्यो रक्षंतां यदह्ना पापमकार्षं मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना अहस्तदवलुंपतु यत्किंच दुरितं मयि इदमहं मामम्तयोनौ सत्ये ज्योतिषि जुहोमि स्वाहा इति प्राश्याचम्य दधिक्राव्ण इत्यादि गायत्रीजपांतं समाप्य प्रत्यक् उपतिष्ठते ॥ इमं मे वरुण तत्त्वा यामि त्वन्नो अग्ने स त्वन्नो अग्ने इति मंत्रान् पठित्वा यच्चि द्धि ते विशो यथा प्रदेव वरुण व्रतं मिनीमसि द्यविद्यवि यत्किंचेदं वरुण दे

व्ये जने भिद्रोहं मनुष्याश्चरामसि अचित्ती यत्तव धर्मा युयोपिम मा नस्तस्मादे नसो देव रीरिषः कितवासो यद्रिरिपुर्न दीवि यद्वा घा सत्यमुत यन्न विद्म। सर्वा ता विष्य शिथिरेव देवाथा ते स्याम वरुण प्रियासः इत्युपस्थाय या॰ सदा सर्वभू तानि स्थावराणि चराणि च सायं प्रातर्नमस्यंति सा मा संध्याभिरक्षतु प्रतीच्यै नमः प्रतीच्यै दिशे याश्च देवता एतस्यां प्रतिवसं त्येताभ्यश्च नमो नम उदीच्यै दिशे याश्च देवता एतस्यां प्रतिवसं त्येताभ्यश्च नमो नमः प्राच्यै दिशे याश्च देवता एतस्यां प्रतिवसं त्येताभ्यश्च नमो नमो दक्षिणायै दिशे याश्च देवता ए स्यां प्रतिवसं त्येताभ्य नमो नमो गंगायमुनयोर्मध्ये ये वसंति ते मे प्रसन्नात्मा नश्चिरं जीवितं वर्धयंति नमो गंगायमुनयोर्मध्ये ये वसंति ते मे प्रसन्नात्मान श्चिरं जीवितं वर्धयंति नमो गंगायमुनयोर्मुनिभ्यश्च नमो नमो गंगायमुनि भ्यश्च नमः आवांतशिशाभ्यो नमः स॰स्रवंतु हि सोम [illegible] यिसा

महे० प्रयो०

४१

मागच्छंतुसूनृताः सर्वेकामा अभियंतुनाः प्रिया अभिस्रवंतुनः प्रियाइतिदि
शउपतिष्ठते नमोब्रह्मण्यदेवाये त्या दिसुवरो मित्यंतं पाठेनसंध्यां विसृज्य
कृताचमनोविष्णुंस्मरेत् इतिसायंसंध्या अथप्रातःसंध्या प्रातःसंध्याकोमा
रिरक्तारक्तवर्णारक्तवस्त्रारक्तमाल्यानुलेपनाहंसवाहा नाब्रह्मदैवत्यागा
र्हपत्याग्निउपस्था नाऋग्वेदसं दिताप्रथमाब्रह्मसंध्यावे दवतीनाम्नी
ध्यातामम उपात्तदुरितक्षयद्वाराश्रीपरमेश्वरप्रीत्यर्थं प्रातःसंध्योपास्तिं
करिष्ये इतिसंकल्प्य आयातुवरदादेवीत्यादिजलाभिमंत्राणांतंपूर्ववत् सू
र्यश्चमामन्युश्चमन्युपतयश्चमन्युकृतेभ्यः पापेभ्योरक्षंतां यद्रात्रियापापम
कार्षं मनसावाचाहस्ताभ्यां पद्भ्यामुदरेणशिश्ना रात्रिस्तदवलुंपतु यत्किं
चदुरितंमयि इदमहंमाममृतयोनौ सूर्येज्योतिषिजुहोमिस्वाहा इतिप्रा
श्याचम्यगायत्रीजपांतंपूर्ववत् आचम्य थायमुक्लितकरःआदित्यमुप

६१

तिष्ठते मित्रस्यचर्षणीधृतश्रवोदेवस्यसानसिं सत्यं चित्रश्रवस्तमं मित्रोज
नान्यातयतिप्रजानन्मित्रोदाधारपृथिवीमुतद्यां मित्रःकृष्टीरनिमिषाभिचष्टे
सत्यायहव्यंघृतवद्विधेम प्रसमित्रमर्तो अस्तुप्र यस्वान्यस्त आदित्यशि
क्षतिव्रतेन नहन्यतेनजीयतेत्वोतोनैनमंहो अश्नोत्यंतितोनदूरात् ॥
यच्चिद्धितेविशोयथाप्रदेववरुणव्रतंमित्यासंध्यांविसर्गंकृत्वा चम्यप्रा दि
णायम्यप्रमादात्कुर्वतांकर्मेतिकर्मसाद्गुण्यायविष्णुंस्मरेत् इतिप्रातःसंध्या
अथाग्निकार्यं [illegible] सायमुपक्रम्यउभौकालौसायंसायंवाकरोति
ब्रह्मचारीआचम्यउपात्तदुरितक्षयार्थंसयमग्निकार्यंकरिष्ये इतिसंकल्प्य
यथाहृतह्रसवेगोर्यमितिपरिसमूह्यपरिस्तीर्य अदितेनुमन्यस्वेति
पूर्ववत्सरिषेकंकृत्वा अष्टौसमिध आदायव्यस्तमस्ताभिर्व्याहृतिभि

म२

म्य

श्व

महेश०प्र०स्त्रिस्त्रः समस्ताभिश्चैकेतिचतस्रोहुत्वाउत्तरतुर्भिर्मत्रैश्चतस्रोजुहोति॥

६२ एषाते अग्नेसमित्तयावर्धस्वचाचप्यायस्व वर्धिषीमहिचवयमाचप्या
सिषीमहिस्वाहा अग्नयइदं० मे धांमइड्रोद दातुमे धांदेवी स रस्व
तीमे धांमे अश्विनावुभावाधत्तांपुष्करस्त्रजौस्वाहा [illegible] इंद्रा
यसरस्वत्या अश्विभ्यामिदं० अप्सरासु चयामे धागं धर्वेषु चयन्म
नः दैवींमेधामनुष्यजा सामांमेधासुरभिर्जुषता॰ स्वाहा मेधा
याइदं० आमांमेधासुरभिर्विश्वरूपाहिरण्यवर्णाजगतीजगम्या॥
ऊर्जस्वतीपयसापिन्वमानासामां धासुरभिर्जुषता॰ स्वाहा मेधा
याइदं पूर्ववत्परिसमूह्यपरिषेक विसर्गंकृत्वाग्निमुपतिष्ठते॥ ६२

नीर

यत्ते अग्नेतेजस्तेनाहंतेजस्वीभूयासंयत्ते अग्नेवर्चस्तेनाहंवर्चस्वीभूयासंय
त्ते अग्नेहरस्तेनाह॰ हरस्वीभूयासं मयिमेधांमयिप्रजांमय्यग्निस्तेजोद
म धातुमयिमेधांमयिप्रजांमयीद्रइंद्रियंदधातुमयिमेधांमयिप्रजांमयि
सूर्योभ्राजोदधातिति त्र्यायुषंजमदग्नेःकश्यपस्यत्र्यायुषंयद्देवानांत्र्या
त्र्यायुष४ युषंतन्नोअस्तुमित्याचारात् भस्मधृत्वा श्रधांमेधांयशःप्रज्ञांविद्यांबुद्धिं
श्रियंबलं आयुष्यंतेज आरोग्यंदेहिमेहव्यवाहनेत्यग्निंसंप्रार्थ्यप्रमादा
कुर्वतांकर्मेतिकर्मसाद्गुण्यायविष्णुंस्मरेत् ततअग्निकार्यं॥ ६६ २२
ततउक्तप्रकारेणोपसंग्रहणमभिवादनंकार्यं ब्रह्मचारीअन्योवासव्यान्वा
रब्धंदक्षिणंबाहुंश्रोत्रसमंप्रसार्योक्तप्रकारेणस्वयंनिहितान्गुर्वादीन्प्र
त्यभिवादनज्ञाभिवादयेदन्यान्नमस्कुर्यादेव अथभोजनविधिः आयुष्का

ना

महे० प० मः प्राङ्मुखः श्रीकामः प्रत्यङ्मुखः कार्तिकामो दक्षिणाभिमुखः

पित्र्यं विनानोदङ्मुखः कदाचनेत्यभिसंधायोपविश्य वामहस्तेन भोजनपात्रं
धृत्वापरहस्तेन जलमादाय परितः सिंचति ऋतं त्वा सत्येन परिषिंचामीति सा
यं परिषिंचति सत्यं त्वर्तेन परिषिंचामीति प्रातः एवं सर्वतोन्नं परिषिच्य व्याहृ
तिभिश्चतुष्टयेन भूमावाहुतिचतुष्टयं दत्वान्नमभिमंत्रयति अन्नपतेन्नस्य नो दे
ह्यनमीवस्य शुष्मिणः प्रप्रदातारं तारिष ऊर्जं नो धेहि द्विपदे चतुष्पद इति इति
गोकर्णाकृतिकृतहस्ते माषमात्रजलमादायांगुष्ठमूलेन अमृतोपस्तरणमसी
ति सकृदाचम्य प्राणादिभ्यः स्वाहांतेभ्यः पंचाहुतयः मुक्तकनिष्ठिकेन करेणा
न्नस्य मुखे जुहोति प्राणाय स्वाहेत्यादि इदं प्राणाग्निहोत्रं प्राणापानव्याना
दानसमानानां विहितमपि सैवैराचाराक्रियते क्षारलवणमाषमुद्गादिभ्या
र्जमन्नं कांस्यादिव्यतिरिक्ते पात्रे मौनेन भुक्त्वा अमृतापिधानमसीत्युत्तरापो

शनं कृत्वा शुद्धाचमनो [illegible] त्तरं द्विराचम्याग्निसंनिधौ वसेत् चतुर्थीय
दिवसीयव्रतविसर्गांतमग्निधारणं कार्यं चतुर्थदिवसे प्रातराचार्यः कृतनि
त्यक्रियः ब्रह्मचारीसहिताः प्राङ्मुख उपविश्य देशकालौ संकीर्त्य उपनय
नांगं त्रिवृदन्नहोमं पुण्याहवाचनं च करिष्य इति संकल्प्य आचार्य एवं कुर्यात्
अत्र केचिदाहुः व्यहव्रतं चरतीत्यतो ब्रह्मचारिप्रकरणे नोपस्थितत्वा दे
त् व्रतविसर्गे चावश्यकत्वात् सत्ययेन कर्तृत्वाल्लाभाच्चासिकु चतुर्थे
दिनकृत्यं ब्रह्मचारीकर्तृकमिति तच्च तथैवेत्यतिदेशे पुण्याहांतः त्रिवृ
दन्नहोम आचार्यकर्तृको तिदृष्टतस्य च ब्रह्मचार्यवांतरप्रकरणप्राप्तत्वे
नबलवत्वात् समानकर्तृत्वस्यौत्सर्गिकत्वात् पुण्याहं वाचयित्वा व्यहं व्रतं
चरतीत्यावृद्धिवानंतर्यमात्रार्थत्वदर्शनात् ब्रह्मचारिस्यावेद्यत्वात् सर्व
माचार्यकर्तृकं यावदुक्तमेव कुमारस्यावेद्यत्वामितिमा[illegible]त्वद तोत्केश्च ॥

पुंण्याहवाचनांतं त्रिवृदन्नहोमककर्ता आचार्य एव न ब्रह्मचारी किंच व्रतग्र
हणसाक्षाद्विध्यभावात् व्रतं चरिष्यामि इति लिंगात् ब्रह्मचर्यादिव्रतग्र
हणं बुद्धः कुर्यादित्येवं विधिः कृत्स्नं त्रिवृदन्नहोमम[illegible]पि बुद्धः कुर्यादिति न
ब्रह्मचारी त्रिवृदन्नहोमकर्ता न च तथैवेत्यतिदेशादेव पुण्याहांतसर्वत्रिवृदन्न
होमप्राप्तौ त्रिवृतान्नेनेत्याद्यंशानुवादो व्यर्थ इति वाच्यं तस्य पूर्वोत्तरावध्यर्थाद
व्याख्यातश्चायमर्थो मातृदत्ताचार्यैः तथैवेत्येतावति क्रियमाणे सर्वमुपनय
नसमावर्तनतत्श्च नेष्टमित्यादिनाग्रंथेन किंच यदि ब्रह्मचारिकर्तृकहोम इष्ट
स्यात् परिषेचनवचनादेव सिद्धे होमे अतिदेशवचनमनर्थकं स्यात् पूर्वत्र होमे दृष्ट
स्योपनयनाद्यैरतिदेशार्थं तत्तर्हि निर्णीत एव तत्राचार्यः कर्तास च न्यायादत्र
प्राप्तोपि नातिदिश्यत इ[illegible]स्तत्रायुष्मतां शयथा न एव शरणं व्याख्यातं वदन्ति ६४

त्रिः प्राह पूज्यः स्वाचमनीयमित्युक्त्वा अमृतोपस्तरणमसीति सकृदर्धजलमाचा
मति नो वृश्रुवेधामनं पूजको मधुपर्कमादाय मधुपर्कमिति त्रिः प्राह पूज्यः सु
मधुपर्क इत्युक्त्वा हस्ताभ्यामाकाशांजलिना प्रतिगृह्णाति देवस्यत्वेत्यादि प्रतिगृ
ह्णामीत्यंतेन ततस्तं पृथिव्यां प्रतिष्ठापयति पृथिव्यास्त्वा नाभौ सादयामीडायाः
पदे इति दक्षिणकरस्यांगुष्ठेनोपमध्यमया च सकृदुक्तेन मंत्रेण प्रदक्षिणं त्रि
रालोडयति यन्मधुनो मधव्यं परममन्नाद्यं रूपं तेनाहं मधुनो मधव्येन
परमेण रूपेण परमो मधव्यो न्नादो भूयासमिति ततो मंत्रावृत्त्यांगुष्ठोपम
ध्यमा[illegible]भ्यामेव त्रिः प्राश्नाति तेजसे त्वा श्रियै यशसे बलायान्नाद्याय प्राश्ना

मि इति रातयैतैरुच्छिष्टं प्रदाय अथवा विसर्वं प्राश्य ततः अमृतापिधानमसी
ति आचमनशेषेण सकृदाचम्य मुखं प्रक्षा[illegible]ल्य विधिवदाचामति ततः पू

म०प्र० जकः गौरितित्रिःप्राह पूज्यः सुगौरीरस्यक्ता गामुत्सृजति गौर्धेनुर्भव्यामा
तारुद्राणांदुहितावसूनां स्वसादित्यानाममृतस्यनाभिः प्रणुवोचंचिकितुषेज
नायमागामनागामदितिंवधिष्ट पिबतूदकंतृणान्यत्तु ओमुत्सृजतेति॥

८० ततःपूजकः सिद्धमन्नमुत्तममितित्रिःप्राह पूज्यः तत्सुभूतं विराडन्नंतन्मोक्षायै
तन्मेशीयतन्मऊर्जंधात्तत्सुभूतमितित्याह पुनःपूज्यआह ब्राह्मणान्भोजय
तेति ततःपूजकः ब्राह्मणभुक्तशेषमन्नंपूज्यायददातु प्राणप्रतिगृह्णातु॥
प्राणस्त्वाश्नातु प्राणःपिबत्विति ततोयावत्काममश्नाति इंद्राग्नीमेवर्चःकृ
णुतांवर्चःसोमोबृहस्पतिः वर्चोमेविश्वेदेवावर्चोमेधत्तमश्विना इति ततःक

तस्मिं स्मिन्नेनावसथेरात्रिमेकांस्थित्वास्वगृहंगच्छति यदातुपित्रादिरध्यापयति
तदाग्रामाद्बहिर्नद्यादौगोष्ठेवाविधिवत्स्नानेनछत्रधारणांतकर्मानंतरंयथा
यानमारुह्यपितृगृहमागत्यतदापित्रादिरेवमधुपर्केणार्हयति पितैवेनंमधु ८
६४ पूज्यस्तत्प्रतिगृह्णाति॥ द्यौस्त्वेददातु॥ पृथिवीप्रतिगृह्णातुपृथिवीतेदत्त्व

र्केणार्हयेदितिनामस्मरणात् ततःकर्मांगंब्राह्मणभोजनंदक्षिणांचदत्त्वा प्रमा
दात्कुर्वतांकर्मेतिकर्मसांद्गुण्यायविष्णुंस्मरेत् यदिरथंगजाश्वारोहणंहिरण्मु
पस्थानंपूजकनीरीक्षणंवसनंप्रमुक्तं तत्स मावर्तनांगत्वात्स्नातकस्यैवभव
ति अथास्मा आवसथमित्यथशब्दादधिकारवचनात् ऋत्विगाचार्य श्वशु
रमातुलविवाह्यादिनामेवमधुपर्कपूजाकार्या इतिसत्याषाढहिरण्यकेशी
स्मार्तप्रयोगरत्नेप्रथमसंस्कारप्रकरणवैशंपायनमहेशभट्टकृतेतौसमाव
र्तनप्रयोगः॥ अथविवाहप्रयोगः कन्यावरणवाङ्निश्चयोनांदीश्राद्धादिकं
चवरपित्राक्रियते तत्रकन्यादानादिकंकन्यापित्रा विवाहहोमादिकंच
वरेण अंगंवाप्रधानंवायस्ययद्विहितःप्राप्तंतत्तेनक्रियते इत्यनेनकर्तृ
ककर्मसमुदायविशेषोविवाहसंस्कारः तेनकन्यापुत्रयोःसंस्कारोभव
ति विवाहस्यास्तिगर्भाधानादिसंस्कारेषुअंतर्भावः तथाहि स्वपित्राद्यः

मं०प्र० पिता दद्यात्सूतसंस्कारकर्मसु ॥ पिंडानोद्वाहनात्तेषांतस्याभावे तु तत्क्रमादि
ति इदंवचनंखंडशोनिबंधकारैः प्रयोगपारिजातेच व्याख्यातं प्रकृतोपयोगी
किंचिदुच्यते पिंडानाउद्वाहनात् उद्वाहं अभिव्याप्यगर्भाधानादिविवाहांतसू
तसंस्कारकर्मसु पितास्वपितृत्वोदद्यादितिसूतशब्देनपुत्र्यपिगृह्यते विवाह
श्चावश्यंसुतादीनांसंस्कारोभवति उपस्थितेविवाहे अमुकस्यविवाहसंस्कारंक
रिष्यइतिसंकल्प्यस्त्ववश्यंकार्यः पित्रादयःसंस्कारकाः पुत्रादयःसंस्कार्याः
विवाहश्चसंस्कारइति नबुध्यंतेभ्रांतानकुर्वंति प्रयोगपारैर्नलिखितं तेषामा
नुष्ठितिविस्मरणंवामूलमिति विवाहसंकल्पमारभ्यचतुर्थीहोमांतोवागृ
हप्रवेशस्थालीपाकांतोवाद्विविधोवाविवाहः तत्रपाणिग्रहणंप्रधानं पा
णिग्रहणंहिसत्वमिति धर्मस्मरणात् शाखांतरीयंकन्यावरणादिकंस्वक
स्यविवाहितंगृहप्रवेशादिवागमेच प्रथमपक्षे पाणिग्रहणप्रभृत्यौपासन ८१

होमः त्रिरात्रव्रतं ॥ पाणिग्रहणदिनमारभ्यैव तृतीयाह्नस्त्रिभागशेषायां रात्रौ
चतुर्थीकर्मचभवति गृहप्रवेशकर्मसु विवाहहोमाद्युक्तमेव दूरदेशत्वेन अ
शक्तोचतुर्थीहोमात्पूर्वंपश्चाद्वास्वगृहगत्वैवकर्तव्यं अथगृहप्रवेशांतोविवाह
इतिद्वितीयःपक्षः तत्रगृहप्रवेशीयस्थालीपाकानांनैमौपासनोपक्रमः नपूर्वो र
पाणिग्रहणप्रभृतिगृहप्रवेशकर्मांतरंदिनत्रयंत्रि[illegible]रात्रव्रतं गृहप्रवेशादि
नमारभ्यैवतृतीयस्याह्नस्त्रिभागशेषायांरात्रौचतुर्थीकर्म संगमार्थीविवोने
हांगं द्विविधेपिविवाहेपार्वणस्थालीपाकः पर्वण्यागतेपिगृहप्रवेशीय
स्थालीपाकानंतरमेवचतुर्थीहोमात्पूर्वमपिभवति सर्वस्थालीपाकानांत्र
प्रतिर्गृहप्रवेशस्थालीपाकः इदंचपक्षद्वयंनिर्णीर्ध्वग्रहणव्याख्यानव्य
वस्थयाविवाहकरणेवृत्तिकृतादर्शितमित्यलंविस्तरेण अथकन्यावरणं ॥

म॰ हे

ज्योतिर्विदादिष्टे विवाहनक्षत्रयुते शुभे काले द्वौ चत्वारो ष्टौ दश वा ब्राह्मणाः
प्रशस्तवेषाः वरेण तत्पित्रादिना सहिताः अनृक्षरा ऋजवः संतु पंथा येभिः सखा
यो यंति नो वरेयं ॥ समर्यमा सं भगो नो निनीयात् संस्पत्यं सुयममस्तु देवाः ॥ जा
इति मंत्रपाठपुरःसरं प्रेषिताः मंगलद्रव्य तांबूलवस्त्राभरणयुत प्रश
स्तवेषाभिः पुरंध्रिभिः सह वाद्यादित्रगीतनिस्वनेन वरे युतास्तदनु तावत्कन्यागृ
हमेयः शुभे वस्त्राच्छादिते पीठे प्राङ्मुखीं सालंकृतां स्ववेषां कन्यामुपवेश्य गंध
तांबूलादि हस्ते दत्वा तत्पित्रादयः गणपतिपूजनपूर्वकं प्राङ्मुखासीनाः अमुकप्र
वरान्विता[illegible]यामुकगोत्रोत्पन्नायामुकप्रपौत्रायामुकपौत्रायामुकपुत्रायामु
कपुत्रायामुकशर्मणे वराय ततः अमुकप्रवरोपेतामुकगोत्रोत्पन्नामुमेकप्र
पौत्रीममुकपौत्रीममुकशर्मणो मम पुत्रीममुकनाम्नीं कन्यां भार्यात्वाय वृणीमहे

५२ ८२

कन्यां वामत उपवेश्य

इति ब्रूयुः अथ कन्यादाता भार्या ज्ञातिबंधुमनुमतं कृत्वा यथोक्तमनूद्या वा वृणी
ध्वमिति वदेत् एवं पुनर्द्विः प्रयुज्य प्रदास्यामीत्युश्च त्रिर्वदेत् ततो वरपित्रादि
गंधाक्षतशुभ्रवस्त्र[illegible]युग्म भूषण तांबूल पुष्पादिभिः कन्यां पूजयेत्
संप्रदायागतमंत्रैः इति बोधायनोक्त कन्यावरणं अथ वाग्दानं कन्यादाता
प्राङ्मुख उपविश्याचम्य प्राणानायम्य देशकालौ संकीर्त्य करिष्यमाणविवाहां
गभूतं वाग्दानमहं करिष्ये [illegible] तदंगं गणपतिपूजनमहं करिष्ये इति
संकल्प्य गंधादिदक्षिणांतोपचारैर्गणपतिं संपूज्य यथाचारं कलशपूजनादि
कृत्वा स्वस्थाने कन्यापूजयितारमुपवेश्य स्वयं तस्याभ्यां प्राङ्मुख उपवि
श्य गंधतांबूलादिना पूजयेत् स च दातारं तौ च स्वस्वेष्टस्य वान्योन्यं य
थाचारं गंधादि दापयित्वा गृह्णीयातां ततो हरिद्राखंड पंच द्वे पूगफ

म० प्र० लानि वगंधाक्षतसहितान्याचाराद्गृहीत्वा अमुकप्रवरान्वितायामुकगोत्रोत्पन्नायामुकप्रपौत्र्यायामुकपौत्र्यामुकपुत्र्यायामुकशर्मणे वराय अमुकप्रवरोपेतामुकगोत्रोत्पन्नाममुकप्रपौत्रीममुकपौत्रीममुकपुत्रीममुकनाम्नी कन्यां ज्योतिर्विदादिष्टमुहूर्ते दास्ये वाचा संप्रददेति वोक्त्वा अव्यंगे पतितेऽक्लीबे दशदोषविवर्जिते इमां कन्यां प्रदास्यामि देवाग्निद्विजसन्निधौ इति पठित्वा वरपित्रादिवस्त्रप्रांते तानि पूगफलानि प्रक्षिप्य नेयं प्रजामितिप्रतिष्ठा मंत्रेण वस्त्रप्रांते बध्वा ग्रथिं चंदनाद्यर्चयेत् ततो हरिद्राखंडपंच पूगफलानि तथैव वरपित्रादिः कृत्वा अमुकप्रवरान्वितामुकगोत्रोत्पन्नामुकवरविषये भवंतो निश्चिता भवंतु इति दत्वा वस्त्रप्रांते प्रक्षेपादिकं कुर्यात् ततः कन्यादाता वाग्दत्तामयाकन्यापुत्रार्थं स्वीकृतात्वया कन्यावलोकनविधौ निश्चि

८२

तस्त्वं सुखी भव इति वरपितरं प्रतिपठेत् स च वाग्दत्ता त्वया कन्यापुत्रार्थं स्वीकृता मया वरावलोकनविधौ निश्चितस्त्वं सुखी भव इति कन्यापितरं प्रतिपठेत् भार्यादौ स्वीकर्तरि भार्यार्थं मित्रर्थं इत्यूहः कर्तव्यः ब्राह्मणाः शिवा आपः संतु सौमनस्यमस्तु अक्षतं चारिष्टं चास्तु एतद्वः समृद्धिरस्तु इत्युक्त्वा विवाहसौभाग्याद्यभिवृध्यर्थं शचीपूजनमहं करिष्ये इति संकल्प्य पात्रस्थसिततंडुलपुंजे शचीमावाह्य षोडशोपचारैः पंचोपचारैर्वा संपूज्य ॥ देवेंद्राणि नमस्तुभ्यं देवेंद्रप्रियभामिनि विवाहं भाग्यमारोग्यं पुत्रलाभं च देहि मे इति शचीं प्रार्थ्य सुवासिनीभिर्मांगलिकं कार्यं विप्राश्च गंधताम्बूलादिभिः [illegible] पूजिताः आशीर्मंत्रान्पठेयुः सौभाग्य[illegible]ःपदं तान् तैश्च सम्मिलन्स्य श्रूयमाणः पुता

नीराजनादि ३

म० प्र

रस्ताद्ब्रह्मन्वन्वानो अजरं सुवीरं ॥ आरे अस्मदमतिं बाधमान उच्छ्रय
स्व महते सौभगाय ॥ वनस्पते शतवल्शो विरोह सहस्रवल्शा वि वयं रु
हेम ॥ यं त्वायं स्वधितिस्तेतिजानः प्रणिनाय महते सौभगाय ॥ संदिव्ये
न दीदिहि रोचनेन विश्वा आभाहि प्रदिशः पृथिव्याः ॥ संचेध्यस्वाग्ने प्र च
बोधयैनमुच्च तिष्ठ महते सौभगाय ॥ बृहस्पते सवितर्बोधयैनं संशितं चित्सं
तरां संशिशाधि ॥ वर्धयैनं महते सौभगाय ॥ चतुःशिखंडा युवतिः सुपेशा
घृतप्रतीका भुवनस्य मध्ये ॥ मर्मृज्यमाना महते सौभगाय नर्यप्रजां मित्रा राम्
द्यश्च ततो गंधतांबूलदक्षिणादिभिः ब्राह्मणान्संपूज्य तेभ्यश्चाशिषो ग्रा
ह्याः अस्मे देवा इत्याद्याः ॥ इति वाग्दानप्रयोगः ॥ छ ॥ छ ॥ ततो यथाकालं वै
वाहिके शुभे मुहूर्ते वधूवरयोस्तैलहरिद्रारोपणादि यथाचारं कार्यं ॥ छ

अथ गृहांगणे षोडश द्वादश अष्ट वा सपर्वा सप्र द्वारिम [illegible] ण्डपः कार्यः तत्र सद्मवा
मध्यभागे संस्कार्यस्य चतुर्हस्तायतां हस्तमात्रोच्छ्रायां सुलक्षणां वेदिः कार्या ततो
वधूपिता वरपिता च विवाहदिनात्पूर्वेद्युः तद्दिने वा पूर्वाह्णे पत्नीसहितः कृताभ्यंगः
कृतमांगलिकवेषः कृतलेपनं रंगमांगलिकं गणे शुभासने प्राङ्मुख उपविश्य स्वदक्षि
णतः पत्नीं तद्दक्षिणतः संस्कार्यं चोपवेश्याचम्य प्राणानायम्य इष्टदेवतागुर्वादिन
मस्कारं कृत्वा देशकालौ संकीर्त्य ममास्यामुकशर्मणः पुत्रस्यामुकना [illegible] म्न्याः
कन्यकायाः भ्रातृपुत्रस्य वा विवाहसंस्कारं करिष्ये ॥ तदंगं गणपतिपूजनं पुण्या
हवाचनं मातृकापूजनं नांदीश्राद्धं ग्रहाणामानुकूल्यार्थं नवग्रहमखं मण्डप
देवताकुलदेवताप्रतिष्ठास्थापनपूजनं च करिष्ये ॥ इति संकल्प्य उक्तरीत्या गणपति पू
पूजनं पुण्याहवाचनं कृत्वा नांदीश्राद्धांते सर्वं अविघ्नसंज्ञक गणपतिं कलशे आवाह्य

म० हे० वस्त्राच्छिन्नवंशपात्रस्थतंडुलपुंजेषु गौर्यादिषोडश ब्राह्म्यादिसप्तमातृकाः कुलदे
वतागणपतिसहिताः उपनयनोक्तरीत्या पूजयित्वा नांदीश्राद्धं च तत्रोक्तमंडपदेवता
७९ प्रतिष्ठां मंडपे विधाय मंडपात्प्रागेव गौर्यादिस्थापितवंशपात्रे वा कृत्वा तद्वंशपात्रं
८९ स्वयं गृहीत्वा अविघ्नपकलशं पत्न्या ग्राहयित्वा इयमेव सा या प्रथमा व्यौच्छ
दंतरस्यां चरति प्रविष्टा वधूर्जजान नवगज्जनित्री त्रय एनां महिमानः सचंते इति मंत्रं
पठन् गृहांतः पूजितदेशे नीत्वा नये प्रजामिति प्रतिष्ठाप्य यावन्मंडपोद्वासनं प्रत्य
हं पूजयेत् अन्यत्तमपि यथाकुलधर्मं सर्वं कुर्यात् ततो विवाहांगदेवताकु
का लदेवताप्रीत्यर्थं च द्विजसुवासिनीकुमारीं दीन्यथाकुलाचारं यथोपपन्नेना
न्नेन भोजयेत् अथ वरस्य वधूगृहगमनं वरः नित्यक्रियः स्वलंकृतः स्वस्वी
इष्टदेवतागुर्वादींश्च नमस्कृत्य तैरनुज्ञातो यथाविभवमश्वादियानं तु ७९

८९ प

च्छीमारुह्य धृतछत्रः सर्त्विक्सो ज्ञातिबांधवैः कनिक्रदादिमंगलसूक्तपठनैः ब्रा
ह्मणैः पुरंध्रीभिः पूर्णकलशदर्पणकन्यापुष्पाक्षतादीपमालाध्वजलाजैः लांगल
तूर्यघोषैश्च सह वधूवरगृहमेत्य ततो नीराजित अंतर्गृहं प्रविश्य मंडपाधः
सम्यगास्तृते पीठे प्राङ्मुख उपविशेत् अथ मधुपर्कादिना वरस्य पूजा ॥ कन्या
रव दाता उदङ्मुख उपविश्याचम्य प्राणानायम्य देशकालौ संकीर्त्य विवाहार्थमुप
वरं स्थितं मधुपर्केण पूजयिष्ये इति संकल्प्य कुर्यात् कूर्चादिसकलमधुपर्क
सामग्रीमासाद्य पूज्य शाखया समावर्तनोक्तरीत्या मधुपर्केण पूजां कु
र्यात् ॥ अस्य वरस्य विवाह्यत्वेन मधुपर्कपूजा शाखांतरे मधुपर्कार्हेषु विवाह्यस्य पृ
थक् उपादानात् स्नातकस्य तु स्नानादिवसे यद्गृहं गच्छति स कुर्यात् ॥ अन्यथा
सर्वेषां स्नातकत्वेन अतिप्रसंगः स्यात् अथ कन्या स्नाता परिधृता हतवस्त्रा

म० ६

गृहांतः पूजितस्थाने सूत्रवेष्टितो पलसदृित तदृषदुपरि हरिद्रानिर्मितो गौरी
हरौ सौभाग्यादिकामनया पूजयित्वा देवेंद्राणीं तत्रैवाक्षतपुंजे पूजयित्वा
प्रार्थयेत् देवेंद्राणि नमस्तुभ्यं देवेंद्रप्रियभामिनि ॥ विवाहं भाग्यमारो
ग्यं पुत्रलाभं च देहि मे ॥ ततो गौरी सौभाग्यादि प्रार्थ्यमाना तत्रैव तिष्ठेत् ॥
ततो ब्राह्मणास्वलंकृते वेश्मनि वाद्यादिघोषे च क्रियमाणे सुलग्न समे
ये [illegible] पूर्वापरभागयोर्धान्यराशी कृत्वा कुंकुमकृतस्वस्तिकांकितमंतः
पटं राश्योर्मध्ये ध्यारुह्यो तरदशं धारयेयुः पूर्वराशौ अभ्यानि प्रस [illegible] ङ्मुखीं क
न्यां पश्चिमराशौ पीठे प्राङ्मुखमेव वरं कृत्वा तंदुलजीरकयुतां जलिउभावनुस्था
प्यद्विजा मंत्रपठनं पुरं [illegible] मगलगीतिकुर्युः वधूवरौ मनसेष्टदेवतां ध्यायंतौ
समाहितौ तिष्ठतां ॥ ततो ज्योतिर्विदादिष्टमंगलपद्यपाठपूर्वकं वैतदेव लग्नमि

तिपठिते प्रदिष्टे काले सुमुहूर्ते मस्त्विति स्वस्तिसंघो ततः पटं उदगग्रं प्रसार्य वधूवरा
भ्यां परस्परं नीक्षणं परस्परस्मिन् जलिस्थ तंदुलजीरकाविक्किरणं कन्यापूर्वं
कार्यमाचारात् विवाहपाणिग्रहणं प्रधानं तद्यथा सुमुहूर्ते भवति तथा
कर्तव्यं शोभार्थस्त्वस्याक्षकं वादिब्राह्मणरखंडामठेत् ततस्त्रिवारं पंचवा
रं [illegible] वा [illegible] पीनाक्षतरोपणं वरपूर्वकं कुर्वंति अथ कन्यादानं कन्यादाता
वरदत्तवस्त्राभरणादिरहितां स्वदेयाभरणाद्यलंकृतां अहतवस्त्रकृत
परिधानां कन्यां वराय दद्यात् तत्रायं क्रमः दाता वधूदक्षिणतउदङ्मुख उपवि
श्य स्वदक्षिणतः पत्नीमुपवेश्याचम्य प्राणायम्य देशकालौ संकीर्त्य मम सम
स्तपितॄणां निरयति शयसानंदब्रह्मलोकावाप्त्यादिकं न्यादानकल्पोक्तफ
लावाप्तये अनेन वरेणास्यां कन्यायामुत्पादयिष्यमाणसंतत्या द्वादश वरान् द्वा

प्रतिपा

म.हे.०प्र दशपरान्पुरुषान्पवित्रीकर्तुं आत्मनश्च लक्ष्मीनारायणप्रीतये ब्राह्मविवाहविधि

८७ नाकन्याप्रतिपादनमहं करिष्ये इतिकल्प्य सपत्निकउत्थायो दङ्मुखएवं
कन्यासंगृह्य कन्याकनकसंपन्नां कनकाभरणैर्युतां ॥ दास्यामिविष्णवे तुभ्यं
ब्रह्मलोकजिगीषया विश्वंभरः सर्वभूताः साक्षिण्यः सर्वदेवताः इमांकन्यां
प्रदास्यामिपितॄणां तारणायच इतिमंत्रोपाठित्वा कांस्यपात्रेकन्यांजस्यु
परिस्थवरांजलि दक्षिणेहस्ते भार्यादत्त संततजलधारोदकंक्षिपन्वदन्
कन्यातारयतु ॥ पुण्यंवर्धतां ॥ शिवा आपः संतु सौमनस्यमस्तु अक्षतंचारिष्टं
चास्तुदीर्घमायुश्रेयः शांतिःपुष्टिःस्तुष्टिश्चास्तु यत्श्रेयस्तदस्तु यत्पा
पंतत्प्रतिहतमस्तु पुण्याहंभवन्तु स्वस्तिंभवन्तोब्रुवंतु ऋद्धिंभवंतो

ब्रुवंतु। [illegible] ॥ श्रीरस्त्वितिभवंतोब्रुवंतु ओंमपुण्याहमितिवरो
वदेत् दाता अग्निःप्रियतामित्युक्त्वा अमुकप्रवरान्वितामुकगोत्रोमुकश
र्माहं ममसमस्तेत्यादि। प्रीतयेइत्यंतमुक्त्वा अमुकप्रवरोपेतायामुकगो
त्रोत्पन्नायामुकप्रपौत्रायामुकपौत्रायामुकपुत्रायामुकशर्मणेकन्यार्थि
नेश्रीधररूपिणेवराय अमुकप्रवरोपेतामुकगोत्रोत्पन्नाममुकप्रपौत्री
ममकपौत्रीममुकशर्मणोममपुत्रीममुकनाम्नीं कन्यां वरार्थिनेंश्रीरूपि
णींप्रजापतिदैवत्यांप्रजासहत्वकर्मभ्यस्तुभ्यमहंप्रपादये धर्मेचार्थे
चकामेचनातिचरितव्या त्वयेयं इत्युक्त्वादद्यात् ततोवरः ओंतथेतिप्र
तिगृह्णाति एवंकन्यातारयतित्यादि ओंतथेत्यंतंवारत्रयमुक्त्वा कंन्या

म०प्र० प्रतिपन्नं कार्यं अत्र धर्मार्थ कामरूप लेपे त्रयो दोषे नैके [illegible] कन्याप्रतिदान
स्य धर्मेषु कृत्वा स्वप्रतिबंधप्रदानत्वेन दातुर्न ममेति त्यागः ।। प्रतिगृहीतुः
७८ प्रतिग्रहणमंत्रश्रवणं भवति ततो दाता गौरीं कन्यामिमां विप्र यथाशक्ति वि
८८ भूषितां ।। गोत्राय शर्मणे तुभ्यं दत्तां विप्र समाश्रय ।। कन्ये ममाग्रतो भूयाः
कन्ये मे देवि पार्श्वयोः कन्ये मे पृष्ठतो भूयास्त्वद्दानान्मोक्षमाप्नुयात् म
ता म वंशकुले जाता पालिता वत्सराष्टकं तुभ्यं विप्र मया दत्ता पुत्रपौत्र प्रवर्धि
नीं इति पठित्वा ततः कन्याप्रतिपादनस्य सांगतासिद्ध्यर्थं यथाशक्ति
दक्षिणां संप्रददे इत्युक्त्वा वरहस्ते दत्वा न ममेति वदेत् ततो वरः देव
स्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णामि राजा त्वा
वरुणा नयतु देवि दक्षिणेऽग्नये हिरण्यं तेनामृतत्वमश्यां वयो दात्रे मयो ७८

[illegible]भ्यं मह्यमस्तु प्रतिगृहीत्रे क इदं कस्मा अदात् कामः कामाय कामो दाता कामः प्रतिगृही
त्रेता कामं समुद्रमाविश कामेन त्वा प्रतिगृह्णामि कामैतत्त एषा ते काम दक्षिणो
त्तानस्त्वांगीरसः प्रतिगृह्णात्विति पठित्वा स्वस्ति वदेत् ततो दाता जलपात्र भो
जनपात्र गो महिषी गज दासी दास भू वाहनालंकारादि यथाविभव कन्या नपू
र्वकं वराय दद्यात् तत्र मंत्राः यज्ञसाधनभूता या विश्वस्याघौघनाशिनी ।।
विश्वरूपधरो देवः प्रीयतामनया गवा ।। गोः सर्व सस्याश्रया भूमिर्वराहेण
समुद्धृता अनंतसस्यफलदा मतः शांतिं प्रयच्छ मे भूमेः इयं दासी मया तु
[illegible]भ्यं श्रीवत्स प्रतिपादिता सर्वकर्मकरी भोग्या यथेष्टं त्वं समश्नुते दास्याः
अनन्यं शयनं नित्यमनंतं नाभ्रियमुन्नतिं सौभाग्यं देहि मे नित्यं शय्यादाने

मेनकेशव शय्यायाः हिरंण्यगर्भसंभूतंसौवर्णवांगुलीयकं॥ सर्वप्रदंप्र
यच्छामिप्रीणातुकमलापतिः अंगुलीयकस्य क्षीरोदमथनपूर्वमुध्द्तंकुड
लद्वयं [illegible] श्रीयासहसमुद्भूतंददश्री
:श्रीयतामिति कुंडलयोः इदंगृहाणत्वंसर्वोपस्करसंयुतं तवविप्रप्र
सादेनममास्त्वभिमतंफलं॥ गृहस्य इंद्रादिलोकपालानांयाज्यमहिषी
प्रिया महिषासुरस्यजननीसास्तुमेसर्वकामदा महिष्याः परापवादपै
शून्यादभक्षस्यचभक्षणात् उत्पन्नपापदानेनताम्रपात्रस्यनश्यतु
या निपापान्यनेकानिकामोत्थानिकृतानिच कांस्यपात्रप्रदानेनता
निनश्यंतुमेसदा कांस्यपात्रस्य ततःपल्लवदूर्वाकुशैरभिषिंचसुराधाः॥
आनःप्रजांजनयतुप्रजापतिराजरसायसमनक्त्वर्यमा॥ अदुर्मंगलीः

पतिलोकमाविशशन्नोभवद्विपदेशंचतुष्पदे अघोरचक्षुरपतिघ्न्येधिशिवापशु
भ्यः सुमनासुवर्चाः वीरसूर्देवकामास्यानाशन्नो भवद्विपदेशंचतुष्पदे इमां
त्वमिंद्रमीढ्वःसुपुत्रांसुभगांकृणु दशास्यांपुत्रानाधेहिपतिमेकादशंकुरु॥
सम्राज्ञीश्वशुरेभवसम्राज्ञीश्वश्र्वांभव ननांदरि सम्राज्ञीभवसम्राज्ञीअ
धिदेवृषु ४ समुद्रज्येष्ठाः०४ आपोहिष्ठा०३ इति ततोदुग्धाक्तेनद्विगुणसु
त्रेणदंपतीकंठदेशेचशानीमारभ्यपंचवारंचतुर्वारंवाप्रदक्षिणंवेष्टयेत्॥
पुरोधाः एतैमंत्रैः परित्वागिर्वणोगिरइमाभवंतुविश्वतः वृध्दायुमनुवृध्द
योजुष्टाभवंतुजुष्टयः ताम्बोमहोमरुतएवयाव्नोविष्णोरषस्यप्रभृथेहवा
महे हिरण्यवर्णाःककुहन्यतस्रुचोब्रह्मण्यतःशंस्यंराधईमहे दशावनि
भ्योदशकक्ष्येभ्योदशयोक्त्रेभ्योदशयोजनेभ्यः दशाभीशुभ्योअर्चताजरे

म० प्रयो भ्योदशधुरोदशयुक्तावहद्भ्यः ते अद्रयोदशयंत्रास आशवस्तेषामाधानं
पर्येति हर्यतं तउसुतस्य सोम्यस्यांधसोंशोः पीयूषंप्रथमस्य भेजिरे तेसो
१०
मादो हरी इंद्रस्य निंसतेंशुं दुहंतो अध्यासते गवि तेभिर्दुग्धं पपिवान्सोम्यं
मध्विंद्रो वर्धते प्रथते वृषायते वृषा वो अंशुर्नकिला रिषाथने [illegible] कावंतः स
दमित्स्थ नाशिताः रैवत्येव महसा चारवस्थ नयस्य ग्रावाणो अजुषध्वमध्व
रं ततः कंठदेशस्थंसूत्रमधोनिष्काश्य [illegible] कुंकुमाक्तमूर्णयुतंकृता
तेन हरिद्राखंडं बध्वा तद्वध्वा वामहस्तप्रकोष्ठे वरो बध्नीयात् विश्वेत्ताते स
वनेषु प्रवाच्यायाचकर्थमघवन्निंद्रसुन्वते पारावतंयत्पुरुसंभृतंवस्वपा
वृणोः शरभायऋषिबंधवे इति ततः कटिदेशस्थंसूत्रउपरिनिष्का ०

श्योर्णासूत्रं हरिद्राखंडं च बध्वा दक्षिणप्रकोष्ठे वधूर्बध्नीयात् नीललोहि
तंभवति कृत्यासक्तिर्व्यज्यते एधंते अस्या ज्ञातयः पतिर्बंधेषु बध्यते इति
ततो वधूवरौ परस्परमायुर्वर्धनकमक्षतारोपणं कुर्यातां तैजसपात्रे ग
व्यक्षीरघृतमासिच्य पात्रांतरेणार्द्रं दत्तेश्च कुशाक्लीतंडुलानादाय वरः
प्रक्षालितपाणिः प्रक्षालितवध्वांजलौ क्षीरंघृतंस्वहस्तद्वयांगुलिभिर्द्विरु
पस्तीर्य द्विवारं तथैव तंडुलानोप्यते न तथैव द्विरभिघारयेत् ततो वरां
जलेर्वध्वेवमेव दात्रा अन्येन वा पूरयेत् दाता तदंजल्योः सुवर्णं निधाय
वरांजलिं कन्यांजल्युपरिनिधाय कन्यातारयतु दक्षिणाः पांतु॥
बहुदेयं चास्तु पुण्यं वर्धतां शांतिः पुष्टिः तुष्टिश्चास्तु तिथिक

म०हत्र रणमुहूर्तनक्षत्रसंपदस्तु इत्युक्त्वा कन्यांजलिमुद्धृत्य तयांजलि
स्थानक्षता वरमूर्धन्यारोपयेत् भगोमेकामःसमृध्यतां ततोवरांज र१
लिस्थान् यज्ञोकामःसमृध्यतामितिकन्यामूर्धनि वधूःश्रियोमे
कामःसमृध्यतां वरः धर्मोमेकामःसमृध्यतां वधूःप्रजामेकामःस
मृध्यतां वरः यशोमेकामःसमृध्यतां ३ ततः कन्यावरजलिं द्विरुप
स्तीर्य द्विस्तंडुलैरापूर्य द्विरभिघारयेत् दात्रान्येनवापूर्ववत्कन्यांज
लावापूरिते तदापूर्ववद्धिरण्यंनिधायकन्यांजलिंवरांजलौनिधा राम१
यपूर्ववकन्यांतारयतु इत्यादिवाक्यषट्कंवदेत् ततोवरः शौर्यमेका
मःसमृध्यतां कन्या भगोमेकामःसमृध्यतां वरःधर्मोमेकामःस र१

वधूःप्रजामेकामःसमृध्यतां१

समृध्यतां कन्याश्रियोमेकामसमृध्यतां वरः यशोमेकामःसमृध्यतां ततः
वरःस्वशिरस्थपुष्पमादायक्षीरघृतेनक्त्वा कन्याललाटे तिलकंकरोति॥क
न्याचकरोति ततःपुष्पमालांवरकंठेनिदधाति वधूकंठेवरः ततःवरपक्षसु
वासिन्यःप्राङ्मुखीमुपविश्य वरत्रासाष्टश्रीसंशकंवस्त्रद्वयंसकंचुकीकंठ
मणियुतदोरकंचवध्वेसमर्प्य एकंपरिधाप्यापरमुत्तरीयंकुर्वंति ततोवर
स्तत्सूत्रंइष्टदेवतांस्मरन्वधूकंठेबध्नाति मांगल्यतंतुनानेनभर्तृजीवनहेतुना कंठेब
ध्नामिसुभगेसाजीवशरदांशतं इति ततोलंकारादिभिर्वधूंभूषयति आयुष्यं
वर्चस्यमित्यादिभिः ततोहरिद्राखंडलहकान्यात्रेनिधायदंपतीदेशकालौ
संकीर्त्यविवाहत्वरक्षणार्थंगणपतिपूजनमहंकरिष्ये इतिसंकल्प्यवधूवरा
भ्यामाह्नादिदक्षिणांतोपचारैःपूजाकार्या ततःपूरोधाःविवाह [illegible]
पूगफल३

म॰प्र॰ ९२

ण
व्रतसाक्षिणं गौपतिमनुस्मृत्य हरिद्रारक्तखंडलकौ तयोर्वस्त्रप्रांते पृथक्पृथक्
बध्नीयात्॥ वधूवरौ विवाहसमाप्त्यंतं यं [illegible] थिं द्वयं नाविस्रंजयातां॥ ततः पुरोधाः
नीललोहितं भवतीति मंत्रेण तयोरुत्तरीयांतौ मिथो बध्नीयात्॥ ततः सभा
यां दाता वृद्धाः पुरंध्र्यो ज्ञातिबांधवाश्च कुमादाद्यक्षतारोपणं कुर्युः॥ ततो
दंपती देशकालौ संकीर्त्य सौभाग्यादिप्राप्त्यर्थं महालक्ष्मीपार्वतीशचीपू
जनमहं करिष्ये॥ आवाहयेति संकल्प्य॥ पात्रस्थ सिततंडुलपुंजत्रये उदक्
संस्थमावाहनादि दक्षिणांतोपचारैः पूजा कार्या॥ ततो वधूः देशकालौ संकी
र्त्य सौभाग्यादिप्राप्त्यर्थं महालक्ष्मीपार्वतीशचीप्रीत्यर्थं हरिद्राजीरकादि
मंगलद्रव्यदानं करिष्ये॥ इति संकल्प्य सुवासीनीभ्यो दद्यात्॥ ततो द्विजैरा
शिषो देयाः॥ तन्मंत्राः॥ भद्रं कर्णेभिः॰ नवोनवो भवति जायमानोह्नां केतु॰ ९२

यथाहतद्॰ मानो अरातिरघशंसा गमत्॥ क्षत्रस्य राजा वरुणोधिराजः॥ नक्षत्रा
णां शतभिषग्वसिष्ठः॥ तौ देवेभ्यः कृणुतो दीर्घमायुः॥ पदांताः॥ ततः वरो मंडपां
तस्थां वेदिमागत्य प्राङ्मुख उपविशति। इति कन्यादानं॥ अथ विवाहहोमः॥
प्राङ्मुखो वरः आचम्य प्राणानायम्य देशकालौ संकीर्त्य परिगृहीतायां वध्वां
भार्यात्वसिद्धिद्वारा [illegible] ग्नावौपासनत्वसिद्धिद्वारा च श्रीपरमेश्व
रप्रीत्यर्थं विवाहहोमं करिष्ये॥ इति संकल्प्य॥ उल्लेखनादिभूसंस्कारं विधाय त
त्र योजकनामानं लौकिकमग्निं प्रतिष्ठाप्य प्रज्वाल्य समित्त्रयमादाय अन्वाधानं गृहीत्वा
दिप्राणायामांतं कृत्वा॥ विवाहहोमकर्मणि याय क्ष्यमाणा देवतास्ताः सर्वाः परि
ग्रहीष्यामि॥ ज्ञानवेदसमग्निमिध्मेनेत्यादिव्याहृत्यंतमुक्त्वा॥ प्रधानहोमे॥
अग्नीवरुणावाज्येन॥ गार्हपत्यमग्निमाज्येन॥ अग्निमाज्येन॥ दिवं वायुमश्विनौ

सवितारं बृहस्पतिं विश्वां देवानाज्येन॥ अग्निं द्विराज्येन॥ अंगहोमे॥ वरुणं द्विरग्नीव
रुणौ द्विरया समग्निं प्रजापतिं चाज्येन॥ लाजाहोमे॥ अग्निं त्रिर्लाजैर्यक्ष्ये॥ अग्निं
स्विष्टकृतमाज्येन॥ जयाभ्यातान्राष्ट्रभृतः सामान्यप्रायश्चित्तदेवताश्चाज्येन॥
वसून्रुद्रानादित्यान्सं स्रावेणएता देवताः सद्योयक्ष्ये॥ इत्युक्त्वा समिधोग्नावा
धाय॥ पात्रासादनाद्याकृत्वा प्राकृतानि दर्व्यादीन्यासाद्य॥ अश्मानं लाजाँश्चा न्
द्युदिवीजान्॥ अधिश्रपणार्थमभिषेकार्थं कलशं च परिधिपरिधानांतं कृत्वा त
तो वधूमीशानदेशतो बांधवैः समानीयमानां वरः समीक्षते॥ सुमंगलीरियं व
धूरिमां समेत पश्यत॥ सौभाग्यमस्यै दत्त्वायाथास्तं विपरेतन॥ ततो वधूमुत्त
रेणपात्राणि अग्निं स्वाग्निं रं तरागत्वा दक्षिणतः पत्नीमुपवेश्यानन्वारभते॥
ततो वरः परिषेकादि सामान्यप्रधानांतं कृत्वा प्रधानहोमं करोति॥ अग्निरेतु

नो

प्रथमो देवतानां सोस्यै प्रजां मुंचतु मृत्युपाशात्॥ तदयं राजा वरुणोनुमन्यतां य
थेयं स्त्री पौत्रमघं न रोदात्स्वाहा॥ अग्नीवरुणाभ्यामिदं॰ इमामग्निस्त्रायतां
गार्हपत्यः प्रजामस्यै नयतु दीर्घमायुः॥ अशून्योपस्था जीवतामस्तु माता पौत्र
मानंदमभिप्रबुध्यतामियं स्वाहा॥ गार्हपत्यायाग्नय इदं॰ मा ते गृहे निशि
घोष उत्थादन्यत्र त्वद्रुदत्यः संविशंतु॥ मा त्वं विकेश्युर आवधिष्ठा जीवपत्नी पति
लोके विराज प्रजां पश्यंती सुमनस्यमाना स्वाहा॥ अग्नय इदं॰ द्यौस्ते पृष्ठं
रक्षतु वायुरूरू अश्विनौ च स्तनं धयतस्ते पुत्रा सविताभिरक्षतु॥ आवाससः
परिधानाद्बृहस्पतिर्विश्वे देवा अभिरक्षंतु पश्चात्स्वाहा॥ दिवे वायवे अश्विभ्यां
सवित्रे बृहस्पतये विश्वेभ्यो देवेभ्य इदं॰ अप्रजस्तां पौत्रमृत्युं पाप्मानमुत
वाघं॥ शीर्ष्णः स्रजमिवोन्मुच्य द्विषद्भ्यः प्रतिमुंचामि पापं स्वाहा॥ अग्नय इदं॰

म०प्र० देवकृतं ब्राह्मणं कल्पमानं तेन हन्मि योनिषदः पिशाचान् क्रव्यादो मृत्यूनध
२४ रान्पादयामि दीर्घमायुस्तव जीवंतु पुत्रास्वाहा ॥ अग्नय इदं० इमं मे वरुण तत्
त्वायामि त्वन्नो अग्ने स त्वन्नो अग्ने त्वमग्ने अयासि प्रजापते इति पञ्चाहुती
र्हुत्वा ॥ ततः उत्तर परिधिमश्मानं निधाय तद्दक्षिणपादोपक्रमेणाश्मानं वधू ण
धूं प्राङ्मुखीमवस्थापयति ॥ आतिष्ठेममश्मानमश्मेव त्वं स्थिरा भव ॥
प्रमृणीहि दुरस्यून्सहस्व पृतनायतः इति ॥ अथ पाणिग्रहणं ॥ अपरेणा
ग्निं द्वयान्दर्भान्पूर्वापरानुदगग्रान् संस्तीर्य ॥ तत्र पूर्वदर्भेषु स्वयं प्रत्य
ङ्मुखस्तिष्ठन् ॥ प्राङ्मुख्याः तस्याः साङ्गुष्ठं सलोमभुत्तानं दक्षिणं हस्तं गृह्णीया
त् ॥ सरस्वति प्रेदमव सुभगे वाजिनीवति ॥ तां त्वा विश्वस्य भूतस्य प्रजा २४

यामस्याग्रतः ॥ गृभ्णामि ते सुप्रजास्त्वाय हस्तं मया पत्या जरदष्टिर्यथासत् ॥ भगो
अर्यमा सविता पुरंधिर्मह्यं त्वादुर्गार्हपत्याय देवाः ॥ इति ॥ ततस्तामग्रेण प्रसव्यं
दक्षिणमंसमावृत्य स्वदक्षिणतः प्रत्यङ्मुखीं कृत्वाभिमंत्रयते षड्भिः ॥ अघो
रचक्षुरपतिघ्न्येधि शिवा पशुभ्यः सुमनाः सुवर्चाः ॥ जीवसूर्वीरसूर्द्योनाशन्नए स्र४
धि द्विपदे शं चतुष्पदे ॥ तान्नः पूषञ्छिवतमामेरयस्व यस्यां बीजं मनुष्या वपंति ॥
या न ऊरू उशती विस्रयाते यस्यामुशंतः प्रहरेम शेपं ॥ सोमः प्रथमो विविदे गंध
र्वो विविद उत्तरः ॥ तृतीयो अग्निष्टे पतिस्तुरीयस्ते मनुष्यजाः ॥ सोमो ददद्गंधर्वा
य गंधर्वो दददग्नये ददात् ॥ पशूंश्च मह्यं पुत्रांश्चाग्निर्ददात्यथो त्वां ॥ अमूहम
स्मि सा त्वं द्यौरहं पृथिवी त्वं सामाहमृक्त्वं तावेहि संभवाव सह रेतो दधाव

म०हे०प्र

९२

द्वैपुं॑सपुत्रायवेन्नवेरायस्पोषायसुप्रजास्त्वायसुवीर्याय॥ इमांत्वमिंद्रमीढ्वः॑सुपुत्रां॑
सुभगांकुरु॥ दशास्यांपुत्रानाधेहिपतिमेकादशंकृधि॥ इति॥ ततस्वयंस्वस्थानेतांदक्षि
णतश्चसुपवेश्य अंजलावान्येन तूष्णीमुपस्तीर्यलाजाद्विरावपति॥ त्रिरुपंकावत्तिनः॥ इमा
न्लाजानावपामि समृद्धिकरणान्मम॥ तुभ्यंवसवननेतदग्निरनुमन्यतामियं॥ तूष्णी
मभिघार्य॥ दत्वउत्थानीयंतदंजलिमादायवरोजुहोति॥ इयंनार्युपब्रूतेऽग्नौलाजानाव
पंतिदीर्घायुरस्तुमेपतिरेधंतांज्ञातयोममस्वाहा॥ अग्नयइदं० ततोवधूमुत्थापयति॥
उदायुषास्वायुषोदोषधीनां॑रसेनोत्सर्जन्यभृष्मेणोदस्थाममृतां॑अनु॥ ततस्तयास
हप्रदक्षिणमग्निमनुक्रामति॥ विश्वाउततयावयंधाराउदन्याइव॥ अतिगाहेमहि
षद्वति॥ पुनस्तथैवतामुपवेश्यतदंजलावुपस्तीर्य॥ द्विर्लाजानोप्याभिघार्यतथैवहुत्वा॥
तथैवपरिक्रम्यहुतेतित्रिर्लाजान्हुत्वा तथैवतृतीयंपरिक्रम्य॥ आज्येनैवसोविष्टकृ
तीर्हुत्वा॥ पश्चाज्जयादिहोमःकार्यः॥ अत्रयथापुरस्तादितिसूत्रेणसिद्धस्यास्विष्टकृतः॥

क

स्य

९२

पुनरत्रविधानंकारूपरंतेनतृतीयंपरिक्रमणानंतरंस्विष्टकृतंपश्चाज्जयादिहोमः॥ एव
मेववृत्तिकृताव्याख्यातं॥ ततःइध्मसन्नहनादिसंस्थाजपांतंकर्मसमापयेत्॥ नात्रत्रि
वृदन्नहोमः॥ ततोपरेणाग्निंसप्ताक्षतपुंजानप्राक्संस्थानुदक्संस्थान्वाकृत्वादक्षि
णेनपादेनप्रक्रम्यसव्येनानुप्रक्राममासव्येनदक्षिणमतिक्रामीरिति॥ तार्यां॑
संशास्ति दक्षिणंपादंप्रतिगृह्याप्रतिगृह्यवासप्ताक्षतपुंजेषुविष्णुक्रमान्क्राम
यति॥ एकमिषेविष्णुस्त्वान्वेतु॥ द्वेऊर्जेविष्णुस्त्वान्वेतु॥ त्रीणिव्रतायविष्णुस्त्वान्वेतु॥
चत्वारिमायोभवायविष्णुस्त्वान्वेतु॥ पंचपशुभ्योविष्णुस्त्वान्वेतु॥ षड्रायस्पोषाय
विष्णुस्त्वान्वेतु॥ सप्तसप्तभ्योहोत्राभ्योविष्णुस्त्वान्वेतु॥ इति॥ सप्त
मपदेधान्यराशौवराजपति॥ सखायोसप्तपदाअभूमसख्यंतेगमेयं॑सख्या
त्तेमायोषंसख्योष्ठाइति॥ तस्यादक्षिणंपादंस्वदक्षिणेनपादेनाक्रम्यदक्षिणे
हस्तेनास्याःदक्षिणमं॑समुपर्युपर्यन्ववमृश्यहृदयदेशमभिमृशति॥

सख्यान्मे

म॰प्र॰ मम हृदये हृदयं ते अस्तु॥ इत्युपनयनपाठेन पठितेन मंत्रेण॥ प्राणानां ग्रंथिरसि स
माविस्रसइति नाभिदेशं स्पृष्ट्वा॥ ततस्तामपरेणाग्निं प्राङ्मुखीमुपवेश्य तस्याः
२६ पुरस्तात्प्रत्यङ्मुखस्तिष्ठन्॥ आपोहिष्ठेति तिसृभिर्हिरण्यवर्णाः शुचयः पावका इति
चतसृभिः पवमानः सुवर्जन इति चैतेनानुवाकेन कुशैः कुशाग्रैर्मार्जयति॥ त
ति तो वृद्धब्राह्मण्यो ज्ञातिबांधवाः सुवासिनीश्च॥ आशीः पूर्वकं कुंकुमस्तके श्रीह्या
दिबीजानि यथाचारमारोपयंति॥ याजा ताइत्यादिभिर्मंत्रैः अन्यदपि शेषं
यथाचारप्राप्तं विवाहे तत्सर्वं कर्तव्यं॥ ततस्य विवाहहोमस्य सांगतासिद्धये
आचार्यादीन् बांधवादीनां संपूज्य [illegible]॥ अस्मद्देवासाव पुष्पाचिकेत्सहेत्यादि
नाते भ्यश्चाशिषः॥ संप्रार्थ्य॥ प्रमादात्कुर्वतां कर्म तिक्रमेत्सा दुष्या विष्णुस्मरे
त्॥ इति विवाहहोमः॥ छ॥ अथ गृहप्रवेशः॥ विवाहहोमानंतरमेव वधूबां
धवाः पितृगृहात्तां भार्यां रथादियानेन गृहं प्रापयंति॥ वैवाहाग्निमेकस्मि २६

न्पात्रे कृत्वा आयापत्यो रक्षन्तो नु हरंति सः॥ वरः स्वगृहद्वारं संप्राप्य भार्यां संशास्ति॥
दक्षिणं पादमग्रे तिहर देहलिं माधिष्ठा इति॥ सा यथा शासनं दक्षिणं पादमग्रे कृत्वा
देहलिं चानधिष्ठाय गच्छति॥ ततो गृहस्य पूर्वार्धे शालायां सभार्याः प्राङ्मुख उपवि
श्यात्मस्य प्राणानायम्य देशकालौ संकीर्त्य मम विवाहाग्नेः गृह्यत्वसिद्धिद्वारा श्रीप
रमेश्वरप्रीत्यर्थं विवाहांगभूतं गृहप्रवेशनीयाख्यं कर्म करिष्ये॥ तदंगं गणपतिपूजनं
उद्धननादि कर्म करिष्ये॥ इति संकल्प्य॥ गणेशपूजनं कृत्वा॥ उद्धननादि संस्कारं
विधाय तत्र विवाहाग्निं प्रतिष्ठाप्य॥ अपरेणाग्निं लोहितमानडुहं चर्म प्राचीनग्री
वमुत्तरलोमास्तृणाति॥ तदभावे कुशानास्तीर्य तेषु प्राङ्मुखो उपविश्य दक्षिणतो
भार्यां चोपवेश्य उदङ्मुखो वा उपविशतः॥ तत्र पश्चात् भार्या उपविशति॥ इह गावो
निषीदंतिहाश्वा इह पूरुषाः॥ इहो सहस्रदक्षिणोपि पूषा निषीदंतु इति॥ ततो नक्षत्रो
दयपर्यंतं वाग्यतौ भवतः॥ नक्षत्रोदये सति प्राङ्मुखावुदङ्मुखौ वा भूत्वा दिश उपतिष्ठते॥

म०हे० देवीः षडुर्वीरुरु णः कृणोत विश्वेदेवास इह वीरयध्वं ॥ इति ॥ ततो नक्षत्राणि ॥ मा हास्म
हि प्रजया मा तनूभिः इति ततश्चन्द्रमसं ॥ मर धाम द्विषते सोमराजन्निति ॥ ततः सप्त
२७
र्षीन् ॥ सप्तर्षयः प्रथमां कृत्तिकानामरुंधतीं ये ध्रुवतां ह नन्युः ॥ षट् कृत्तिकामुख्य
योगं वहंतीयमस्माकं भ्राजन त्वष्टं ॥ इति ॥ ततो ध्रुवं ॥ ध्रुवक्षितिर्ध्रुवयोनिर्ध्रुवमसि
९मा
ध्रुवतः स्थितं ॥ त्वं नक्षत्राणां मेथ्यसि स मा पाहि पृतन्यतः ॥ नमो ब्रह्मणे ध्रुवायाच्युताया
स्तु नमो ब्रह्मणः पुत्राय प्रजापतये नमो ब्रह्मणः पुत्रेभ्यो देवेभ्यः त्रयस्त्रिंशेभ्यो
नमो ब्रह्मणः पुत्रपौत्रेंगिरोभ्यो यत्त्वा ध्रुवमच्युतं सुपुत्रं सपौत्रं ब्रह्म वेद ध्रुवा
स्मिन्पुत्राः पौत्रा भवति प्रेष्यां तेवासिनो वसनं कंबलानि कंसं हिरण्यं स्त्रियो
राजानोऽन्नमभयमायुः कीर्तिर्वर्चो यशो बलं ब्रह्मवर्चसमन्नाद्यमेतानि मयि स
स्ये
र्वाणि ध्रुवाण्यच्युतानि संतु ॥ ध्रुवं त्वा ब्रह्म वेद ध्रुवोऽहमस्मिंल्लोकेऽस्मिंश्च जन
पदे भूयासमच्युतं त्वा ब्रह्म वेद मा हमस्माल्लोकादस्माच्च जनपदाच्योषि द्विषन्मे
२७

भ्रातृव्योऽस्माल्लोकादस्माच्च जनपदाच्यवतामचेष्टं त्वा ब्रह्म वेद मा हमस्माल्लोकादस्माच्च जन
पदाच्चेष्टिषि द्विषन्मे भ्रातृव्योऽस्माल्लोकादस्माच्च जनपदाच्चेष्टताम व्यथमानं त्वा ब्रह्म वेद
मा हमस्माल्लोकादस्माच्च जनपदाद्व्यथिषि द्विषन्मे भ्रातृव्योऽस्माल्लोकादस्माच्च जनप
दाद्व्यथतां नभ्यं त्वा सर्वस्य वेद नभ्यमहमस्य जनपदस्य भूयासं मध्यं त्वा सर्वस्य वे
द म[illegible]ध्यमहमस्य जनपदस्य भूयासं तंतिं त्वा सर्वस्य वेद तंतिरहमस्य जनपदस्य भू
यासं मेथीं त्वा सर्वस्य वेद मेथ्यरहमस्य जनपदस्य भूयासं नाभिं त्वा सर्वस्य वेद ना
भिरहमस्य जनपदस्य भूयासं यथा नाभिः प्राणानां विषूवानेवमहं विषूवानेकश
तं तं पाप्मानमृच्छंतु योऽस्मान्द्वेष्टि यं च वयं द्विष्मो भूयासमिमामेकशतात्पुण्यात्या
गच्छंतु ॥ इति मंत्रैर्ध्रुवमुपतिष्ठते ॥ नक्षत्रादीनामभ्रादिना तिबधे न अदर्शनेऽपि
तस्यां दिश्युपस्थानं कर्तव्यं ॥ ततः उपस्थानदेशमेनैः संतोषजनकेन वचसा भार्यां
संभाष्य पुनः शालां प्रविशति ॥ अथ गृहप्रवेशस्थालीपाकप्रयोग आपूर्विकपक्षे

णोच्यते॥ नक्षत्रोपस्थानानंतरं रात्रावेव:कार्यः॥ अग्नेः पश्चाद्भूमावुपविश्याचम्य प्राणा
नायम्य देशकालौ संकीर्त्य गृहप्रवेशांगभूतेनाग्नेयस्थालीपाकेन यक्ष्ये इति संकल्प्य
समिद्द्वयमादाय अध्वर्युग्रहीत्यादि प्रायामांतं कृत्वा गृहप्रवेशस्थालीपाकहोमकर्मणि॰
ध्यामि तूष्णीमग्निंसमिद्भ्यां अग्निं चरुणा अग्निंस्विष्टकृतं चरुणा प्रायश्चित्तहो
मे॥ अग्निं वायुं सूर्यं प्रजापतिं चाज्येन एतादेवतायक्ष्य इति सामिधोग्नावाधाय॥
यथाहतद्दसवइत्यग्निंपरिसमूह्य परिस्तीर्य उत्तरेण कुशानास्तीर्य तत्र यथोपयोगं
पात्राणि दर्व्यास्थालींप्रोक्षणीपात्रोलूखलौ ज्योपवेषसंमार्गदर्भोपधरणपात्रमेक्षु
णपवित्राद्यासाद्य प्रोक्षणीःसंस्कृत्यासादितानि प्रोक्ष्योलूखले तंडुलानोप्यावह
त्याव्यान्तरेणासाद्य चरुस्थालींतंडुलानोप्याग्नौश्रपयति ततो दर्वीं निष्टप्याज्यं
संस्कृत्य श्रृतं चरुमभिघार्योदगुद्वास्योपधरणपात्रे मेक्षणेनोद्धृताग्नेः पश्चात्॥ नि
धाय परिषिच्य समिद्द्वयमंत्रका तूष्णीमग्नावाधाय चरुं दर्व्योपहृत्य सकृदवदाय जु

होति॥ अग्नये स्वाहा॰ अग्नय इदं॰ पुनर्भूयानुपहृत्योत्तरार्धस्य पूर्वार्धे जुहोति॥ अग्नये स्वि
ष्टकृते स्वाहा॥ अग्नये स्विष्टकृत इदं॰ न्यूनातिरिक्तदोषपरिहारार्थं व्याहृतिहोममाज्येन कृ
त्वा॥ परिषेकविसर्गं कृत्वा॥ स्थालीपाकशेषेण ब्राह्मणं विद्यावंतं भोजयेत्॥ ततः कर्मणः
सांगतासिद्ध्यर्थं आचार्याय ऋषभं तत्सातिनिधिभूतं हिरण्यं वा दत्वा प्रमादात्कुर्वतां कर्म
त्विकर्म सा द्युण्या विष्णुं स्मरेत्॥ आपूर्विकहोमेष्वाहुतिपरिमाणः इध्मः कार्यः॥ अत्रवृ
त्तिकृता आघारपक्षेप्युक्तोस्ति आघारीयस्थालीपाकः॥ पक्षद्वयेपरिगृहीतपक्षस्या
त्॥ इत्यापूर्विकस्थालीपाकप्रयोगः॥ एकग्रामे चेद्विवाह आगारं प्राप्यैव गृहप्रवेशनी व
यहोमः॥ देशांतरे चेद्विवाहः सामारोपणं कृत्वा वानेयः॥ सर्वथा नाशे सति गृहमाग
त्य श्रोत्रियागाराद्वाहृत्याग्निमुक्तदेशे उक्तरीत्या प्रतिष्ठाप्याग्निनाशप्रायश्चित्तं कृत्वा॥
पूर्वोक्तप्रकारेण गृहप्रवेशनीयं कर्म समापयेत्॥ गृहप्रवेश[illegible]स्थालीपाकानंतरमे
व दर्शपूर्णमासस्थालीपाकः कार्यः॥ अथ गृहप्रवेशस्थालीपाकः॥ अथोपासनहोमः॥

महे० प्रयो० सत्पाणिग्रहणोत्तरं यावज्जीवं नक्षत्रं दृष्ट्वा प्रदोषे वा नौघटिके गौणे काले सायं होमः॥ उष

सि पुरोदयं उदिते वा सूर्ये प्रातर्होमः कार्यः गृहप्रवेशांतविवाहपक्षे गृहप्रवेशस्थालीपा

कादूर्ध्वमेव सायंहोमोपक्रमः कार्यः॥ उपात्तदुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं सायं

प्रातरुपासनहोमौ होष्ये॥ इति संकल्प्य॥ ततः परिस्तीर्य यथाहृतद्रुसवो गोयमितिपरि

समूह्य परिषिच्य यत्स्वाहृदेसभ्यर्च्य चत्वारि शृंगेति ध्यात्वा व्रीह्यादि द्रव्यं द्वादशपर्वपू

रितमादाय हस्तेन जुहोति॥ अग्नये स्वाहा॥ अग्नय इदं० प्रजापतये स्वाहा॥ प्रजापत

य इदं० तथैव परिसमूह्य परिषेकं विसर्गं कृत्वा॥ अग्निर्मूर्धा दिवः ककुत्पतिः पृथि

व्या अयं॥ अपां० वति॥ त्वामग्ने पुष्क० थत॥ मूर्धो [illegible] ० घत॥ अयमग्निः० स्पतिः॥

मूर्धा कवीरयीणां इत्युपस्थाय॥ त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषमित्यादिना विभू

तिधारणं कृत्वा॥ श्रद्धां मेधां यशः प्रज्ञां विद्यां बुद्धिं श्रियं बलं॥ आयुष्यं तेज आरोग्यं

देहि मे हव्यवाहन॥ इति वह्निं प्रार्थ्य॥ प्रमादात्कुर्वतां कर्मेति कर्मसाद्गुण्याय विष्णुं स्मरेत्॥

इति सायंहोमः॥ प्रातर्होमं तु॥ सूर्याय स्वाहा सूर्यायेदं० प्रजापतये स्वाहा॥ प्रजापतय इदं०

उद्वयं तमसस्परि पश्यंतो ज्योतिरुत्तरं० तस्थुषश्च॥ इति॥ उपस्थानमन्यत्समानं॥ अग्निहो

त्रवद्धोमस्य कालोप्युदितानुदितव्यवस्थायाग्राह्याः॥ होमशेषं तु माषवर्जं व्रीहियवतिला

दिकं ग्राह्यं॥ इत्यौपासनहोमः॥ ततः सायमौपासनहोमोत्तरं वधूवरौ प्राङ्मुखावुपविश्य दे

शकालौ संकीर्त्य विवाहांगभूतं त्रिरात्रव्रतं चरिष्यावहे॥ इति संकल्प्य॥ इक्षुविकारान्सा

मुद्रविकारान्लवणं अभुंजानौ वस्त्राभरणादिना चात्मानमलंकुर्वाणौ मैथुनवर्जं चाधः

शयानौ सहवसतः इत्यादि व्रतं॥ पाणिग्रहणादिनमादाय गृहप्रवेशादूर्ध्वं चात्रिरात्रं वधू

वराभ्यां कर्तव्यं॥ अथाग्निनाशप्रायश्चित्तं॥ आचम्य प्राणानायम्य देशकालौ संकीर्त्य

अग्निनाशनिमित्तं प्रायश्चित्तं करिष्ये इति संकल्प्य॥ उद्धननादि भूसंस्कारं विधाय स

थितं श्रोत्रियागारादाहृतं वाग्निमानीय तं संस्थाप्य प्रज्वाल्य॥ आज्यं संस्कृत्य॥ अथाश्चाग्ने

रित्येकाज्याहुतीर्होतव्या हुतिचतुष्टयं हुत्वा॥ आसायं पत्नी वरो वा उपवसेत्॥ रात्रावनु

म० हे० प्र० गते आप्रातरुपवसेत्॥ ततो यथापूर्वमग्निमाचरेत्॥ विवाहमध्ये अतर्दुर्ध्वं अपिदमेवा
नुपहतेग्नौ प्रायश्चित्तं॥ अग्न्युपघातनिमित्तानि पुनराधानप्रयोगे वक्ष्यंते॥ इत्यग्नि ना
१०० शप्रायश्चित्तं॥ अथाशौचे होमविधिः जननमरणाशौचयोः ऋत्विगादीनां सायंप्रातर्हो
मौ कारयेत्॥ स्वयं द्रव्यत्यागः कुर्यात्॥ अथवा ऋत्विगाद्यभावे आशौचपातात्पूर्वमेव हो
मांतं वक्ष्यमाणप्रकारेणाग्निसमारोपणं कृत्वा॥ सूतकनिवृत्तौ जातायां सत्यां उल्लेखनादि
भूसंस्कारं विधाय तत्र स्वयोनितो मन्थनमग्निं प्रतिष्ठाप्य तं समारूढमग्निं वक्ष्यमाणप्र
कारेण वरोप्य प्राणा-नायम्य देशकालौ संकीर्त्य मम नित्यहोमातिक्रमजन्यदोषपरिहा
रद्वारा श्रीपरमेश्वरप्रीत्यर्थं प्रायश्चित्तपूर्वकमतिक्रांतहोमं करिष्ये॥ इति संकल्प्य॥
आज्यं संस्कृत्य दर्व्याज्यमादाय जुहोति॥ मनो ज्योतिर्जु० धातु॥ याइष्टाउष० नेन स्वाहा॥
मनसे ज्योतिष इदं० ततो होमार्थं व्रीह्यादिद्रव्यमादाय परिसमूहनादि कृत्वा॥ अतीतकाला
रभ्य क्रमेण द्वे द्वे आहुती हुत्वा पश्चात्तत्कालहोमं च कृत्वा परिषेकादि विसर्गांतं कर्मशेषं समापयेत्॥ १००

इत्याशौचे होमविधिः॥ अथ चतुर्थदिने ऐरिणीपूजनं॥ तच्च चतुर्थदिनरात्रौ भद्रादिसंभ
वे दिन एव वा शिष्टाचारं प्राप्तं वरमात्रे तत्समायै वा ऐरिण्याख्यं कृ इषोडशवंशपात्रदा
नं कार्यं॥ कन्या दाता॥ वस्त्वतां तूलसंयुक्तं दीपत्योर्वंश धर्मजं॥ ऐरिण्याख्यं वंशपात्र
पक्वान्नैः प्रपूरितं॥ करकैः क्रूइसंख्यातैः सुवर्णपरिपूरितैः एनावदेरीणी रूपं क
तैर्व्यक्तिल सूरिभिः॥ एवं संपाद्य कन्यादाता सभार्यो देशकालौ संकीर्त्य विवाहस्य
संपूर्णफलावाप्तये वरस्य तत्पित्रमात्रादीनां लक्ष्मीयाणां च यथाविभवं वस्त्रादि
भिः पूजनमहं करिष्ये॥ इति संकल्प्य॥ वरादिभ्यः यथासंभवं वरादिकं दत्वा पुनस्ति
थ्यादिकं संकीर्त्य मम कन्यादानस्य संपूर्णफलावाप्तये उमामहेश्वरप्रीत्यर्थं ऐरिणी
पूजनं वरमात्रे ऐरिणीदानं च करिष्ये इति सं० ऐरिणि त्वमुमादेवी महेशो गिरिजा
पतिः॥ अतस्त्वां पूजयिष्यामि ऐरिणी सर्वकामदा॥ सवस्त्रां च सदीपां च शूपैः षोड
शभिर्युतां वरमात्रे प्रदास्यामि कन्यादानस्य सिद्धये॥ इति संक० महावंशपात्रे

म० त्रे० उमामहेश्वरौ [illegible] षोडशोपचारैः पंचोपचारैर्वा संपूज्य वंशपात्रं नमः हंसमर्पदे॥ इत्युक्त्वा॥
वरमात्रेदत्त्वाम यानुपठेत्॥ वंशो वंशकरः श्रेष्ठो वंशो वै समुद्भवः॥ अनेन वंशदानेन तुष्टो भवतु

शंकरो मम॥ वंशपात्रमिदं पुण्यं वंशजात समुद्भवं वंशानामुत्तमं दानमतः शांतिं प्रयच्छ मे॥ वंशपात्रा
णि सर्वाणि [illegible] मयासंपादितानि वै॥ उमाकांतायदत्तानि मम गेहे त्वासिद्धये॥ वंशवृ
द्धिकरं दानं सौभाग्यादि समन्वितं॥ वस्त्रेणाच्छादितं पूर्णं फलमेव समन्वितं॥ [illegible] सर्वपाप
क्षयकरं नानाद्रव्यैस्तु पूरितं दानानामुत्तमं दानमतः शांतिं प्रयच्छ मे॥ इति॥ ततः सदी
पं वंशपात्रं सह कुंकुं यजमानः शिरसि वा सूत्रयं धारयेत्॥ ततः कन्यापित्रादिवर
स्य मातृपित्रादीनुपवेश्य प्रार्थयेत्॥ सप्तवर्षा त्वियं कन्या पुत्रवत्पालिता मया॥ इदानीं तव पुत्रा
य दत्ता स्नेहेन पाल्यतां॥ इति वरमात्रा वधूमातृ तत्सखीय सुनीच्यः सकं चुकं श्वशुरं श्वश्रूं प्रवाय
नदानाविविध्या कारिणी यानि इत्यादा वा रभ्रात्संयथा चारं देयं॥ इदं मौरिणी पूजादि वधूमातृ
पितृभ्यामभुक्तवद्भ्यां कृत्वा भोजनं कार्यं॥ अथ रात्रौ चतुर्थी कर्म॥ छ॥ तत्र चतुर्थी [illegible]
कर्मांतो विवाह इति [illegible] पक्षे विवाहदिनमादाय चतुर्थस्या अह्नस्त्रिभागशेषायां रात्रौ चतुर्थी

कर्म कार्यं॥ गृहप्रवेशनीयांतो विवाह इति पक्षेग गृहप्रवेशदिनमादाय चतुर्थस्या अह्नस्त्रिभागशेषा
यां रात्रौ चतुर्थी कर्मसंगत्यार्थं विवाहांगमेव मित्युक्तमेव पूर्वं कर्ता वधूसहितः प्राङ्मुख उपवि
श्य देशकालौ संकीर्त्य ममास्यां भार्यायाः सोमाद्युपभुक्त दोषपरिहारद्वारा श्रीपरमेश्वरप्री
त्यर्थं प्रायश्चित्त होमं करिष्ये॥ तदंग गणपति पूजनं नमहं करिष्ये॥ इति संकल्प्य कृत्वाग्निप्रजा
ल्य समित्रय मादाय प्राध्य एहीत्यादि प्राणायामं तं कृत्वा प्रायश्चित्त होम कर्मणि या० परियही
ष्यामि॥ जातवेदसमग्निम्मि ध्मेनेत्यासामान्यप्रधानांतं कृत्वा [illegible] वरुणं द्विराज्येन० अग्नी
वरुणौ द्विराज्येन० वैशेषिक होमे॥ अग्निं प्रायश्चित्तिं० वायुं प्रायश्चित्तिं० आदित्यं प्रायश्चि
त्तिं० आदित्यं प्रायश्चित्तिं० वायुं प्रायश्चित्तिं० अग्निं प्रायश्चित्तिं० अग्निं प्रायश्चित्तिं० वायुं
प्रायश्चित्तिं० उपहोमाज्येन मूर्ध्नि सं स्रावहोमे० अग्निं वायुं सूर्यं प्राजापतिं संस्रावा
ज्येन अयासमग्निं प्राजापतिं जयाद्युपहोमांश्च सामान्य प्रायश्चित्त देवताश्चाज्येनेत्या
दिएता देवता यक्ष्य इत्युक्त्वा समिधोग्न्याधाय॥ सामान्य प्रधानांतं कर्म समाप्य इमंमे
वरुण [illegible] तत्वायामि त्वन्नो अग्ने स त्वन्नो अग्ने इति च तस्त्रः आज्याहुतीर्हुत्वा॥ छ॥

म० हे० प्र० प्रधानहोमः॥ अग्ने प्रायश्चित्ते त्वं प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै
घोरा तनूस्तामितो नाशय स्वाहा॥ अग्ने प्रायश्चित्तय इदं० वायो प्रायश्चित्ते त्वं प्रायश्चित्ति
रसि ब्रा० यास्यै निंदिता तनूस्तामितो नाशय स्वाहा॥ वायवे प्रायश्चित्तय इदं० आदित्य प्रा
यश्चित्ते त्वं प्रायश्चित्ति० यास्यै पतिघ्नी तनूस्तामितो नाशय स्वाहा॥ आदित्य प्रायश्चित्तय
इदं० पुनर्व्युत्क्रमेण॥ आदित्य प्रायश्चित्ते० वायो प्रायश्चित्ते० अग्ने प्रायश्चित्ते० पुन
र्व्युत्क्रमेण अग्ने वायो आदित्य इति नवाहुतीर्हुत्वा नवाहुतिसंस्रावेणाज्यपात्रांतरे धृ
त्वा तदेव संस्रावाज्यं दर्व्या तस्या मूर्ध्नि जुहोति॥ भूर्भगं त्वयि जुहोमि स्वाहा॥ अग्नय इदं०
भुवो यशस्त्वयि जुहोमि स्वाहा॥ वायव इदं० स्वः श्रियं त्वयि जुहोमि स्वाहा॥ सूर्यायेदं०
भूर्भुवः सुवस्त्विषिं मयि जुहोमि स्वाहा॥ प्रजापतय इदं० इत्याहुतिचतुष्टयं मूर्ध्नि हुत्वा॥
ततस्त्वमग्ने अयासीत्यादि क्रमेणाग्नौ जुहोति॥ संस्थाजपांतं समाप्य चात्र स्विष्टकृन्न होमः॥
ततः कर्मणः सिद्धये आचार्याय दक्षिणां दत्वा प्रमादात्कुर्वतां कर्मेति कर्मसाद्गुण्यार्थं विष्णुं स्मरेत्॥

१९२

ततः कुंभमुदकपूर्णमग्निसमीपे निधायाग्निमुदकुंभं च प्रदक्षिणीकृत्यापरेणाग्निं तां भार्यां स
म्यगास्तृते स्थले प्राक्शिरसमुदक्शिरसं वा शाययित्वा तस्याः योनिं दक्षिणेन पाणिनाभिमृशति॥
अभित्वा पंचशाखेन शिवेनाभिद्विषावता सहस्रेण यशस्विना हस्तेनाभिमृशामसि सुप्रजा
स्त्वायेति ततस्तस्याः योनौ स्वजननं प्रवेशयति॥ सन्नामनः सं हृदयानि सं नाभिः सं
त्वचः॥ संत्वा कामस्य योक्त्रेण युंज्याव्यविमोचनाय इति [illegible] ततस्तां पर्यालिंगयति॥
मामनुव्रता भव सहचर्या मया भव या ते पतिघ्नी तनूर्जारघ्नीं त्वेतां कृणोमि शिवा त्वं मह्यमे रो
धि स्वरपविर्जारेभ्य इति ततस्तस्याः मुखं स्वमुखेन जुषति॥ मधु हे माध्विदं मधु जिह्वा
मे मधुवादिनी॥ मुखे मे सारघं मधु दत्सु संवननं कृतं चाक्रवाकं संवननं यन्नदी
भ्य उद्धाहृतं॥ यद्गुप्तो देवगंधर्वस्तेन संवनिनौ स्वकाविति इति चतुर्थीकर्मप्रयोगः॥
अथ देवकोत्थापनमंडपोद्वासनविधिः॥ तच्चाभुक्ताषष्ठ्यामसिरिक्ते समदिने कुर्यात्॥
विषमे तु सप्तमपंचमयोः कुर्यात्॥ यजमानः सपत्नीकः प्राङ्मुख उपविश्य देशका

म० हे प्र०

१०३

लोसंकीर्त्य विवाहांगत्वेन स्थापितदेवतानामुत्थापनं मंडपोद्वासनं च करिष्ये॥ इति संक
ल्प्य गंधाद्युपचारैः देवताः संपूज्य भगवत्यादीनां मंडपदेवतानां तैलोद्वर्तननोच्छादकस्ना
नानि कारयित्वा संपूज्य वेष्टनसूत्रमुन्मुच्य पुण्याहवाचनं कुर्यात्॥ ततो द्विजैरभिषेकः का
र्यः॥ अभिषेकांते पुरोधास्तत्क्षारवादिकं तदुदकं वंशपात्रे निधाय तदुपरि अक्षिप्याभिषे
कजलं सह कुटुंबयजमानशिरसि किंचित्स्रावयेत्॥ भक्तिचेति चेत्येतद्दू सर्वं स्वस्त्ययनं यद्व
त्ति चेति चेति तद्योस्मि त्रियस्यान्नमेतेनानुमं नयोत भेति चेति चेति स्वस्त्य वगच्छति स्वस्ति
कर्ता पुनरागच्छति॥ इति पठित्वा ततः शिरसि बध्वांजलिः अस्मद्गोत्रे षट् सुषट् सुमासे
षु शोभनमस्त्विति भवंतो ब्रुवंतु षट् सुषट् सुमासेषु शोभनमस्तु॥ इ॥ स्तु॥ का॥ ब्राह्म
णतथास्त्विति ब्रूयुरेवं त्रिः कार्यं॥ ततो द्विजोऽश्वंदनंताबूलादिना पूजयित्वा तदाशिषश्च
गृह्णीयात् ततश्चान्यपि स्वकुलधर्मानुसारिणी सर्वं कुर्यात्॥ इति सत्याषाढहिरण्यकेशी
स्मार्तप्रयोगरत्ने प्रथमसंस्कारप्रकरणे वैशंपायनमहेशभट्टकृतो विवाहप्रयोगः॥ ७२॥

१०३

ले·

अथ द्विभार्यस्याग्निसंसर्गविधिः॥ कर्ता अपरविवाहहोमकाले उद्धननादिभूसंस्कारैः
स्थंडिले विधाय पूर्वभार्यायाः गृह्याग्निं प्रतिष्ठाप्य तत्र द्वितीयभार्यायाः विवाहहोमः कार्यः॥
स गृह्याग्निरिति त्रयोगपारिजाते यस्य लौकिकाग्नौ द्वितीयो विवाहो भवति तेन तन्
विवाहमग्निद्वयस्य पृथक् उपासनः कार्यः॥ ततो दशमेद्वा दशाहे वा हनि प्रातः कृत्य
त्रहोमानंतरं प्राङ्मुख उपविश्याग्निद्वयं पत्नीभ्यामानीय दक्षिणतः उत्तरश्च पात्र त
द्वयं संस्थाप्य तत्राग्निद्वयमध्ये उद्धननादिभूसंस्कारं विधाय पत्नीभ्यामन्वारभ्य
आचम्य प्राणानायम्य देशकालौ संकीर्त्य मम गृह्याग्निसाध्यानां कर्मणां गृह्या
ग्नौ तंत्रेणानुष्ठानसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं अग्निसंसर्गाख्यं कर्म करि
ष्ये॥ तदंगं गणेशपूजनं पुण्याहवाचनं मातृकापूजनं नांदीश्राद्धं च करिष्ये इति सं
कल्प्य कुर्यात्॥ ततो मंत्रद्वये ततो प्रत्यक्षोपानाग्निं स्वयं पत्नीभ्यां वा सस्त्रोपास
नाग्निं युगपदेव मध्वा स्थंडिले स्थापयेत्॥ भवतन्नः समनसौ समोकसौ वरेपसौ॥

महे० प्र०
१२४

राम
१२४

म०त्र०

१२४

मायज्ञं९ हि९ सिष्टं मायज्ञपतिं जातवेदसो शिवो भवतमद्य नः॥ अग्नावग्निश्चरति प्रविष्ट
ऋषीणां पुत्रो अधिराज एषः॥ स्वाहा कृत्य ब्रह्मणा ते जुहोमि मा देवानां मुथुया कर्म भागधेयं॥
ततस्तमग्निं त्र्यन्वाधाय समित्त्रयमादाय अप्सुएहीत्यादि प्राणायामं तं कृत्वा॥ औपास
नाग्न्योः संसर्ग होमकर्मणि यक्ष्यमाणा देवताः स्ताः सर्वाः परिग्रहीष्यामि जातवेदसम
ग्निमिध्मेनेत्यादि व्याहृत्यंतमुक्ता प्रधानहोमः॥ ततुमंतमग्निं वरुणायक्ष्ये॥ त त्रि ५
तः इमं मे वरुणेत्यादि एता देवता यक्ष्ये॥ इत्यंतमुक्ता समिधोग्नावाधाय॥ ततुमते
ग्नये वरुमुक्तप्रकारेण श्रपयित्वा॥ आघारवत्तंत्रेण होमः कार्यः॥ ततु तन्वन्ने रजसो०
कृतान्॥ अनुवरुणं० अनन९ स्वाहा॥ ततुमतेग्नयइदं० उद्बुध्यस्वा०त्रं॥ पुनः कृ०मेतन९ स्वा
हा॥ ततु० इदं० त्रयस्त्रिं९ श० देवा९ अप्येतु स्वाहा॥ ततुम० इदं० इति स्त्रोरा[illegible]हुती त्रयं
हुत्वा॥ इमं मे वरुणेत्यादि संस्थाजपांतं कर्म समापयेत्॥ नात्र त्रिर्दुर्वन्न होमः॥ क
र्मांगत्वेन ब्राह्मणभोजनं संकल्प्य आचार्याय दक्षि[illegible]णां दत्वा प्रमदाकुर्वतां कर्मेति १२५

कर्मसादुण्याविष्णुं स्मरेत् यावज्जीवमेवमनयोरग्नेः परिचर्या कार्या॥ अग्निनाशे तु अग्न्योः
संसर्गो जाततान्ने पृथगग्न्योः सत्तिः॥ कार्यद्वयान्वारंभेण पुनराधानोक्तरीत्याग्नेः पुनरुत्पत्तिः
कार्या॥ केचित्तु पुनराधानेनाग्निद्वयं पृथगुत्सत्याग्न्योः संस्कारविधिनासंस्कारं कुर्यात्॥ द्व
यभार्याग्न्योदावप्येवमेवविधिः॥ संति बौधायनशौनकोक्ता उपाया अन्येपि॥ इति श्रीरुद्रस्वा
मिमतानुसारि द्विभार्याग्न्योः संसर्गप्रयोगः॥ अथान्वारंभणीयस्थालीपाकः॥ सूत्रा
नुक्तोपि शिष्टाचारदर्शनाल्लिख्यते॥ सचगृहप्रवेशनीयानंतरं पौर्णमास्याः पूर्व
चतुर्दश्यां पूर्वाह्णे कार्यः॥ गृह्याग्नेः पश्चा[illegible]त्सप[illegible]नीकः प्राङ्मुख उपविश्य देशका
लौ संकीर्त्य दर्शपूर्णमासस्थालीपाकं कर्तुं अन्वारंभणीयस्थालीपाक दशाहोतृसार
स्वतहोमपूर्वकं करिष्ये॥ इति संकल्प्य॥ गणेशपूजनादि कृत्वा॥ अग्निमुपसमा
धाय समित्त्रयमादाय अन्वारंभणीयस्थालीपाके होमकर्मणि या यक्ष्यमाणा दे
वताः स्ताः सर्वाः परिग्रहीष्यामि तूष्णीमिध्मेन यक्ष्ये॥ वाचस्पतिं ब्रह्माणं वाज्येन॥

स्था॰ प्र॰ पूर्णमासममावास्यां वाज्येन अग्नाविष्णू सरस्वन्तं सारस्वतं वाज्येन ॥ अग्निं भगिनं ॥
अग्निं स्विष्टकृतं वरुणायक्ष्ये प्रायश्चित्तहोमे ॥ अग्निं वायुं सूर्यं प्रजापतिं वाज्ये॰
११६
एतादेवतायक्ष्य इत्युक्त्वा ॥ समिधोग्नावाधाय आपूर्विकपक्षे पूर्वोक्तरीत्या कार्यः ॥
परिसमूह्य परिस्तीर्य पात्राण्यासाद्य प्रोक्षणी संस्कारादि कृत्वा ॥ दर्व्याज्यमादा
य ॥ चित्तिः स्रुक् ॥ चित्तमाज्यं ॥ वाग्वेदिः आधीतं बर्हिः केतो अग्निः विज्ञातमग्निः
वाक्पतिर्होता मनउपवक्ता प्राणो हविः ॥ सामाध्वर्युः वाचस्पते विधेनामन् ॥ वि
धेमतेनाम विधेस्त्वमस्माकंनाम वाचस्पतिः सोमं पिबतु ॥ आस्मासु नृम्णं धा
त्स्वाहा ॥ इत्येतं पठन् जुहोति ॥ वाचस्पतये ब्रह्मण इदं॰ ततः सारस्वतहोमः ॥ पूर्णापश्चा॰
गाय ॥ तस्यादे॰ दयंता स्वाहा ॥ पूर्णमासाय इदं॰ यत्तेदेवा॰ हित्वा ॥ सानोयं॰ वीरं
स्वाहा ॥ अमावास्याइदं॰ ततश्चरुं श्रपयित्वा दर्व्यापहत्य जुहोति ॥ अग्नाविष्णुभ्यां
स्वाहा ॥ अग्नाविष्णूभ्यामिदं॰ सरस्वत्यै स्वाहा ॥ सरस्वत्या इदं॰ सरस्वते स्वाहा ॥ ११६

सरस्वत इदं॰ अग्नये स्विष्टकृते स्वाहा ॥ अग्नये स्विष्टकृत इदं॰ व्याहृतिहोमं सर्वप्रायश्चि
त्तार्थं कृत्वा आचार्याय दक्षिणां दत्वा प्रमादात्कुर्वतां कर्मेति कर्मसादुण्या विष्णुं स्मरेत् ॥ इत्यन्वा
रंभणीयस्थालीपाकः ॥ अथ दर्शपूर्णमासप्रयोगः ॥ अथ चायं क्रमः ॥ गृहप्रवेशस्थालीपाका
नंतरं पौर्णमासं पर्वयदा भवति ॥ तदा चतुर्दश्यां दशहोतृ सारस्वतहोमपूर्वकमन्वारंभणीयस्था
लीपाकं कृत्वा पौर्णमासस्थालीपाकः स्वकाले कार्यः तस्य प्रयोगः ॥ गृह्याग्नेः पश्चात्सपत्नीकः
प्राङ्मुख उपविश्य देशकालौ संकीर्त्य दर्शपूर्णमासस्थालीपाकाभ्यां यक्ष्ये ॥ अद्य पौर्णमा
सस्थालीपाकेन यक्ष्ये ॥ इति पौर्णमास्यां ॥ दर्शस्थालीपाकेन यक्ष्ये ॥ इत्यमावास्यां ॥
इति संकल्प्य अग्निं प्रज्वाल्य समिधमादाय ॥ अद्य एही सादि प्राणानायम्य तं कृत्वा
पौर्णमासस्थालीकपो होमकर्मणि यायक्ष्यमाणा देवताः परिग्रहीष्यामि ॥ तूष्णी
मिध्मेन ॥ अग्निं वरुणा अग्निं स्विष्टकृतं वरुणा ॥ प्रायश्चित्तहोमे व्याहृतिदेव
ताश्चाज्येन समिधोग्नावाधा आपूर्विकपक्षेण पूर्वोक्तरीत्या कार्यः ॥ परिसमू
हनादि कृत्वा श्रतं चरुं बर्हिष्याधाय ॥ आहुतिपरिमाणं समिद्ध्यात्मकं इध्माग्नो

म॰हे॰प्र

॥११७॥

तूष्णींप्राशित्य दर्व्याऽपहृत्य सकृदवदाय जुहोति ॥ अग्नयेस्वाहा अग्नयइदं॰ अग्न
येस्विष्टकृते च हुत्वा सामान्यप्रायश्चित्तं कृत्वा ॥ परिषेकविसर्गौ कृत्वाग्निं संप्रार्थ्य
आचार्याय दक्षिणां दत्वा प्रमादात्कुर्वतां कर्मतिक्रमसा हुण्याय विष्णुं स्मरेत् ॥ इ
तिपौर्णमासस्थालीपाकप्रयोगः ॥ एवमेव दर्शस्थालीपाकः ॥ अथाग्रयणस्था
लीपाकप्रयोगः ॥ सूत्रानुक्तोपि शिष्टपरिगृहीतत्वात् ॥ स च शरदि वसंते च कार्यः ॥ लिख्यते॰

गृह्याग्नेः पश्चात्प्राङ्मुख उपविश्य देशकालौ संकीर्त्य व्रीह्यादिधान्यानां प्राश
नादिसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं पंचाज्याहुतिपूर्वकं आग्रयणस्थालीपा
कं करिष्ये ॥ इति संकल्प्य ॥ अग्निं प्रत्याल्य समिद्वयमादाय अश्वत्थ एहीत्यादिप्रा
णायामांतं कृत्वा ॥ आग्रयणस्थालीपाकहोमकर्मणि यायक्ष्यमाणा देवताः प
रिग्रहीष्यामि ॥ तूष्णीमग्निमिध्मेन यक्ष्ये ॥ इंद्रं द्यावापृथिव्यो ऋतून् ॥ इद्वत्स
रपरिवत्सरसंवत्सर इदं देवताभ्याज्येन ॥ इंद्राग्नी विश्वान्देवान् द्यावापृथिव्यौ च

११८

रुणा यक्ष्ये ॥ सामान्यप्रायश्चित्तदेवताभ्याज्येन ॥ यक्ष्य इत्युक्त्वा समिधोग्नावा
धाय आपूर्विकपक्षेण कार्यः ॥ परिसमूहनादि कृत्वा ॥ तूष्णीमिध्मं हुत्वा ॥ पं
चाज्यानि राज्येन जुहोति ॥ शतायुधाय॰ तिष्ठा हे ॥ शं तं योनः॰ विश्वा स्वाहा ॥ इं
द्रायेदं॰ ये चत्वारः॰ वियंति ॥ तेषां या अ॰ सर्वे स्वाहा ॥ द्यावापृथिवीभ्यामिदं॰ ग्रीष्मो हेमंत॰ न्नो अस्तु ॥ तेषामृतूनां शतशारदानां निवा॰ स्याम स्वाहा ॥
ऋतुभ्य इदं॰ इद्वत्सराय परिवत्सराय संवत्सराय कृणुता बृहन्नमः ॥ तेषां वय॰
स्याम स्वाहा ॥ इद्वत्सरपरिवत्सरसंवत्सरेभ्य इदं॰ भद्रान्नः श्रे॰ महित्वा ॥ स
नोम॰ या॰ स्योनः स्वाहा ॥ देवेभ्य इदं॰ ततः पूर्ववच्चरुं श्रपयित्वा तमुदग्उद्वास्य बर्हिष्या
धाय दर्व्योपहृत्य सकृदवदाय जुहोति ॥ इंद्राग्निभ्यां स्वाहा ॥ इंद्राग्निभ्यामिदं॰
विश्वेभ्यो देवेभ्य स्वाहा ॥ विश्वेभ्यो देवेभ्य इदं॰ द्यावापृथिवीभ्यां स्वाहा ॥ द्यावा

पृथिवीभ्यामिदं० अग्नये स्विष्टकृते स्वाहा ॥ अग्नये स्विष्टकृत इदं० आज्येन सर्वप्रायश्चित्तं व्याहृतिचतुष्टयं हुत्वा आचार्याय दक्षिणां दत्वा प्रमादात्कुर्वतां कर्मेति कर्म साद्गुण्याय विष्णुं स्मरेत् ॥ ततो ब्राह्मणा[illegible]न्संपूज्य भोज्यस्वयं न वान्नं प्राशनं कुर्यात् ॥ इत्याग्रयण स्थालीपाकः ॥ अथ पुनराधाने प्रयोगः ॥ पुनराधान सूत्रं वृत्तिकारेण व्याख्यातं ॥ तथाप्ति सकलशिष्टपरिगृहीतत्वात्प्रयोग उच्यते ॥ यस्मिन्नग्नौ विवाहहोमः ॥ स च औपासनाग्निः ॥ तस्मिन्सायं प्रातर्होमो नाहिताग्निर्भवति ॥ यद्दर्शपूर्णमासपार्वण स्थालीपाकः क्रियते ॥ न पूर्णमासस्थालीपाकयाजित्वा च अत्र सर्वाणि गृह्याणि कर्माणि पुंसवनप्रजा संस्काराणि च भवंति ॥ अत्र सत्यग्नौ प्रतिबंधादिनाद्वादशहोमविच्छेदे प्रायश्चित्तं ॥ अद्यसंस्कृत्य ॥ मनो ज्योतिर्जु० धातु ॥ या इष्टा उषसो० तेन स्वाहा ॥ मनसे ज्योतिष इदं० इत्येकाहुतिं हुत्वा ॥ व्यस्तसमस्तव्याहृतिचतुष्टयं हुत्वा सर्वान्होमानुप्रतिपत्ति सख्या यहोम[illegible]॥ कार्या ॥ द्वादशाहूर्ध्वं पुनराधेयः ॥ अथ यद्यनुगतस्तदा उद्धननादिभूसंस्कारं विधा

यस्वयोनितो मन्थनमग्निं प्रतिष्ठाप्याग्निं प्रज्वाल्याज्यं संस्कृत्य मनो ज्योतिरित्येकाहुतिं हुत्वा व्याहृतिचतुष्टयं हुत्वा दंपत्योर्मध्ये न्यतरस्योपवासः ॥ प्रातरनुगते आसायं ॥ सायमनुगते आप्रातरुपवस इदनुगते प्रायश्चित्तं ॥ अथ आलस्येन नष्टश्चेत्पुनराधानं अन्याग्निनाग्निसंसर्गे भार्यायाः ॥ सीमातिक्रमे च दर्शपूर्णमासतृतीयस्थालीपाकाकरणे च समा[illegible] सम्भिन्नाशे च रजस्वलादि संसर्गेणापहृतो च पुनराधानं कार्यं ॥ तत्र कालातिक्रमे प्रायश्चित्तं ॥ यजमानः पत्न्या सहकृतनित्य क्रियः ॥ देशकालौ संकीर्त्य मम अत्र प्रमादा[illegible]देतावत्कालपर्यंतं गृह्याग्नित्यागजन्यदोषपरिहारद्वारा श्रीपरमेश्वर प्रीत्यर्थं अमुक प्रत्याम्नायेन प्रायश्चित्तं करिष्ये ॥ इति संकल्प्य ॥ कालविच्छेद गणनया कार्यं ॥ तत्र त्रिवारं विच्छेदे प्राणा[illegible]यामशतं ॥ विंशतिरात्रावि

दि छेदे पक्करणे नमुपवासः ॥ मासद्वयविच्छेदे त्रिरात्रमुपवासः ॥ संवत्सरं विच्छेदे प्राजापत्यं ॥ द्विवर्षविच्छेदे मासं पयोव्रतं चान्द्रायणं गोदानं चेत्यादि देशकालकृत्ता

रतस्येतत्प्रायश्चित्तं दंपत्योः सहकुर्वीत एवं कृते प्रायश्चित्ते तु लुप्तानां सायंप्रातर्होमानां दर्श
पूर्णमासस्थालीपाकानां च पर्याप्तं व्रीह्यादिद्रव्यमाज्यं च ब्राह्मणाय दत्त्वा पुनराधानो
क्तेन नक्षत्रेनुकूले चंद्रे सपत्नीकः प्राङ्मुख उपविश्य देशकालौ संकीर्त्य ममविच्छिन्न
स्य गृह्याग्नेः पुनः संधानं करिष्ये॥ इति संकल्प्य गणेशपूजनादि कृत्वा॥ औपवता धा
नं त्रेण कुर्यात्॥ अग्न्यायतनं कटादिना परिश्रित्याध्यादिनोद्धृत्यावोक्ष्यासिकताभि
रवकीर्य॥ आरवूलकरादिसोमान्पालाशोडुंबरादिधानस्यत्याश्च संभारान् तूष्णीम
ग्न्यायतने न्यस्य संभृत्य प्रच्छाद्य स्वयोनिजातास न्नमग्निमाहृत्य मच्छरावेव कृत्वा प्र
ज्वाल्य भूर्भुवः सुवरित्यायतने प्रतिष्ठाप्य प्रज्वाल्य समित्त्रयमादाय अग्रहीत्यादि
प्राणायामौ तं कृत्वा पुनराधेय होमकर्मणि यक्ष्यमाणा देवतास्तासर्वाः परिग्र
हीष्यामि जातवेदसमग्निमिध्मेनेत्यादि व्याहृत्यंतं मुक्ता प्रधानहोमे॥ मिंदवंत
मग्निमाज्येन॥ अग्निमिंद्रबृहस्पतिमश्विनावाज्येन॥ तंतुमंतमग्निं त्रिराज्येन॥

ना

अभ्यावर्तिनमग्निं चतुः आज्येन॥ व्याहृतीमग्निं वायुं सूर्यं प्रजापतिं चाज्येन॥ अयासम
ग्निमाज्येन॥ मनोज्योतिराज्येन प्रजापतिमाज्येन॥ सप्तवंतमग्निमाज्येन॥ ब्रह्माणं
वाचस्पतिमाज्येन॥ अंगहोमे वरुणं द्विरित्यादि संस्राविणेत्यंतं मुक्ता समिधोग्नावाधा
य व्याहृत्यंतं मुक्ता प्रधानहोमं करोति॥ यन्म आत्मनो० वर्मणि स्वाहा॥ मिंदवतेग्नय इदं०
पुनरग्निश्च० स्पतिः॥ पुनर्मे अ० क्ष्यो स्वाहा॥ अग्नये बृहस्पतये अश्विभ्यामिदं० ×भ्याx
तंतुं तन्वन्रज० कृतान्॥ अनुल्बणं० जनं स्वाहा॥ तंतुमतेग्नय इदं० उद्बुध्यस्वा०
ग्ने प्रतिजागृह्येनं० यं च॥ पुनः कृ० तुमेतं स्वाहा॥ तंतुमतेग्नय इदं० स्त्रय स्त्रिंशत्०
अप्येतु स्वाहा॥ तंतुमतेग्नय इदं० अग्ने अभ्याव० धनेन स्वाहा॥ अभ्यावर्तिनेग्नय
इदं० अग्ने अंगिरः शं तं ते संत्वा० वृतः॥ नासां पोष० कृधि स्वाहा॥ अभ्यावर्तिनेग्न
य इदं० पुनरूर्जा नि० इषायुषा॥ पुनर्नः पा० तः स्वाहा॥ अभ्यावर्तिनेग्नय इदं० चत
स्रो व्याहृतीर्हुत्वा॥ अयाश्चाग्नेस्यनभिशस्तिश्च सत्यमित्वमया असि॥ अयसा

×सह रय्या निवर्तस्वाग्ने० रया॥ विश्व० रि स्वाहा॥ अभ्या० इदं० २

म०हे०प्र मनसाध्यतोयसा हव्यमूहिषेयानो धेहि सेषज०ं स्वाहा॥ अयसेग्नय इदं० मनोज्योतिर्जु०
धातु॥ याइष्टाउषसोनिम्रु० घृतेन स्वाहा॥ मनसेज्योतिष इदं० प्रजापतये[illegible]॥ प्रजा ॐ ता*
११० पतय इदं० सप्तते अग्ने० याणि॥ सप्तहोत्राः० घृतेन स्वाहा॥ सप्तवतेग्नय इदं०॥ चि
त्तिस्रुक् चित्तमाज्यं॥ वाग्वेदिः आधीतं बर्हिः॥ केतो अग्निः॥ विज्ञातमग्निः॥ वाक्
पतिर्होता॥ मन उपवक्ता॥ प्राणो हविः सामाध्वर्युः॥ इति दशहोतारं मनसानुद्रुत्य॥
वानस्पतेविधेनामन॥ विधेमतेनाम॥ [illegible]विधेत्वमस्माकंनाम॥ वानस्पतिः सोमं
[illegible]पिबतु[illegible]॥ आस्मासुनृम्णं धाः स्वाहा॥ [illegible]वानस्पतेब्रह्मण इदं० इत्यष्टाद
शप्रधानाहु[illegible]ती हुत्वा॥ इमंमेवरुणेत्यादिसंस्थाजपांतं कर्म समाप्य॥ त्रिवर्षे [illegible]न्ते
होमं पुण्याहवाचनं समाप्य॥ ततः पुनराधेयांगभूतमाग्नेयस्थालीपाकं कंरिष्ये॥ इति
संकल्प्य॥ उक्तरीत्या कुर्यात्॥ कर्मणः सांगतासिद्ध्यर्थं गुरवे वाससी धेनुमनड्वाहं वा य
थाशक्ति दक्षिणां दत्वा प्रमादात्कुर्वतां कर्मेति कर्मसाद्गुण्याय विष्णुं स्मरेत्॥ इति सत्या ११०

षाढहिरण्यकेशी० पुनराधानप्रयोगः॥ अथ सभार्यस्य प्रवासविधिः॥ यदि सभार्यः
प्रयास्यन्नग्निं समारोप्य गच्छेत्॥ अथ समित्समारोपः॥ अग्नौ समित्समारोपण
प्रतापन प्रत्यक्षाग्नेः सकाशाद्देवतारूपस्याग्नेरायतनं समारोपणं तद्यजमानोऽध्व
र्युर्वा कुर्यात्॥ आत्मसमारोपणं तु यजमानस्यैव भवति॥ अयं ते योनिर्ऋत्वियो यतो जा
तो अरोचथाः॥ तं जानन्नग्न आरोहाथा नो वर्धया रयिमिति॥ आत्मसमारोपः॥ या ते
अग्ने यज्ञिया तनूस्तयेह्यारोहात्मात्मानं॥ अच्छा व० सूणि॥ यज्ञो भूत्वा० योनिं॥ जात
वेदो० एहि॥ इति हस्तं प्रताप्य मुखेन नासिकया वा उष्माकर्षणमात्म समारोपणं [illegible]
यजमानः कुर्यात्॥ नद्युत्तरणे ग्रामसीमातिक्रमे च दंपत्योरन्वारंभः॥ यत्रावतिष्ठेत तत्र
स्वयोनितोऽसन्नमग्निमाहृत्य संस्कृत्यायतने संस्थापयति॥ अथ समिदग्न्यावरोपः॥
अजुह्वानः सुप्रतीकः पुरस्तादग्ने स्वां योनिमासीद साध्या॥ अस्मिन्सधस्थे अ
ध्युत्तरस्मिन्विश्वे देवा यजमानश्च सीदत॥ उद्बुध्यस्वाग्ने प्रतिजागृह्येनमिष्टापूर्ते

म०प्र

१११

सꣳसृजेथामयुं च॥ पुनः कृण्वꣳ॰तुमेतं॥ इति द्वाभ्यामवरोपः कार्यः॥ आत्मसमा
समारूढ ह्यग्नेवरोपः॥ उद्धननादिना संस्कृतायतने ग्निमानीय प्रज्वाल्य मुख
ननासिकया वा श्वसमारोपयति॥ उपावरोह जातवेदः पुनस्त्वं देवेभ्यो हव्यं वह नः प्र
जानन्॥ आयुः प्रजाꣳरयिमस्मासु धेह्यजस्रो दीदिहि नो दुरोणे॥ इति सभार्यस्य
प्रवासविधिः॥ अथांतरीयस्थालीपाकानां तंत्रप्रयोगः॥ अथ यदि पर्वणि स्था
लीपाको न कृतस्तदा आगम्यान्वाधानाविधिना तेन तस्य गौणः कालः॥ गौणकाले
पि न कृतस्तदा आगामिपार्वणेन सह कार्यः॥ अंतरितस्थालीपाकममुकस्थाली
पाकेन सह करिष्ये॥ इति संकल्प्य॥ एकं चरुं स्थालीपाकतंत्रेण श्रपयित्वा यथादे
वतं विभज्य सकृत्स्वदाय जुहोति॥ अग्नये पथिकृते अग्नये॥ अग्नये स्विष्टकृ
ते इत्याहुतित्रयं हुत्वा॥ अन्यत्समानं॥ यदि द्वितीयः॥ गौणकालेपि न कृतस्तदा द्वौ

१११

विच्छिन्नौ तृतीयस्थालीपाकेन सह गौणकाले कार्यौ॥ अंतरितावमुकस्थालीपा
कौ अमुकस्थालीपाकेन सहतंत्रेण करिष्य इति संकल्प्य॥ श्रुतमेकं चरुं यथादे
वतं विभज्य सकृत्स्वदाय दर्व्या जुहोति॥ अग्नये पथिकृते॥ अग्नये वैश्वानराय॥
अग्नये॥ अग्नये स्विष्टकृते॥ इत्याहुतिचतुष्टयं हुत्वा॥ अन्यत्समानं॥ यदि
तृतीयस्थालीपाकं गौणकालेपि न करोति॥ तदा पुनराधानं कुर्यात्॥ पौर्णमास्यां प
थिकृदमावास्यायां वैश्वानर इति दृष्टं इत्यंतरितस्थालीपाकप्रयोगः॥ श्र
अथ वेदोपाकरणप्रयोगः॥ तत्र हि वेदोपाकरणं काण्डोपाकरणं या विषयमुख्यार्थं
किंचिद्विचार्यते॥ उपनयने जाते तैत्तिरीयकाणां गायत्र्यारंभणे वसर्ववेदारंभे जातेस्ये
तत्वात्॥ ब्रह्मचारी उपनयनानंतरं विद्यारंभानुकूले मुहूर्ते प्रथमं प्राजापत्या
पत्यादि काण्डव्रतानि तद्विधिनोपाकृत्याध्ययनं कुर्यात्॥ मध्ये चोपाकरणकाले

×पाकृत्याध्ययनं कुर्यात्॥ मध्ये चोपाकरणकाले आगते यथाकालं वेदमुपाकृत्य यथापाठम
ध्येतव्यं उत्सर्जनकाले चावर्तं तद्विधिना×२

म॰ हे॰ आगते यथाकालं वेदमु[illegible]पाकृत्य यथापाठमध्येतव्यं उत्सर्जकाले चागते वेदं तद्वि
धिनोत्सृज्य यथापाठमध्येतव्यं॥ प्रतिबंधवशादिकृतकांडोपाकर×ब्रतो×णस्य

११२ वेदोपाकरणे काले चागते वेदमुपाकृत्य कांडोपाकरणं कृत्वा मध्येतव्यं॥ उत्स
र्जनकाले चागते वेदमुपाकृत्य कांडोपाकरणं कृत्वा मध्येतव्यं॥ उत्सर्जनकाले चाग
ते कांडव्रतानि तद्विधिनोत्सर्जेदित्यर्थसिद्धमेव॥ कांडानां संकीर्णत्वेन यथाकांडम
ध्ययनं नास्ति॥ अतः कांडव्रतानामेवोपाकरणं कृत्वा सारस्वतेपाठेनाध्ययनं क
र्तव्यमिति॥ अपिचागुरुक्रमेण उपाकरणोत्सर्जयोरनुष्ठानं सर्वेषामावश्यकं ग्रह
णधारणब्रह्मयज्ञाध्ययनानां काम्याध्ययनस्य चास्त्राणो द्धासादिज्ञानितयानं
यामतानिरासेनाप्यायन[illegible]त्वेन प्रायश्चित्तरूपत्वात्॥
किंचिदध्ययनवतोपि॥ उपाकरणोत्सर्जनयोरावश्यकत्वं॥ अकृतोपाकरणस्य
जयहोमादेर्निष्फलस्य श्रवण[illegible]त्॥ ब्रह्मचारिणाकृतोपाकरस्य तु समावर्त

११२

नेपुनरुपयनं॥ उपाकरणं श्रावणे मास्यापूर्यमाणपक्षे हस्तेनक्षत्रे वा श्रवण्यां पौ
र्णमास्यां वा भाद्रपद्यां वा कार्यं॥ उत्सर्जनं तु कृतोपाकरणस्यैव भवति॥ तच्च पुष्यमा
स्या[illegible]पूर्यमाणपक्षे रोहिण्या वा पौष्यां पौर्णमास्यां वा माघ्यां वा कार्यं॥ उपाकरणो
त्सर्जनयोः पौर्णमासि हस्तरोहि[illegible]णनक्षत्राणि षण्मुहूर्तान्युदयव्यापिनीग्राह्या
णि॥ नो चेत्पूर्वयुतानीति पराशरमाधवकालादर्शप्रभृतयः॥ संगवात्परतश्चे
द्भवन्ति तदा तौ[illegible]दये कार्या ग्राह्यान्यात्पूर्वैव॥ ग्रहणसंक्रमणराजमरणदेशोप
द्रवेषु अनुत्पन्न धान्ये च उपाकरणोत्सर्जनेन कार्यं॥ प्रथमोपाकरणोत्सर्जने
व्यतीपाताधिमासेषु न भवतः॥ अत्र पक्षत्रयेपि सप्तवर्दिनं ग्राह्यं॥ उपाकरणमप
राह्णे॥ उत्सर्जनं तु पूर्वाह्णे कार्यं॥ उत्सर्जनं स्वकाले न जात[illegible]तदा उत्सर्जनं कृत्वा॥ उ
पाकरणं कार्यं॥ नानयोस्तंत्रेणानुष्ठानं। अनाम्नानात्। कालविरोधात्। स्वरूपविरोधाच्च॥

म०त्र

११३

अथप्रयोगः॥ आचार्यःशिष्यादिभिः सहशुचौदेशेदर्भासनेद्वारदर्भपाणिः प्राङ्
मुखउपविश्यदेशकालौसंकीर्त्य॥ अधीतानांछंदसामध्येष्यमाणानांचच्छन्दो
च्छूसादिजनितयातयामतानिरासेनाप्यायनद्वाराश्रीपरमेश्वरप्रीत्यर्थं द
भिर्ब्राह्मणैःसहवेदोत्सर्जनाख्यंकर्मकरिष्ये॥ इतिसंकल्प्यउक्तरीत्याकुर्या
त्॥ ततःप्रक्प्रवणादिदेशेउल्लेखनादिभूसंस्कारंविधाय बलवर्धननामानं
लौकिकमग्निंप्रतिष्ठाप्यप्रज्वाल्यसमित्त्रयमादायअध्यएहीत्यादिप्राणायामं
कुर्यात्॥ वेदोपाकरणहोमकर्मणियायक्ष्यमाणादेवताःपरिग्रहीष्यामि॥
इत्यादिव्याहृत्यंतमुक्त्वा वैशेषिकहोमे॥ प्रजापतिंकांडऋषिंसोमंकांडऋषिं॥
अग्निंकांडऋषिं॥ विश्वान्देवान्कांडऋषिं॥ स्वयंभुवंकांडऋषिं॥ सावित्रीं॥
ऋग्वेदं॥ यजुर्वेदं॥ सामवेदं॥ अथर्ववेदं॥ सदसस्पतिंपरमात्मानंयज्ञोपवी

११३

तेनयक्ष्ये॥ अंगहोमे॥ वरुणंद्विरित्यादिव्याहृत्यंतमुक्त्वा॥ प्रधानहोमः॥ प्रजापतये
कांडऋषयेस्वाहा॥ प्रजापतयेकांडर्षयइदं० सोमायकांडऋषयेस्वाहा॥ सोमा
यकांडर्षयइदं० अग्नयेकांडऋषयेस्वाहा॥ अग्नयेकांडर्षइदं० विश्वेभ्योदेवेभ्यः
कांडऋषिभ्यःस्वाहा॥ विश्वेभ्योदेवेभ्यःइदं० स्वयंभुवेकांडऋषयेस्वाहा॥ स्व
यंभुवेकांडऋषइदं० सावित्र्यैस्वाहा॥ सावित्र्याइदं० ऋग्वेदायस्वाहा॥ ऋग्वेदा
येदं० यजुर्वेदायस्वाहा॥ यजुर्वेदायेदं॥ सामवेदायस्वाहा॥ सामवेदायेदं०
अथर्ववेदायस्वाहा अथर्ववेदायेदं० सदसस्पतयेस्वाहा॥ सदसस्पतयइदं
नाममंत्रेणैवहोमः॥ सावित्र्यासहचर्यात्॥ यज्ञोपवीतंपरमंपवित्रंप्रजापतेर्य
त्सहजंपुरस्तात्॥ आयुष्यमग्र्यंप्रतिमुंचशुभ्रंयज्ञोपवीतंबलमस्तुतेजः स्वाहा॥
परमात्मनइदं० इत्यादत्वाचधारयेदितिशास्त्रांतरदर्शनात्॥ यज्ञोपवीतस्यहोमः

दानं धारणं च कर्तव्यं ॥ आयुरभिवृध्यर्थं यज्ञोपवीतदानं च करिष्ये ॥ इति संकल्प्य दद्यात् ॥
ततः श्रौतस्मार्तकर्मानुष्ठानसिध्यर्थं यज्ञोपवीतधारणं च करिष्ये ॥ इति संकल्प्य ॥ यज्ञो
पवीतं [illegible] मितिमंत्रेण धारयेत् ॥ ब्रह्मचारी तु कृष्णोपवीतमेखलाजिनोत्तरीयदंडानि
त्रिधान्युपाकरणं प्रत्युत्सर्जनं च नवानि धृत्वा पुराणान्यप्सु निक्षिपेत् ॥ ततः आचार्यः
सगणो दर्भपाणिः ॥ इषेत्वेत्यादिमनुवाकं पठेत् ॥ अथवा पंचानां कांडानामादितः पंचानुवा
कान्पठेत् ॥ ततः आचार्यः ॥ उपाकृतावैवेदाः ॥ न्यहमेकाहं वानध्यायः ॥ कार्यइत्युक्त्वा ॥ ततः
इमंमेवरुणेत्यासंस्थाजापतं कर्म समापयेत् ॥ नात्र त्रिरुदन्नहोमः ॥ ततः उपाकरणांग
त्वेन वेदप्रीत्यर्थं ब्राह्मणान्भोजयेत् ॥ ततः यथाशक्तिमासंमसीत्यादीनि पर्जन्यसूक्तानि
पठित्वाचारात् ॥ ततो ब्राह्मणान्संपूज्य दक्षिणां दत्वा ॥ कर्मसाद्गुण्याय विष्णुं स्मरेत् ॥ कृ
कांडादयस्तु ॥ इषेत्वोर्जेत्वा ॥ आप्यायंतु जीवसे ॥ युंजानः प्रथमंमनः ॥ अनुमत्यैपुरोडाशं ॥
सहवैदेवानांचासुराणां च यज्ञौ प्रततावास्तां विधिनेदं ब्रह्मयज्ञविधिनाध्ययनं ॥ ब्रह्म

त

त

यज्ञकर्मणि यथाविहितमध्ययनं ॥ उपाकरणोत्सर्जनस्तद्भिन्नत्वात् ॥ अतिरिक्तंकरणे
प्रायश्चित्तंश्रवणात् ॥ यावदुक्तमेव पठेत् ॥ इति सत्याषाढहिरण्यकेशी ० वैशंपायनम
हेश [illegible] भट्टकृतौ उपाकरणप्रयोगः ॥ अथोत्सर्जनप्रयोगः ॥ अत्रोपाकरणे [illegible]
उत्सर्जने च कांडर्षीन्जुहोतीत्येकत्वश्रुतः ॥ सगण इति शिष्यादेरप्राधान्यश्रुतेः ॥ अथाप्य
न्वारन्वारब्ध इति शाखांतर [illegible] दर्शनादाचाराच्च ॥ आचार्यः कर्ता अन्वारंभमात्रमितरे

षां ॥ अनुवाकानधीयंते ब्राह्मणैश्चतर्पयंतीति ब [illegible] हुवचनाद्धाचानिकयनमध्ययनं ॥ ब्राह्मण
भोजनं च सर्वेषां ॥ उत्सर्जने चास्ति त्रिरुदन्नहोमः ॥ त्रिरुदन्नहोमप्रसंगे च वृत्तिकृतोक्तं ॥ य
त्र होमो ब्राह्मणभोजनोक्तं ॥ तत्र त्रिरुदन्नहोमः ॥ गृह्यांतरोक्तकर्मणि वेधतडागोत्सर्जना
दौ होमब्राह्मणभोजनवति ॥ अतिप्रसंगवारणायोक्तं ॥ यत्राचारोप्यस्ति ॥ तत्रैव त्रिरुद
न्नहोमः ॥ आचाराभावे दृभावस्यादिति ॥ कर्णवेधादौ लाचाराभावान्नास्त्यतिप्रसंगः ॥
उत्सर्जने तु होमो ब्राह्मणभोजनं चोक्तमस्ति ॥ अनादिशिष्टपरंपरया त्रिरुदन्नहोमानुष्ठा

भि२

म०हेम्र ॥११९॥ राम्

तारश्च दृश्यंते॥ अतो न भवति त्रिवृदन्नहोमः॥ अतएवोत्सर्जने त्रिवृदन्नहोमो नास्तीति किं सूत्रमणि॥ प्रत्येत्यापूपैः सक्तुभिरोदनेनेति ब्राह्मणांश्च तर्पयं [illegible] तीती॥ नास्तिको वदति स्तेः प्रत्येत्य अस्यापादानां कांक्षायां संनिहितत्वादाजिसरणमेव संबध्यते॥ न ग्रामः व्यवहितत्वात्॥ तेन आजिसरणात् प्रत्येत्य होमदेशमागत्य अन्नहोमान् कृत्वा पुण्याहांतं समाप्य ग्रामं प्रविश्य अपूपादिभिर्ब्राह्मणभोजनं कार्यं॥ वृत्तिकारैरप्येवमेव व्याख्यातं॥ आजिसरणात् प्रत्येत्य होमदेशमागत्य अन्नहोमान् कृत्वा ग्राममप्रविश्य अपूपादिभिर्ब्राह्मणभोजनं कार्यमिति॥ अतश्च भवति त्रिवृदन्नहोमः॥ केचिदयं व्याख्यातं आजिसरणात् ग्रामं प्रत्येत्य कृत्वान्नहोमानपूपादिभिर्ब्राह्मणभोजनं कार्यं॥ इति॥ नायं पक्षो युक्तः सन्निहितसंबंधे संभवति व्यवहितसंबंधकल्पनायां प्रमाणाभावात्॥ पूर्वापरविरोधाश्च केचित्पुस्तके नास्ति पाठः॥ अतः प्रक्षिप्तं न्यायन्यायविरुद्धं वेदव्याख्यानमित्युपेक्षणीयं॥ अपिवा ब्राह्मणतर्पणं ब्राह्मणभोजनमिति समाना ॥११९॥

सति २

त्रिवृदन्न ९

र्थं तपरिषेके पूर्वकमिति॥ ब्राह्मणानन्नेन परिवेष्यति सिद्धं सर्वसूत्रे तत्समभिव्याहृतं पुण्याहवाचनं तत्॥ ब्राह्मणांश्च तर्पयंतीति चकारेण समुच्चीयते॥ तेन ब्राह्मणानन्नेन परिवेष्य पुण्याहं स्वस्त्ययनमृद्धिमिति वाचयितव्यमिति तदुपपन्नं भवति॥ अभ्यर्हितसंग्रहश्च॥ अत्रान्नपरिवेषस्यात्तत्रान्नेहोमे इष्यत इति॥ अतोपि वा [illegible] स्युत्सर्जने त्रिवृदन्नहोमः॥ त्रिवृदन्नसूत्रे ओदनस्यापूपानां सक्तूनामिति पृथक्निर्देशः स्वरूपज्ञानार्थः॥ मध्ये त्रिवृच्छब्देन निर्देशो लाघवार्थः॥ अंते उत्सर्जनसूत्रे त्रिवृतान्नेनेति वक्तव्ये॥ अपूपैः सक्तुभिरोदनेनेति व्युत्क्रमेण निर्देशः स्वपक्षे दें क्रमबाधार्थः॥ तेन द्रव्यत्रयं कथमप्येकीकृत्य होतव्यमिति स्यात्तन्नेष्टमिति अन्यता ओदनादिपाठक्रमेण दार्व्येकीकृत्य होतव्यामिति स्यात्तन्नेष्टमिति व्युत्क्रमेण सूत्रिमाचार्यै॥ यत्र सूत्रकृत्सर्थयोरज्ञाने न भ्रातं प्रतारणायो क्रमुत्सर्जने त्रिवृदन्नहोमो नास्तीति तितत्तद्देवानां प्रियस्य वृथा प्रलापितमित्युपेक्षणीयं पुनरपि भङ्ग्यं वधाम द्विरित्यलं पल्लवितेन उत्सर्जने स्वकाले न ज्ञातं तदुपाकरणदिवसे क्रियते॥ तदा अं

२ त

प २

ण २

म०हे०प्र
११६

अंतरितमुत्सर्जनं कृत्वा॥ भिन्नमुपाकरणं कर्तव्यं न तु तयोः सतंत्रेणोपाकरणोत्सर्जनयोर्या
गरूपयोरेकत्रासंभवात् प्रयोगः॥ छ॥ छ॥ आचार्यशिष्यादिसहितः प्रागुदीचीं
वा दिशमुपनिष्क्रम्य यत्र निर्मलत्वग्रहादिरहिता आपः सन्ति तत्समीपे शुचौ देशे दर्भपाणिरा
चम्य प्राणानायम्य देशकालौ संकीर्त्य॥ छ॥ अधीतानां छन्दसामध्येष्यमाणानां च छन्दसां
छन्दसामादिजनितयातयामतानिरासेनाप्यायनद्वारा श्रीपरमेश्वरप्रीत्यर्थं एभिर्ब्राह्मणैः
सह वेदोत्सर्जनाख्यं कर्म करिष्ये॥ तदङ्गं गणपतिपूजनं पुण्याहवाचनं मातृकापूजनं नान्दी
श्राद्धं च करिष्ये॥ इति संकल्प्य उक्तं कृत्वा जलसमीपं गत्वा आत्मशुद्ध्यर्थं भस्मगोमय
मृत्तिकास्नानानि करिष्ये इति संकल्प्य कुर्यात् आचारात्॥ जलसमीपं गत्वा भस्मादाय॥
ईशानाय नम इति शिरसि॥ तत्पुरुषाय नम इति मुखे॥ अघोराय नम इति हृदये॥ वामदेवा
य नम इति गुह्ये॥ सद्योजातमिति पादयोः अग्निरिति भस्म॥ वायुरिति भस्म॥ जलमिति भस्म॥
स्थलमिति भस्म॥ व्योमेति भस्म॥ सर्वं ह वा इदं भस्म॥ ~~मानस्तोक इति पठित्वा॥ सर्वांगानि समालि~~

~~लिप्य~~॥ मानस्तोके तनये मा न आयुषि पठित्वा सर्वांगे भस्म विलिप्य॥ स्नात्वा आचम्य गोमयस्ना
नं॥ गायत्र्या गोमयमादाय॥ गंधद्वारामिति तु॥ अग्रमग्रं चरंतीनामोषधीनां वने वने॥ ता
सामृषभपत्नीनां पवित्रं कायशोधनं॥ तन्मे रोगांश्च शोकांश्च नुद गोमय सर्वदेति शिरःप्रभृ
त्यंगानि विलिप्य॥ स्नात्वाचम्य ततो मृत्तिकास्नानं॥ अश्वक्रांते रथक्रांते इति भूमिमभिमं
त्र्य॥ भूमिर्धेनुरिति लोष्टमादाय॥ ~~सहस्रपरमेति दूर्वामभिमंत्र्य॥ कांडात्कांडादिति दूर्वामादा~~
य॥ सहस्रपरमेति दूर्वामभिमंत्र्य॥ कांडात्कांडादिति दूर्वामादाय॥ याशतेनेति दूर्वां मृदि प्रति
ष्ठाप्य॥ मृत्तिके हन मे पापमिति मृदमभिमंत्र्य॥ यत इन्द्र भयामहे स्वस्तिदा विशस्पतिः० स्वस्ति न इं०
आपांतमन्युस्तृपल० ब्रह्मजज्ञानं० स्योना पृथिवीति प्रत्यादिदिक्चतुष्टये ऊर्ध्वमधश्च लोष्ट
मुत्क्षिप्य॥ गंधद्वारामित्यादित्याय संदर्शयित्वा॥ श्रीर्मे भजत्विति ललाटमालिप्य॥ अलक्ष्मीर्मे न
श्यत्विति दक्षिणे शिरो विलिप्य॥ विष्णुमुखा इति मुखं॥ महाँ इन्द्रो वज्रबाहुरिति बाहू॥ सोमानं
स्वरणमिति कुक्षी॥ शरीरं यज्ञशमलमिति शरीरं॥ चरणं पवित्रमिति चरणौ विलिप्य॥ सजो
षा इन्द्रेति मृत्पिंडं शिरसि निधाय॥ सुमित्रा न इत्यद्भिरात्मानमासिच्य॥ दुर्मित्रास्तस्मै भूयासु
प्रति दिशं ९

 शितिद्विषं तं मनसाध्यान् भूमौ निक्षिपेत् ॥ यो स्माद्वेष्टि शितिद्वीतीयं ॥ मंत्रनयं द्विष्म इतिन् तीनि क्षिप्य ॥ हिरण्यशृंगमिति वरुणं प्रार्थ्य ॥ तीक्ष्णदंष्ट्र महाकाय कल्पांत दहनोपम ॥ भैरवाय नमस्तुभ्यमनुज्ञां दातुमर्हसि ॥ सागरः स्यतु निःश्वासो दंडहस्तो सुरांतकः ॥ जगस्त्रष्टा जगमर्दिन मामितो सुरेश्वर ॥ इमं मंत्रं समुच्चार्य तीर्थे स्नानं समाचरेत् ॥ अन्यथा तत्फलं स्यार्धं तीर्थे शो हरति ध्रुवं ॥ इति वरुणं प्रार्थ्य ॥ इमं मे गंगेति पाणिनो दकं प्रदक्षिणमावृत्य ॥ ऋतं च सत्यं चाभीध्यादिति त्यच्रता तच्चेनाघमर्षणमंत्रेण त्रीं प्राणायामान्कृत्वा ॥ सपवित्रैः पाणिभिरापोहिष्ठेति तिसृभिर्हिरण्यवर्णाः शुचयः पावका इति चतसृभिः पवमानः सुवर्जन इत्यनुवाकेन चेति चकारेण स्नाने मंत्राणां समुच्चयः तेन सर्वमंत्रांते एकवारं स्नात्वा ॥ बहिरागत्य अन्योन्यस्मै दर्भाग्रयज्ञ आदित्संतोवा ॥ वस्त्रपरिधानानि कुर्युः ॥ ततो आचार्यैः शिष्यादिभिः सह प्राङ्मुखउपविश्याचम्य दर्भपाणिः ॥ उत्सर्जनांग देव ऋषि पितृ पूजनं करिष्ये ॥ इति संकल्प्य ॥ देवगणादिपूजार्थं चतुरस्त्रां प्रवणामुदक्प्रवणां दक्षिणाप्रवणां च वेदिं कुर्यात् ॥

प्राक्

तत्र प्राक्प्रणे प्रागग्रैर्दर्भैरुदगपवर्गाण्यासनानि कल्पयंति ॥ ब्रह्मणे आसनं कल्पयामीत्येवं सर्वत्र ॥ प्रजापतये० बृहस्पतये० अग्नये आस० वायवे आस० सूर्याय० चंद्रमसे० नक्षत्रेभ्यः० इंद्राय राज्ञे० यमाय राज्ञे० वरुणाय राज्ञे० सोमाय राज्ञे० वैश्रवणाय राज्ञे ॥ वसुभ्यो० रुद्रेभ्यः० आदित्येभ्यः० विश्वेभ्यो देवेभ्यः० साध्येभ्यः० ऋभुभ्यः० भृगुभ्यः० मरुद्भ्यः० अथर्वभ्यः० अंगिरोभ्यः० इति त्रयोविंशति देवगणानामासनानि कल्पयित्वा ॥ ततो निवीतिनः ॥ उत्तरत उदीनप्रवणे देशे उदगग्रैः दर्भैः प्राक्संस्थानि कल्पयंति ॥ विश्वामित्राय० जमदग्नये० भरद्वाजाय० गौतमाय० अत्रये० वसिष्ठाय० कश्यपाय० अनयोर्मध्ये अरुंधत्यै० इत्यष्टावासनानि कल्पयित्वा ॥ देवेभ्यो दक्षिणतः प्राक्प्रणे देशे प्राणग्र मासनगस्त्यय० ततो अगस्त्यासनादारभ्य प्राक्प्रवण रूपायामेकस्यां वेद्यां कृष्णद्वैपायनादि इतिहासपुराणांतेभ्यः एकपंचाशद्भ्यः प्रागग्रैरुदक्संस्थानि कल्पयंति ॥ कृष्णद्वैपायनाय० जातूकर्ण्याय० तरुक्षाय० तृणबिंदवे० वर्मिणे० वरूथिने० वाजश्रवसे० सत्यश्रवसे० सुश्रवसे० सुतश्रवसे० सोमशुष्मायणाय० सत्ववते० बृहदुक्थाय० वामदेवाय० वाजिरत्नाय० हर्यज्ञायनाय० उदमयाय०

महे॰ग्रयो॰ गोतमाय॰ ऋणंजयाय॰ ऋतंजयाय॰ कृतंजयाय॰ धनंजयाय॰ बभ्रवे॰ त्र्यरुणाय॰ त्रिवर्षाय॰ त्रिधातवे॰ शिबिंताय॰ पराशराय॰ विष्णवे॰ रुद्राय॰ स्कंदाय॰ काशीश्वराय॰ ज्वराय॰ धर्माय॰ अर्थाय॰ कामाय॰ क्रोधाय॰ वसिष्ठाय॰ इंद्राय॰ त[illegible]ष्ट्रे॰ कर्त्रे॰ धर्त्रे॰ धात्रे॰ मृत्यवे॰ सवित्रे॰ सावित्र्यै॰ ऋग्वेदाय॰ यजुर्वेदाय॰ सामवेदा॰ अथर्ववेदा॰ इतिहासपुराणाय॰ इति ऋषीणामासनानि दत्वा॥ एभ्यो दक्षिणतो दक्षिणावंशे देशे दक्षिणाग्रैर्दर्भैः प्राचीनावीतिनः स्वगण[?]गाण्यासनानि कल्पयंति॥ वैशंपायनाय॰ पलिंगवे॰ तित्तिराय॰ उखाय॰ आत्रेयाय पदकाराय॰ कौडि[illegible]न्याय वृत्तिकाराय॰ सूत्रकारेभ्यः॰ सत्याषाढाय॰ प्रवचनकर्तृभ्यः॰ आचार्येभ्यः॰ ऋषिभ्यः॰ वानप्रस्थेभ्यः ऊर्ध्वरेतोभ्यः॰ एकपत्नीभ्यः॰ इति चतुर्दशसाधारणपितृभ्यः आसनानि दत्वा॥ ततो यथाधिकारं गोत्रसंबंधं नामपूर्वकं॥ पितृपितामहप्रपितामहाय॥ मातृपितामह्यै प्रपितामह्यै॥ मातामहाय मातुः पितामहाय मातुः प्रपितामहाय॥ मातामह्यै मातुः पितामह्यै मातुः प्रपितामह्यै आसनं कल्पयामीत्येवं सर्वत्र॥ ततो यज्ञोपवीतं कृत्वा॥ उदकेन ब्रह्माणं तर्पयामीत्येवं ब्रह्मादिदेवान् संतर्प्य॥ निवीतो विश्वा
ति

प्र

प्र९

राम

मित्रादिइतिहासपुराणांतान्॥ ऋषीन् संतर्प्य॥ प्राचीनावीतिनो वैशंपायनादिपितॄन् यथादिकारं पित्रादींश्च तर्पयंति॥ ततो यज्ञोपवीतिनः॥ ब्रह्मणे नमः॥ एवं सर्वत्र गंधपुष्पधूपदीपैरभ्यर्च्य॥ निवीतिन ऋषीन्॥ प्राचीनावीतिनः पितॄन्॥ ततो ब्रह्मा[द्या] आवाहित देवेभ्यो मे ब्रह्मा स्वाहेति अन्नं संतर्प्य॥ निवीती ऋषीन्॥ प्राचीनावीतिने न पितृभ्यो अन्नं स्वधा नम इति पितॄन् ब्रह्माणं तर्पयामीत्यादि पृथगुदकेन तर्पयंति॥ ततो देवेभ्यः ऋषिभ्यः पितृभ्यश्च नम इति नमस्कारेणोपस्थाय॥ बलवर्धननामानं लौकिकमग्निं प्रतिष्ठाप्य अन्वाधानसमिद्द्वयमादाय अग्ने एहीत्यादि प्राणायामांतं कृत्वा वेदोत्सर्जन होमकर्मणि याक्ष्यमाणा देवताः परिग्रहीष्यामि॥ इत्यन्वाहृत्यं तमुक्त्वा॥ वैशेषिकप्रधानहोमे कांडर्षीनित्यादि परमात्मानं द्वादश प्रधानदेवताश्चोपाकरणवदुक्त्वा॥ वरुणमित्यादि संस्थावेणत्यं तमुक्त्वा॥ समिधोग्नावाधायेतिव्याहृत्यंतं हुत्वा॥ वैशेषिक होमः॥ प्रजापतये कांडर्षये इत्यादि द्वादश प्रधानाहुतीर्हुत्वा॥ ततो यज्ञोपवीतदानं धारणं च पूर्ववत्कृत्वा॥ ब्रह्मचारी कटिसूत्रं यज्ञोपवीतं मेखलाजिनोत्तरीयदंडान् निषद्य प्रत्यूपाकरणं प्रत्यकेसर्जनं च नवानि धृत्वा॥ पुराणान्यप्सु निक्षिपेत्॥ ७॥॥

न

स्का

ततः आचार्यः दर्भासनः दर्भपाणिः शिष्यादिभिः सह हूषेत्वेत्यनुवाकमात्रमधीतपंचानांच
मुण्णा वा आदितः पंचवनुवोनुवाकान्यठित्वा ॥ उत्सृष्टा वै वेदाः॥ एकाहमनध्यायः कार्यः इत्युक्त्वा
इमंमे वरुणेत्यादिसंख्याजपांतं कर्म कृत्वा ॥ ततो जलसमीपं गत्वा ॥ कांडात्कांडादिति मंत्रद्वयेन केका
दूर्वास्तंबं रोपयंति ॥ ततो जलाशयं प्रविश्य लोडयो मिमंतं कृत्वा ॥ सुरक्ष्यथपर्जन्यसूक्तमसठंति ॥
ततो जलयं निर्गत्य वस्त्रादिपरिधानं कृत्वा ग्रा ॰ चीमुदीचीं वाद्दिशमानमितो राजिं धावंति या
वत्प्राणधावनं कृत्वा ॥ तस्मा[illegible]द्देशात् होमदेशमागत्य उत्सर्जनांगं त्रिरुद्रन्नहोमं पुण्याहवाच
नं करिष्यइति संकल्प्य ॥ त्रिरुद्रन्नहोमं बली[illegible] करणांतं समाप्य पुण्याहं वाचयित्वा ॥ कृतस्य
कर्मणः सांगतासिध्यर्थं ब्राह्मणभोजनं संकल्प्य सर्वे कुर्युः ॥ कर्मण्पः सांगतासिध्यर्थं आ
चार्ययदक्षिणां दत्वा प्रामादा ॰ यविष्णुं स्मरेत् ॥ इति सत्याषाढहिरण्यकेश्यार्तं ॰ महेश

२ न भट्टकृतेउत्सर्जनप्रयोगः ॥ वेदपारायणप्रयोगः ॥ तत्र सूत्रं ॥ एवंपायणसमासो कांडात्कांडा
दिति दूर्वारोपण्णो दधिधावनवर्जमिति ॥ तत्रैवामिदेशवचनादविकृताः वेदपारायणे उत्सर्ज
नोक्ताः धर्माः ॥ वेदपारायणोपाकरणे तत्समाप्तिं च कर्तव्याः ॥ यद्यप्युत्सर्जनं सन्निहितं ॥ ११९॥

तथापि अथा ॰ तउपाकरणोत्सर्जने व्याख्यास्याम इति सह सधर्मप्रापकात्साहित्यनिर्देशात् ॥ ब
ध्यंक्रमाएव प्रक्रांधर्माः ॥ विकृतो वचनेन अतिदृश्यंते ॥ उपाकरणपूर्वकमुत्सर्जनं तत्रविरुध
समानधर्मकइतिप्रकृतो बध्यक्रमः सूत्रार्थाः ॥ अतिदेशोपि स एवार्थः ॥ तेनउपक्रांते वेदपा
रायणस्येवं पारायणसमाप्तिः ॥ तथा सति वेदोपाकरणरीत्या वेदपा ॰ रायणोपाकरणं वे
दोत्सर्जनरीत्या पारायणसमाप्तिः ॥ तथा सति सूत्रे एवं पारायणे मुक्ति वक्तव्ये समाप्ताइति
वचनदर्शनं तु प्रक्रांत पारायणस्य सतो जननमरणादि कृताशौचेन प्रतिबंधे प्राप्ते अन्यहंपा

ठेनरावश्यकत्वाभिप्रायपरं ॥ प्रक्रांतेपायणस्य तत्कौणि जननमरणादिकृतमाशौमनेध्या — च
यश्च नास्तीति शास्त्रांतरदर्शनात् ॥ श्रावणेमास्युपाकरणं पोषे चोत्सर्जनमुक्तं ॥ तत्र त्यागः
कालस्तु हस्ते रोहिणी पौर्णमास्यादि लक्षण वचनेन अतिदृश्यंते ॥ पारायणस्य काम्यत्वात् ॥
अत्र पारायणे त्र्यहमेकाहं वा क्षम्यासाद्योधर्मा विकृतौ न प्रवर्तते ॥ तेषां यथाध्याय मध्येत
व्यमित्युक्तरवाक्ष्या ॰ म्येस्य त्रसमानकर्तृक क्रियाविहितत्कालप्रसंगेन चउतराध्ययनस्ये
नावगस्य ॰ वगतेरुपाकरणयोत्सर्जनयोरंगत्वात् ॥ उत्सर्जने दूर्वारोपण्णो दधिप्रवेशाति

रं र × पापक्षयार्थे तया विहितत्वेन नैमित्तिकाच ।

महे० प्रयो०

॥१२०॥

सरणधावनानि साक्षान्निषेधादेव निषिद्धाः तादृशानभवंति ॥ उत्सर्जनातिदेशात्पारायणो त्सर्जनेत्रिवृदन्नहोमोभवत्येव ॥ इदं पारायणं कार्यं पापक्षयपुत्रधनधान्यस्वर्गाद्येकाहि मुष्मिकफलार्थतयाविहितत्वात् ॥ अकरणेप्रत्यवायाश्रवणाद्ब्रह्मग्रहणधारणब्रह्मयज्ञाध्य यनानितुनित्यानि अहरहः कर्तव्यानीत्यादिविधिप्रमादिश्रवणानि करणेप्रत्यवायश्रव णाच्च पारायणंनाम अध्ययनधर्मपूर्वकं मंत्रब्राह्मणयोरन्वहमविच्छिन्नपारगमनं अप अपण्यांतुब्राह्मणांतर्गतमेवशास्त्रांतरेदक्षिणादानाश्रवणऋत्विक्द्वारापिपारायणंक र्तव्यं ॥ पारायणस्यानंगेनकर्मणावाजल्पेनवापाठविच्छेदस्तथाप्राणायाममाचमनंवाकृ त्वा प्रणवेनप्रतिबंधंधायवापठेत् ॥ अनुवाकांतेविरमेत् ॥ पुनर्हिनांतरेकृतनित्यक्रियः प्रणवेनप्रतिबंधंधायपठेत् ॥ पारायणोपाकरणसंकल्पमारभ्योत्सर्जनकर्मसमाप्त्यंतंपा रायणं ॥ तत्रसंकल्पोत्तरंकर्तुर्वरणोत्तरंऋत्विजश्चतत्कर्मकर्तुमाशौचनिषेधोनास्तिउत्त रमेव ॥ ऋत्विक्कर्तृकेपारायणेदक्षिणासुवर्णगोदानंवादद्यात् ॥ स्वकर्तृकेपियथाशक्ति

१२०

ब्राह्मणान्भोजयित्वा दक्षिणांदद्यात् ॥ भिन्नत्वस्तन्तकर्तृकपारायणेषुहोमाश्चतत्तत्कर्तृकाभिन्ना एवंकार्याः ॥ बहुकर्तृकमेकपारायणनभवति कृत्स्नस्यपारायणस्यपुरुषंप्रत्युपदेशात् ॥ एक एवयदिएकफलार्थंतथाबहूनिकरोति । तदानानिमनसावधार्यपारायणोपाकरणानिउत्स र्जनानिवातंत्रेणकरिष्य इतिसंकल्प्य ॥ सर्वेषामुपाकरणानांहोमोपिसकृदेवकार्यः ॥ तथा

२न सर्वोत्सर्जनानां अपिवैशेषिकहोमोपिनावर्तिसंप्रतिपन्नदेवतार्थत्वात् ॥ कामनाभेदेसतिए ककर्तृकाणामपितंत्रंनभवति ॥ तत्तत्फलार्थकृत्स्नविधानात् ॥ प्रयोगकर्तानित्यक्रियश्चंद्रा स्य ६

नुकूल्येप्राङ्मुखउपविश्यदर्भासनोदर्भपाणिः देशकालौसंकीर्त्य ममसमस्तपापक्षयाद

म न्यतंकर्मनसिद्धिद्वाराश्रीपरमेश्वरमेष्परश्रीत्यर्थंयजुर्वेदस्यतैत्तिरीया[illegible]णांतर्गतहिरण्य केशीशाखात्मकवेदस्यपारायणंकरिष्ये ॥ तदंगंगणेशपूजनंपूजनंपुण्याहवाचनंमातृकापू जनंनान्दीश्राद्धंचकरिष्ये ॥ इतिसंकल्प्यकुर्यात् ॥ ततः अमुकप्रवरान्वितामुकगोत्रोमुकशर्मा अमुकप्रवरान्वितममगोत्रोसन्नयजुर्वेदस्यतैत्तिरीयकांतर्गतहिरण्यके[illegible]शाखाध्यायि

कं • शी

म०प्र०
१२१

नं वेदपारायणं कर्तुं ऋत्विजं त्वामहं वृण इति वृणुयात्॥ ततः पारायणकर्ता वेदपारायणांगभूतं स्नानादिकर्म करिष्ये॥ इति संकल्प्य॥ उद्धननादिभूसंस्कारं विधाय ततः वरदनामानं लौकिकमग्निं प्रतिष्ठाप्य प्रज्वाल्य समित्त्रयमादाय श्रद्धां मेधामित्यादि ब्रह्मण्यायामांतं कृत्वा॥ वेदपारायणहोमकर्मणि याः यक्ष्यमाणा देवताः तास्ताः सर्वाः परिग्रहीष्यामि॥ इत्यादि सामान्यप्रधानांतं हुत्वा॥ वैशेषिकहोमः॥ प्रजापतिं कांडर्षिं॥ सोमं कांडर्षिं॥ अग्निं कांडर्षिं॥ विश्वान्देवान् कांडर्षीन्॥ स्वयंभुवं कांडर्षिं॥ सावित्रीं॥ ऋग्वेदं॥ यजुर्वेदं॥ सामवेदं॥ अथर्ववेदं॥ सदसस्पतिं चाज्येन॥ कांडऋषीन् कांडनामानि वा॥ अंगहोमे॥ वरुणं द्विरित्यादि व्याहृत्यंतमुक्ता॥ प्रधानहोमः॥ ×
सावित्र्यादि साहचर्यादि सदसस्पतिरपि नाममंत्रेण होतव्यः॥ ब्राह्मणान्संपूज्य कर्मसाद्गुण्यं स्मरेत्॥ दर्भासनो दर्भपाणिः प्राङ्मुख आसीनः प्रणवपूर्वकमिषे त्वेत्यादिकं वेदपारायणमारभेत्॥ अनुक्तकांते विरमेत्॥ कर्मसमाप्त्यंतं ब्रह्मचर्यमधःशयनं आहारादिनियमश्च कार्यः॥ पतितरजस्वलादिसंभाषणं तत्सकाशं मध्ययनं न कुर्यात्॥ इति सत्याषाढ॰ वेदपारायणप्रयोगः॥

चन१

× प्रजापतये कांडऋषये स्वाहा॥ इत्यादि यथायथं त्याग जोनदेकादशप्रधानाज्याहुतीः॥ ततः इममेवरुणेत्यस्य जेपांतं सर्वं समापयेत्॥ नात्र स्विष्टकृद्धोमः॥ ×८

१२२

पे

अथ पारायणोत्सर्जनप्रयोगः॥ पारायणकर्ता कृतनित्यक्रियः समाप्तपारायणे आगुह्याग्न्यादि शमुपनिशमुपनिष्क्रम्य आपःसमीपं गत्वा उत्सर्जनांगस्नानं करिष्ये इति संकल्प्य उत्सर्जनोक्तरीत्या स्नात्वा कर्मांगमेतद्विधाय वस्त्रपरिधानादि कृत्वा दर्भासनो दर्भपाणिः प्राङ्मुख उपविश्य देशकालौ संकीर्त्य मम कृतस्य वेदपारायणस्य सांगतासिद्ध्यर्थं श्रीपरमेश्वरप्रीत्यर्थं उत्सर्जनाख्यं कर्म करिष्ये॥ तदंगं गणेशपूजनं [illegible] पुण्यहवाचनं [illegible] कृत्वा॥ उत्सर्जनांगं देवऋषिपितृपूजनं करिष्ये इति संकल्प्य उत्सर्जनोक्तप्रकारेण वेदिं विधाय तत्रासनानि कल्पयेत्॥ प्राक्प्रवणे देशे प्रागग्रैर्दर्भैः उदक् संस्थानि कल्पयंति ब्रह्मादि त्रयोविंशति देवेभ्यो दत्वा॥ ततो निवीती वेदेरुत्तरतः उदीचीनप्रवणे देशे उदगग्रैर्दर्भैः प्राक् संस्थानि विश्वामित्राद्य वसिष्ठांतेभ्यः अष्टावासनानि दत्वा॥ ततः कश्यपाद्दक्षिणतः देवेभ्यः पश्चात् प्राक्प्रवणे देशे प्रागग्रैर्दर्भैरुदक् संस्थानि अगस्त्यादि इतिहासपुराणांतेभ्यो द्वि पंचाशदासनानि दत्वा॥ दक्षिणतो दक्षिणाप्रवणे देशे प्राचीनावीति

महे० प्र०

॥१२२॥

दाक्षिण्ये दर्भैः प्रत्यक्संस्थानि वैशंपायनादिएकपत्न्यंतेभ्यः अनुदर्शसाधारणपितृभ्यो दत्वा॥
यथाधिकारं द्वादशपितृभ्यो दत्वा उत्सर्जनोक्तप्रकारेण सर्वान्संतर्प्य संपूज्योपस्थाय नमस्कृत्य
ततो देवेभ्यः पश्चादुध्वननादिभूसंस्कारं विधाय तत्र लौकिकमग्निं प्रतिष्ठाप्य प्रज्वाल्य समि-
त्त्रयमादाय प्रश्नध एहीत्यादि प्राणायामांतं कृत्वा वेदोपा[illegible]रायणोत्सर्जनहोमकर्मणि यथाक्ष्य-
माणा देवतास्ताः सर्वाः परिग्रहीष्यामि॥ इत्यादि व्याहृत्यंतमुक्त्वा॥ वैशेषिकहोमः॥ प्रजा-
पतिं काण्डऋषिं सोमं काण्डर्षिमित्यादि सदसस्पत्यंतं प्रधानदेवताभ्योक्त्वा॥ अंगहोमे वरुणं
द्विरित्यादि स्त्रावेणेत्यंतमुक्त्वा॥ समिधोग्ना वा प्राग्व्याहृत्यंतं [illegible]कृत्वा॥ प्रजापतिं काण्ड-
र्षिमित्यादि सदसस्पत्यंतं प्रधानाहुतीर्हुत्वा॥ ततः अंगहोमादि संस्थाजपांतं समाप्य त्रिर-
दश्च होमं बलीकरणानंतरं कृत्वा पुण्याहं वाचयित्वा॥ कृतस्य कर्मणः सांगतासिध्यर्थं ब्राह्म-
णभोजनं संकल्प्य ब्राह्मणान्संपूज्य दक्षिणां दत्वा॥ प्रमादात्कु० कर्मसाद्गुण्याय विष्णुं स्मरेत्॥
इति सत्याषाढहिरण्यकेशी० वेदोपाकरणोत्सर्जनप्रयोगः॥ अथ नित्यतर्पणस्नानविधिः॥ छ

२

तत्र सूत्रं नित्यमेव स्नात्वाद्भिर्देवानृषीन्पितॄंश्च तर्पयंति॥ तर्पयतीति अन्वहं कर्तव्यं॥ तर्पणं स्ना-
नं उत्सर्जनोक्तरीत्या कर्तव्यं॥ कृतनित्यक्रियः ग्रामुद्ग्रामात्प्रगृहादिरहिता आपस्तत्र दर्भपाणि-
रादित्याभिमुखस्नायात्॥ नद्यासु अपि अभिमुखमादित्यमुपस्पृशेत्॥ सर्वत्रैवोदकस्पर्शनादि-
धिरिति धर्मस्मरणात्॥ प्राङ्मुखो निमज्य मलापकर्षणं विधाय देशकालौ संकीर्त्य॥ मम का-
यिकवाचिकमानसिकज्ञाताज्ञातस्पृष्टादि सर्वपापक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं गंगादिती-
र्थस्नानमहं करिष्ये इति संकल्प्य॥ तीर्थं संप्रार्थ्य दर्भपाणिः॥ ॐ तं च सत्यं चाभीद्धादिति त्र्या-
वृतानन जले त्रीन्प्राणायामान्कृत्वा आपो हि ष्ठा मयोभुव इति तिसृभिर्हिरण्यवर्णाः शुच-
यः पावका इति चतसृभिः पवमानः सुवर्जन इत्येतेनानुवाकेन कुशवारिभिः आत्मानमभि-
षिंचति॥ ततः स्नात्वा द्विराचम्य॥ ततः स्नानांगतर्पणं॥ देवे आर्षे च तर्पणे सर्वांजलिना का-
र्यं॥ ब्रह्मादयो ये देवाः॥ तां देवास्तर्पयामि॥ भूर्देवांस्त०॥ सुवर्देवांस्त० भूर्भुवः सुवर्देवांस्त०
देवांस्तर्पय॥ प्राचीनावीती॥ विश्वामित्रादयो ये ऋषयः॥ तानृषींस्त० भूरृषीन्नित्या

पित्र्ये च

महे०श्रयो० दिनाऋषीत्संतर्प्य ॥ प्राचीनावीति ॥ वैशपायनादयो येपितरः ॥ तान् पितॄंस्तर्पयामि भूपितृन्नित्योदिपितॄन्संतर्प्येति स्नानांगतर्पणं कुर्वंति ॥ ७ ॥ संध्यावंदनादिकृत्वा ॥ उत्सर्जनोक्तप्रकारेण देवर्षिपितृतर्पणं कुर्यात् ॥ यज्ञोपवीतिदेवतीर्थेन प्राङ्मुखः त्रयोविंशति ब्रह्मादिदेवान् ॥ निवीतिषष्टिसंख्याकाविश्वामित्रादिऋषीन् ॥ प्राचीनावीतिचतुर्दशवैशंपायनादिसाधारणपितॄन् ॥ जीवन्पितृकोप्यन्वहंतर्पयेत् ॥ ततः पितृकस्तेतान्स्तर्पयेत्स्वपि[illegible]आदीनपितृतर्प येत् ॥ तत्र संग्रहश्लोकः ॥ ताता वा त्रितयं सपत्नजननीमातामहादित्रयं सस्त्री स्त्रीतनयादितातजननीस्वभ्रातरः सस्त्रियः ॥ ताताम्बात्मभगिन्यपत्यधवयुक् जायापितासद्गुरुशिष्याप्ताः पितरो महालयविधौ तीर्थे तथा तर्पणे ॥ अस्यार्थः ताता[illegible]त्रितयं ॥ कर्तुः पितृपितामहप्रपितामहाः ॥ अम्बात्रितयं ॥ मातृ[illegible] पितामहि प्रपितामह्यः ॥ सपत्नजननी ॥ मातामहादित्रयं ॥ सपत्नसस्त्री ॥ मातामही मातुः पितामही मातुः प्रपितामहीसहितं ॥ स्त्रीतनयादि ॥ स्त्रियः पुत्रः ॥ स्त्रियः ॥ दुहितः

॥ १२३ ॥

१२३

सावित्र्या त्रिगुणीकृतं । अथः प्रदक्षिणावृत्तं ६

तद्भर्तारश्च ॥ ताताम्बाभ्रातरः ॥ जननीभ्रातरः ॥ स्वभ्रातरः ॥ तेषां स्त्रियस्तदपत्यानि च ॥ तातभगिनी ॥ अंबाभगिनी ॥ आत्मभगिनी ॥ तद्भर्तारस्तदपत्यानि ॥ अन्यस्पष्टं ॥ इति हिरण्यकेशीसूत्रे० नित्यस्नानविधिः ॥ कार्पासक्षौमगोवालशणवल्कतृणादिकं ॥ यथा संभवितोधार्यमुपवीतं द्विजातिभिः ॥ शुचौदेशेशुचिः सूत्रंसहितांगुलिमूलके ॥ आवेष्ट्य षण्णवत्या वा त्रिगुणीकृत्य यत्नतः ॥ अब्लिंगकैस्त्रिभिः सम्यक्प्रक्षा[illegible]त्यार्ध्वं वृतं नुतत् ॥ अप्रदक्षिणमावृत्तं सामेस्यान्नवसूत्रकं ॥ त्रिरावेष्ट्य दृढं बध्वा हरिब्रह्मेश्वरान्न्यसेत् ॥ यज्ञोपवीतं परमं पवित्रमुदीरयन् ॥ सूत्रं सलोमकं चेत्स्यात्ततः कृत्वा विलोमकं ॥ सावित्र्या दशकृत्वाद्भिर्मंत्रिताभिस्तदुक्षिपेत् ॥ विच्छिन्नं वाप्यधो यातं भुक्त्वा निर्मितमुत्सृजेत् ॥ पृष्ठवंशे च नाभ्यां च धृतं यद्विंदते कटिं ॥ तद्धार्यमुपवीतं स्यान्नातिलंबं न चोच्छ्रितं ॥ स्तनादूर्ध्वमधो नाभेर्धार्यं स्यान्नकेषुचन ॥ ब्रह्मचारिण एकं स्यात्स्नातकस्य द्वे बहूनि वा ॥ गृहस्थेन तु द्वे धार्ये श्रौते स्मार्ते च कर्मणि ॥ तृतीयमुत्तरीयं स्याद्वस्त्राभा

त

म०हेम० वेतद्दिष्यते॥ ब्रह्मसूत्रेतु सव्यं से स्थितेन यज्ञोपवीतिना॥ प्राचीनावीतिना सव्ये कंठस्थेन तु
निवीतिना॥ वस्त्रे या यज्ञोपवीतार्थे त्रिवृत्सूत्रं तु कर्मसु॥ कुशमंजलु वा तंतुरज्जू वा सर्वजाति
॥१२४॥ मु॥ इति स्मृत्यर्थसारे प्रकाशं तत्रैव॥ ब्राह्मणेन तत्कन्यया वा कृतं सूत्रमानीय भूरिति निष
धमांगुष्ठवतिमिनोति॥ भुव इति द्वितीयां॥ सुवरिति तृतीयं नीत्वा पलाशपर्णे संस्थाप्य॥
हिश्वति आपो हिरण्यवर्णाः शुचयः पावका इति च तस्रभिः पवमानः सुवर्जन इति अनुवाके
न गायत्र्याभिषिच्य वामहस्ते कृत्वा॥ शिरसि ताड्य॥ भूरग्निं च पृथिवीं च मां च॥ त्रींश्च
लोकान्संवत्सरं च॥ प्रजापतिस्त्वा सा० दतु॥ तयादेवतयांगिरस्व० सीद॥ भुवो वा० मां च॥
त्रींश्च लोकान्सव० सीद॥ सुवरादित्यं० मां च॥ त्रीं० सीद॥ भूर्भुवस्सुवश्चं० मां च॥ त्रीं०
सीदेति पृथिव्यं कृत्वा॥ ओंकारं प्रथमतंतौ न्यसामि॥ अग्निं द्वि० नागान्० सोमं० पितॄन्०
प्रजापतिं० वायुं० सूर्यं० विश्वान्देवान्नवम० सामीति यथायथा वाह्य॥ देवेभ्यो नम इ
ति संपूज्य देवस्य त्वेत्यादाय॥ उद्वयं तमसस्परीत्यादित्याय दर्शयित्वा॥ यज्ञोपवीतमिति

मा २

मंत्रेण धारयेत्॥ इति बोधायनोक्तप्रकारः॥ यज्ञोपवीते त्रुटिते कटौ हस्ताद्गते अशुचौ गोदृधि
स्नानं मातापित्रक्षयाहनि विना कंठात्तु तारिते यस्य त्यागं कृत्वा नूतनं धारणं कुर्यात्॥
अथ प्रमादाद्यज्ञोपवीतनगते प्रायश्चित्तं॥ कर्ता त्रिवृत्सूत्रं यज्ञोपवीतार्थे धृत्वा स्नात्वा
प्रक्षु(?) उपविश्याचम्य प्राणायम्य देशकालौ कीर्तत्य॥ यज्ञोपवीतत्यागजन्यदोषपरिहा
रद्वारा श्रीपरमेश्वरप्रीत्यर्थं प्रायश्चित्तं करिष्ये॥ इति संकल्प्य गणपतिं संपूज्य॥ उद्धन
नादि भूसंविधाय लौकिकमग्निं प्रतिष्ठाप्य प्रज्वाल्य समित्त्रयमादाय प्रश्नेरही(?) त्यादि
प्राणायामांतं कृत्वा॥ उपवीतनाशप्रायश्चित्त० ग्रहीष्यामि॥ जातवेद समग्निं निधा
नेत्यादि व्याहृत्यंतमुक्ता॥ विशेषिक होमे॥ गायत्र्या अष्टोत्तरशतं तैलाज्यैर्यक्ष्ये॥
अंगहोमे वरुणं द्वि रित्यादि व्याहृत्यंतमुक्ता॥ गायत्र्या ष्टोत्तरशतं कृत्वा॥ अंगहोमादि सं
स्थाजपांतं समाप्य॥ नात्रिवृदन्नहोमः॥ ब्राह्मणभोजनं संकल्प्य॥ दक्षिणां दत्वा
कर्मसाद्गुण्याय विष्णुं स्मरेत्॥ अथ कुशविधिः॥ कुशाः काशाय वा दूर्वा उशीराः स्ति सकु

म० हे॥ प्र० द्र॥ गोधूमा व्रीहयो मौंजाः दश दर्भाः सबल्वजाः॥ नभोमासस्य दर्शे तु शुचिर्दर्भान्समाहरेत्॥ अयातयामास्ते दर्भा विनियोज्याः पुनः पुनः॥ अथ दर्भोत्पाटनमंत्रः॥ छ॥

विरिंचिना सहोत्पन्न परमेष्ठी निसर्गज॥ दह सर्वाणि पापानि दर्भ स्वस्तिकरो भव॥ एवं मंत्रं समुच्चार्य ततः पूर्वोत्तरामुखः॥ अमूला देवकार्येषु प्रयोज्यास्तु जपादिषु॥ समूलाः कुशाः शस्ता दैवे पित्र्ये च कर्मणि॥ अनंतगर्भिणौ साग्रौ कौशौ द्वौ च पवित्रके॥ चतुर्भिरभिचारे स्यान्निपुरे चेति केचन॥ सपवित्रो सदर्भो वा कर्मांगाचमनं चरेत्॥ नोच्छिष्टतद्भवेत्तस्य भुक्तोच्छिष्टं तु वर्जयेत्॥ यैः कृतः पिंडनिर्वापः श्राद्धान्वा पितृतर्पणं॥ विण्मूत्रादिषु ये दर्भास्तेषां त्यागो विधीयते॥ निवीतिमध्ये स्थितास्त्याज्या यज्ञभूमौ स्थितास्तथा॥ वामहस्ते स्थिते दर्भे न पिबेद्दक्षिणेन तु॥ वस्त्रादिनोपग्रहणेन दोषापि बतो भवेत्॥ न ब्रह्मग्रंथिना चामेन्न दूर्वाभिः कदाचन॥ स्नाने दाने तथा होमे स्वाध्याये पितृतर्पणे॥ सपवित्रा स दर्भो वा करौ कुर्वीत नान्यथा॥ कुशाभावे तु काशाः स्युः कुशाः काशा समाश्रिताः॥ काशाभावे गृहीतव्या अन्ये दर्भा यथोदिताः॥ नाडीयां तु नियाद्युत्रौ तु नीया द्वापि सध्ययोः॥ दर्भाभावे स्वर्णरौप्यताम्रमय्यैः सदा क्रिया॥ इति कुशविधिः॥ आपस्तंबादिसूत्रे तुल्य ग्रंथानालोक्य यत्नतः॥ केवलं वैदिकश्राद्धा प्रेरणाज्जात बुध्दिता॥ [illegible] कृतः कथमहं शेन प्रयोगस्मार्तकर्मणां॥ अत्रानूक्तं दुरुक्तं वा गतेषां द्योश्रुतस्तथा॥ सन्मार्गदर्शकैरेव शोध्यस्या [illegible] बहुवेदिभिः॥ अनेन प्रीयतां देवो गोपालकुलदैवतं॥ इष्वर्पितानि कर्माणि सफलानि भवंति हि॥

नि

अपिर्नताकर्माणि भस्मनित्यस्त हस्तवत्॥ नित्यं नैमित्तिकं काम्यं ये चान्यं मोक्षसाधनं॥ विष्णोः समर्पितं सर्वं सात्विकं सफलं भवेत्॥ इति बृहन्नारदीये॥ छ॥ विहाय वृ[illegible] धाजे वहादिनिधीयसत्वो हवं श्रणु ध्वमिति पिंचं वक्तं प्रकटयामि वाग तं च लं बुधा वसु हृयं दिसमदू रूढोत्कटैर्विचारविकटै रत्नं प्रलयितं विस्मयनतत्॥ छ॥ इति सत्याषाढहिरण्यकेशी स्मार्तप्रयोग रत्ने प्रथम संस्कार प्रकरणे वैशंपायन महेशभट्टकृतौ संस्कार प्रकरण समाप्तं॥ छ॥ स्वार्थं॥ बाकरू छेने लिखितं॥

इतिमहेशभट्टकृतौसंस्कार
प्रकरणंसमाप्तं॥ छ॥ छ॥

[OrderDescription]
,CREATED=13.09.19 12:54
,TRANSFERRED=2019/09/13 at 14:02:26
,PAGES=102
,TYPE=STD
,NAME=S0001774
,Book Name=M-261-SATYASHAD HIRKAYKESHIY SMARAN PRAYOG
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF

FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF

FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF

FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,